The accounts of the Praṇava merely paraphrase the Upaniṣad eulogies of Oṁkāra

In selecting the *dhyeya-svarūpam* i.e., the mental picture of the Supreme Being on which his thoughts should concentrate the seeker is advised to begin with the lower (materialized) forms of Brahman and then ascend to the highest (p. 203)

Results of Yogic Practice

After one has practised Yoga for some time he begins to feel its beneficial reactions on his health temperament mental condition and powers of endurance. The effects are also external, and are seen in the friendly attitude of men and animals to the *yogin* (p. 211) These are indications that the *yogin* is on the right road (*yoga-pravṛtti-cihnāni*) When he begins to perceive (as with his own eyes) the self and the earth in resplendence his perfection in the practice is imminent But, the path is beset with dangers, which are to be treated as diseases (*upasargāh*) that require immediate attention if they are to be cured Physical reactions of an unfavorable kind are less serious than the more insidious mental and spiritual effects, which the Yogin s growing strength has to overcome. The temptation to utilise the new power to gain objects of sense gratification is a common danger The correctives to the aberrations are briefly indicated in ch XXI which ends with the assurance that the *yogī* who is intent always on Brahman, will be freed from disease (*upasarga* p. 215)

Super normal powers are developed in the adept in Yoga. They are classed as eight: *aṇimā mahimā* and *laghimā prāpti prākāmyam īśitvam, vaśitvam* and *kāmāvasāyitvam* Of these the first three are known as *śārīra* and the rest *aindriya* The adept can contract or expand his stature or size become lighter than air making it possible to cover quickly great distances gain the power of seeing everything near or distant hidden or open, and of moving about in space as he desires, (*yatheṣṭacāritvam*) gain command over even superhuman agencies prolong life indefin tely and lastly subdue to his will any one whose shadow he treads, or enter into the minds of distant persons and pass into the bodies of any one. These great powers constitute a snare One must practise Yoga not for getting such powers, but to attain *mukti* The *yogin*

must therefore avoid entanglement in them, and move towards his goal of freedom, recognizing that all that one experiences is unreal (*asat*) and that the only reality is *Brahman*. This knowledge will bring him the tranquillity which culminates in *mukti* (p. 217) The real proof of the fruition of *Yoga* is not the development of such supra normal powers but the attainment of deathlessness in *moksa* (p 218)

THE MAN OF THE POISED MIND (STHITAPRAJÑA-CARITAM)

The aim of Yogic discipline is to prod ce the poised mind (*sthitaprajña*) The acquisition of it is the mark of *yoga-siddhi* the successful end of the training He alone gets the serenity that precedes and leads to *mukti* Mental calm is the gift of the renunciation of objects of desire. From it springs inability to be depressed in sorrow and elated in joy Passion fear and anger flee the desireless person. As rivers enter the ocean and go on filling it, without raising its level, so he, whom desires leave unaffected, is the person to whom serenity comes, not the man who desires the desirable

At the root of renunciation lies the recognition of the nature of the self and of its relation to the universal Self. It is he who has realized this truth that attains the poise, which looks at good and evil in life with equal indifference. His attitude arises from the knowledge that *Brahman* the immutable and the im mortal, and the eternal moral law are all embodiments of the Supreme, as declared in the *Gītā* (XIV 27) He sees the Lord in everything and everything in the Lord, (p. 222) losing his sense of duality (*chinnadvaita*) The best *yogin* is he who feels thus, and looks at every one and everything with an even eye. Such a person, said, Śrī Kṛṣṇa, was very dear to H m This truth does not dawn upon the human mind easily It may even take myriads of births before one arrives at an insight i to it, and realizes that All is Vāsudeva (Brahman) and attains Him (*Gītā*, VII 19)

Having thus summarized the teaching of the *Gītā* on the subject, Lakṣmīdhara proceeds to illustrate the doctrine from number of legends in the epic and the Purāṇas.

Bhagavad-gītā VI 32

The reply of Prahlāda to his father Hiranyakaśipu when asked if he had been properly taught the science of polity by his teachers, (p. 244) as recorded in the *Viṣṇupurāṇa* (I xix, 34-49) brings out this truth. As the child in his inexperience and ignorance, takes the fire-fly for fire, so *ajñāna* blinds people to reality and they mistake appearances for it. If a prince, whose eyes have been opened, is taught the best means of overcoming enemies and gaining allies, he may retort, as Prahlāda did, that in the universe everything is a manifestation of the Paramātman (Govinda) and the distinction of friend and foe is meaningless. Gods, men, animals, birds, and even reptiles are all forms of the Supreme Being (Viṣṇu) existing seemingly detached from Him He who knows it knows that everything in the universe is identical with himself and looks upon them all with an even eye. In the face of cosmic unity all such distinctions vanish.

Another apologue relating to Prahlāda is cited from the *Mahābhārata* A sage named appropriately Ajagara (the boa constrictor) was questioned by Prahlāda on the secret of his equanimity under all conditions. The sage replied that having known how life comes into being and goes out, the decline, progress and destruction of the universe, he had learnt neither to rejoice nor to feel sad. Everything in the universe is tied to death He had realised the Brahman behind creation and behind destruction. He proceeded to describe in detail how the elements of this knowledge had made him live like an *ajagara*—inert, insensible to pain and joy to starvation and food, taking all that comes with calmness. Such a mode of life (*vrata*) is the *ajagara vratam* which is held out as an ideal to the enlightened. It is not quietism but serenity *in action* after attaining *jñāna* that the sage claims for his mode of life.

The legend of Devala and Jaigīṣavya is next cited to show how equanimity springs from *jñāna* The sage, whose miraculous powers of transferring himself to other worlds, when apparently he was present all the time in the hermitage of Asita Devala, was a *mahā yogin* His indifference to homage and abuse made Devala ask him the secret of his serenity His

Śāntiparva 179, 17 37
Śāntiparva 236.
His powers are described in *Śalyaparva* ch 51

must therefore avoid entanglement in them, and move towards his goal of freedom, recognizing that all that one experiences is unreal (*asat*) and that the only reality is *Brahman*. This knowledge will bring him the tranquillity which culminates in *mukti* (p. 217) The real proof of the fruition of *Yoga* is not the development of such super-normal powers but the attainment of deathlessness in *moksa* (p. 218)

THE MAN OF THE POISED MIND (STHITAPRAJÑA-CARITAM)

The aim of Yogic discipline is to produce the poised mind (*sthitaprajña*) The acquisition of it is the mark of *yoga-siddhi*, the successful end of the training H alone gets the serenity that precedes and leads to *mukti*. Mental calm is the gift of the renunciation of objects of desire. From it springs inability t be depressed in sorrow and elated in joy Passion fear and anger flee the desireless person. As rivers enter the ocean and go on filling it, without raising its level, so he, whom desires leave unaffected, is the person to whom serenity comes, not the man who desires the desirable.

At the root of renunciation lies the recognition of the nature of the self and of its relation to the universal Self. It is he who has realised this truth that attains the poise, which looks at good and evil in lif with equal indifference. His attitude arises from the knowledge that *Brahman* the immutable and the immortal, and the eternal moral law are all embodiments of the Supreme, as declared in the *Gītā* (XIV 27) He sees the Lord in everything and everything in the Lord, (p. 222) losing his sense of duality (*chinnādvaita*) The best *yogin* is he who feels thus, and looks at every one and everything with an even eye. Such person, said, Śrī Kṛṣṇa, was very dear to Him This truth does not dawn upon the human mind easily It may even take myriads of births befor one arrives at an insight into it, and realises that All is Vāsudeva (Brahman) and attains Him (*Gītā*, VII 19)

Having thus summarised the teaching of the *Gītā* on the subject, Lakṣmīdhara proceeds to illustrate the doctrine from a number of legends in the epic and the Purāṇas.

Bhagavad-gītā, VI, 32

The reply of Prahlāda to his father Hiranyakaśipu when asked if he had been properly taught the science of polity by his teachers, (p. 244) as recorded in the *Viṣṇupurāṇa* (I xix, 34-49) brings out this truth As the child in his inexperience and ignorance, takes the fire-fly for fire, so *ajñāna* blinds people to reality and they mistake appearances for it. If a prince, whose eyes have been opened, is taught the best means of overcoming enemies and gaining allies, he may retort, as Prahlāda did, that in the universe everything is a manifestation of the Paramātman (Govinda) and the distinction of friend and foe is meaningless. Gods, men, animals, birds, and even reptiles are all forms of the Supreme Being (Viṣṇu) existing seemingly detached from Him He who knows it knows that everything in the universe is identical with himself and looks upon them all with an even eye. In the face of cosmic unity all such distinctions vanish

Another apologue relating to Prahlāda is cited from the *Mahābhārata* A sage named appropriately Ajagara (the boa constrictor) was questioned by Prahlāda on the secret of his equanimity under all conditions. The sage replied that having known how life comes into being and goes out, the decline, progress and destruction of the universe, he had learnt neither to rejoice nor to feel sad Everything in the universe is tied to death. He had realized the Brahman behind creation and behind destruction. He proceeded to describe in detail how the elements of this knowledge had made him live like an *ajagara*—inert, insensible to pain and joy to starvation and food, taking all that comes with calmness. Such a mode of life (*vrata*) is the *ajagara vratam* which is held out as an ideal to the enlightened It is not quietism but serenity *in action*, after attaining *jñāna* that the sage claims for his mode of life.

The legend of Devala and Jaigīṣavya is next cited to show how equanimity springs from *jñāna* The sage, whose miraculous powers of transferring himself to other worlds, when apparently he was present all the time in the hermitage of Asita Devala, was a *mahā yogin* His indifference to homage and abuse made Devala ask him the secret of his serenity His

Śāntiparva 179, 17 37
Śāntiparva 236.
His powers are described in *Śalyaparva* ch 51

reply was that he who strives for *mukti* obtains eternal joy by attaining Brahman, is therefore beyond praise and abuse, and can ignore both.

The reply of Jaḍa to Dattātreya, as given in the *Mārkaṇḍeya purāṇa* (ch. 37) when asked to look into the root of his grief, illustrates another aspect of the truth. Pain and pleasure joy and sorrow are all due to the mind only. The self is a thing apart from both the body and the mind. Accordingly it is un affected by the joys and afflictions to which they are subject. The same self exists in all bodies, as the same air may be found in different vessels (p. 231)

The fourth illustration is a dialogue between a king and a Brāhmaṇa, who had been pressed into service as bearer to carry the king's palanquin. Finding the pace slow the king enquired, and was told that it was due to the inability of the short Brāhmaṇa to keep step with the other bearers. The king addressed the Brāhmaṇa and asked him why he could not keep step though he looked strong. The dialogue between the king and the Brāhmaṇa goes to the root of the matter as the Brāhmaṇa does not recognize the distinction between "you" and "I" between *pālki* and the king within the *pālki* since all are manifestations of the same Brahman. He then instructs the king in the philosophy of the self, eternal and indivisible which manifests itself in many apparent forms. The word "I" is wrong when used by an individual of himself and right only when used of the *ātman* (p. 234) In all bodies only one Person (Pumān) resides (p. 235) He is immanent (*vyāpī*) attributeless (*nirguṇa*) behind nature free from birth, *buddhi* and other qualities, is pure knowledge, and is indefinable by name, class and so forth (p. 237)

The conclusion is enforced by the Brāhmaṇa by a story of the sage Ṛbhu and his pupil Nidāgha, whom Ṛbhu used to visit (unrecognized) once every thousand years. When treated to a sumptuous meal, and asked if he was satisfied with the food, the sage pointed out, in his questions and answers, the delusiveness of any distinction between the eater and the food, the host and the guest, as well as the unreality of qualities and sensations. There is only *one* reality *viz*., the Brahman. When met again, and asked by Nidāgha whether he had seen a king on

an elephant going on a procession into the city and holding up Nidāgha, who also wished to enter the city Rbhu (unrecognized) refused to see the distinction between above and below between king and elephant, and between his questioner and himself (p 142) Nidāgha then recognized his old teacher who had come again to teach him this truth.

The drift of these legends, and of this chapter is that the physical training of the *yoga* is ineffective without the *viveka-jñāna* which liberates. From it alone can spring the poised mind.

The Destiny of the Person who Lapses from Yoga (Yogabhraṣṭagatiḥ)

The way of Yoga is hard. If failure in pursuing it can only lead to sorrow one will be deterred from attempting to tread it. The question of what becomes of a man who makes the attempt and fails to reach perfection (*siddhi*) is therefore pertinent. It was put by Arjuna, and Śrī Kṛṣṇa gave a reassuring answer Neither in this world nor in the hereafter does a bad time await such a person. No one who attempts the good is ever lost. (The novice in Yoga is termed *Yoga yuj* by the *Viṣṇupurāṇa*, while the adept is termed *Viniṣpanna-samādhiḥ*). He is reborn in a good family with the impulse of his previous good action clinging to him and after generations of steady ascent, he becomes a *yogin* again, succeeds in the effort and attains liberation (*mukti*) This is the destiny of the *yogayuj* The adept, having fulfilled his training attains *mokṣa* at the end of his life.

Portents of Death (Ariṣṭhāni)

The object of Yoga is to conquer death by conquering the tendency to rebirth. Death can therefore have no terrors to the Yogin. B t, the knowledge of the time when physical death may happen, and the body die, is helpful to the Yogin By his mastery of *Yoga* h is ble to prolong his life at will, and determine like Bhīṣma the moment of his death. Death in *Uttarāyana* when the Sun has set on his northward course, is believed to be helpful in the transit by the path of light (*arcir-mārga* or *devayāna*) Belief in omens, portents and

dreams is ancient. The long recital of such harbingers of death in this chapter may be presumed to reflect the Yogic experience of many adepts, and should be regarded as empirical rather than a mark of superstition.

THE PASSAGE OF THE SOUL FROM THE BODY (UTKRĀNTIḤ)

The *mumukṣu* pants for the time when the self will be released from the body. Death has only an auspicious meaning to him. To the sinner it opens the way to endless trial and tribulation. The *mumukṣu* is one who has set his face towards *mukti*. He will welcome the separation of soul from body. It will mean for him either *mukti* after death or rebirth, with an acquired impetus to the goal.

Death is to be welcomed with preparations as if receiving a guest. The dying person should abandon fear and depression, purify himself, collect his faculties, turn towards the east or the north, reach a spot to the east or north of his dwelling, which is level and clean, and after receiving the last advice perform a hundred *dhāraṇas* and retain them in the head. When he is tired out by the effort involved in the *dhāraṇas*, the breath will pass out upwards. Abandoned by it, the *Yogin* (as a selffilled with the effulgence of the *praṇava*) will attain release (*nirodha*). This is the procedure indicated by Devala (p. 255). The *Mārkaṇḍeya Purāṇa* paraphrases the prescription of the *dhāraṇā* by advising the dying Yogin to meditate on Brahman, overcoming in its course the three limiting *guṇas*, and gradually ceasing to use even the mind (p. 256). The *Gītā* in a rapturous passage, adds the further detail that the departing self should leave, with the mind fixed upon the Lord alone (p. 257). A person who all through has had no other occupation for his mind but thoughts of the Lord, and who dies with them is assured of *Mokṣa*. Manu compares (for encouragement) the flitting of the spirit from the body to the dropping of the tree into the river on whose bank it has stood, or the departure of the bird from the falling tree (p. 258).

The released self has to march through appointed routes to either *mukti* or to places from which it has to return in rebirth. The Upaniṣads have blazed the ways from the mystic experience

of seers. The Smṛtis and Purāṇas paraphrase the revealed texts that describe the path of the spirit. Yājñavalkya who, by recognition of his compeers, is the *Yogi* among *smṛtikāras* explains the mode of transit. The soul has many rays, some dark, some red, some variegated, and some purple. Of these rays, one runs upwards, penetrates the solar sphere, transcends the world of Brahman, and passes to beatitude. The rays, which are directed downwards, compel rebirth in the world to reap the fruits of *karma* The soul that *transcends* Brahmaloka is welcomed by the Supreme Being, and to it there is no rebirth (pp. 258-259) Those who have attained heaven in virtue of the performance of sacrifices, gifts and austerities are, after their sojourn in heaven, transformed into mists, the night, the dark fortnight, and *dakṣiṇayana* (winter solstice), the regions of the manes (*pitṛ*) the moon air showers, water and the earth They are then subjected to life on the earth. There is a penalty for those who miss the opportunity that life affords for acquiring the redeeming knowledge: they are driven back to rebirth. Such of them as have done good actions, without acquiring the knowledge that liberates, will be born in positions, which are half way to the life in which the knowledge will dawn. Those who have li ed evil lives, must be reborn as reptiles, insects or butterflies. The indication is only illustrative. The *Bṛhadāraṇyakopaniṣad* (VI 15) which Lakṣmīdhara quotes here, allows the way of light even to the elect among householders and *vānaprasthas* who have learnt the fundamental truth They too pass from light to day from day to the bright half of the month, from *śukla-pakṣa* to *uttarāyana* from it to the worlds of gods, from those worlds to the Sun and from the Sun to the plane of lightning When they reach the last, a spirit meets them and conducts them to the world of Brahman, from which there is no returning Lakṣmīdhara interprets the expressions *ahas* (day) etc. in the Upaniṣad as references to the divinities whom such souls have, in the last birth most adored.

CONCLUSION

The *Mokṣakāṇḍa* ends in a note of triumph The gods, who regard themselves as above man, have not his opportunity

nor his access to the condition from which there is no return for in the *mahāpralaya* or the dissolution at the end of a *kalpa* they must perish and come back to their old forms in a new युग. The *mukta* will never return. In beatitude he experiences the union of all being with the Supreme. The march of the *mukta* to his goal is beyond the vision of even the gods, who vainly covet a destiny beyond their reach. The attainment of Brahman is not a mere incident in one person's *janma*. It is a cosmic event of the first magnitude. For it marks the culmination of a pilgrimage spread through aeons in the indescribable bliss of *Brahmānanda*.

श्री गणेशाय नमः

श्रीलक्ष्मीधरविरचित

कृत्यकल्पतरुः

मोक्षकाण्डम्

मङ्गलाचरणम्

वेदान्तोक्तिविवेकधैर्यसुभगसद्धारमायातमः
स्वैरोन्मीलदमेयचिन्मय[1]परब्रह्मैकतानात्मने ।
ते यस्मै स्पृहयन्ति लब्धपरमानन्दाः सनन्दादयः
काण्डे वक्ति चतुर्दशे द्विजवरो मोक्षं स लक्ष्मीधरः ॥

प्रतिज्ञा

मोक्षस्य साधना मोक्षस्वरूपविनिरूपणम् ।
ध्यानमस्य तथा ध्यानसम्पयमाः क्रमादिह ॥
चरमाश्रमोऽस्य सन्न्यासो यतिधर्मो विरागता ।
तद्धेतु पञ्चदोषेतः कामादिपरित्यजनम् ॥
इन्द्रियाणां जयस्तस्मादुत्क्रिष्टशारीरचिन्तनम्[2] ।
विवेकश्च शरीरस्य जीवपरमात्मना तथा ॥

1 चिन्मय—ग
2 शरीरचिन्तनम्—ग

ज्ञानकर्मोपयोगित्वमात्मज्ञानस्य हेतवः ।
सपक्षबाध योगाख्या मुक्तानां लक्षणं क्रमात् ।
ध्येयस्वरूपं योगस्य प्रवृत्तेर्लक्षणानि च ।
उपसर्गाः क्रमेणाऽत्र तथा योगविभूतयः ॥
स्थितप्रज्ञस्य चरितं[1] योगभ्रष्टगतिः पुनः ।
अरिष्टानि तथोत्क्रान्तिरर्चिरादिपथस्तथा ॥
इति लक्ष्मीधरः श्रीमानात्मविद्याविशारदः ।
पञ्चर्णां मोक्षकाण्डेऽत्र पर्विंशतिमजीघटत् ॥

॥ १ ॥

तत्र मोक्षप्रस्तावना

मार्कण्डेयपुराणे[1]

अहमित्यङ्कुरोत्पन्नो ममेति स्कन्धवान्[2] महान् ।
गृहक्षेत्रादिशाखश्च पुत्रदारादिपल्लवः ॥
धनधान्यमहापत्रोऽनेककालप्रवर्द्धितः ।
पुण्यापुण्यप्रसूनश्च सुखासुखमहाफलः ॥
अपवर्गपथव्यापी मूढसम्पर्कसेचनः[3] ।
विधित्साभृङ्गमालाढ्यो हृदि जातो महातरुः ॥
संसाराध्वपरिश्रान्ता ये तच्छायामुपाश्रिताः ।
[4]भ्रान्तिज्ञानसुखा धीरास्तेषामात्यन्तिकः कुतः ॥
यैस्तु सत्सङ्गपाषाणशितेन[5] स महातरुः ।
छिन्नो विद्याकुठारेण ते गतास्तेन वर्त्मना ॥
प्राप्य ब्रह्मवनं शीतं नीरजस्कमकण्टकम् ।
प्राप्नुवन्ति परां प्राज्ञाः निर्वृतिं वृत्तिवर्जिताम्[6] ॥

1 ३ ११
2 स्कन्धवान्—ग
3 मठसम्पर्कसेचन —ग मू'मसम्पर्कसेचन —घ
4 शान्तिज्ञान वा भ्रान्तिज्ञान—ग
5 पाषाणशितेन—ग
6 निर्वृतिं वृत्तिवर्जिताम्—ग

अपवर्गपथव्यापी[1] मोक्षमार्गोपरोधकः ।

'विधित्सा' लिप्सा । 'शितं' तीक्ष्णीकृतम् । 'वृत्तिवर्जितां' मनोव्यापाररहिताम् ॥

<u>महाभारते</u>

सुखं मोक्षस्तु लोकेऽस्मिन् तत्तु[2] लोको न बुध्यते ।
प्रमत्तः पुत्रदारेषु धनधान्यसमाकुलः ॥
यज्ञैस्तपोभिर्नियमैर्व्रतैश्च
दिवं समासाद्य पतन्ति केचित् ।
तस्मादुपेयं परमं पवित्रं
शिवं हि मोक्षं परमं वदन्ति[3] ॥

<u>विष्णुपुराणे</u>[4]

अनेकजन्मसाहस्रीं संसारपदवीं व्रजन् ।
मोहश्रमं प्रयातोऽसौ वासनारेणुगुण्ठितः ॥
प्रक्षाल्यते यदा सोऽस्य रेणुर्ज्ञानो[5]ष्णवारिणा ।
तदा संसारपान्थस्य याति मोहश्रमः शमम् ॥
मोहश्रमे शमं याते स्वस्थान्तःकरणः पुमान् ।
अनन्यातिशयाबाधं परं निर्वाणमृच्छति ॥

1 अपवर्गपथव्यापि—ख
2 तत्तु लोको—क
3 वदन्ति—ख
4 ६ १८-२१
5 ज्ञानोष्ण वारिणा—ग

॥ २ ॥

अथ मोक्षस्वरूपम्

तत्र मार्कण्डेयपुराणे[1]

ज्ञानपूर्वो वियोगो योऽज्ञानेन सह योगिनः ।
सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः ॥

[2]'ज्ञानं' मत्र परमं ब्रह्मसाक्षात्काररूपम् । 'अज्ञानेन सह वियोगः' अविद्यानिवृत्तिः । 'योगी',—

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥

इत्यादि [3]विष्णुपुराणादि

प्रतिपादितयोगवान् । 'सा मुक्तिर्ब्रह्मणा चैक्यमि'ति योऽयमज्ञानेनाऽविद्यया सह योगिनो वियोगस्तस्मिन् सति या जीवस्य ब्रह्मस्वरूपेण[4] विभूतिरतिशयानन्दाद्यभिव्यक्ति रिति यावत्, स एष मुक्तिशब्दार्थः । प्राकृतैश्च गुणैर्यदनैक्य मात्यन्तिको वियोगः सोऽपि सैव नार्थान्तरमित्यर्थः ।

1 ३९. १
2 ज्ञानम् अत्र परमं ब्रह्मसाक्षात्काररूपम् —म
3 ६. ७. ३१
4 स्वरूपेणाविर्भूति —म

तदुक्तं <u>ब्रह्मपुराणे</u>

अज्ञानमन्धमेवस्तु मोक्षो ब्रह्मलयस्त्विति ।

प्राकृता गुणाः <u>भगवद्गीतासू</u>क्ताः । तथा—

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ इति ।

<u>विष्णुपुराणे</u>[1]

तद्भावभावनापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥
विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ।
[2]आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

'तद्भावभावना' ब्रह्माऽहमस्मीत्यात्मचिन्तनम् ।

<u>पद्मे</u>

ब्रह्माऽऽत्मव्यतिरेकेण द्वितीयं येन पश्यति ।
ब्रह्मीभूतः स एवेति <u>पक्ष</u>पक्ष उदाहृतः ॥

श्रूयते च <u>छान्दोग्योपनिषदि</u>

परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यत इति ।

अयमर्थः—ब्रह्मसाक्षात्कारज्ञाने उत्पन्ने अज्ञानस्याविद्यापरनामधेयस्य विलयात् [3]तत्कृतभेदप्रत्ययास्तमये सति परं ज्योतिर्ब्रह्मस्वरूपमुपसम्पद्य भूत्वा 'स्वेन रूपेण' स्वाभाविकेन चिदानन्दादिरूपेण 'अभिनिष्पद्यते' अभिव्यक्तो भवतीति । तथा च

1 ६. ९५–९६
2 आत्मनो ब्रह्मणोऽभेदम् —ख and ग
3 तत्कृतभेदप्रत्ययास्तमये सति —ग

<u>वेदान्तसूत्रम्</u>[1]—

"सम्पद्याविर्भावः[2] स्वेन शब्दा"दिति ।

तथा च सांसारिकदुःखजातमभिधाय[3] <u>विष्णुपुराणे</u>[4]

निरस्तातिशयाह्लादसुखभावैकलक्षणा ।

भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥ इति ।

<u>महाभारते</u>

निर्वाणं परमं सौख्यं धर्मोऽसौ पर उच्यते । इति

जीवभावात् 'दुःखान्निवर्तते' इत्यभिधाय

<u>देवलः</u>

स तथा निवृत्तो निर्गुणश्छिन्नबन्धो जन्मजरामरण दुःखविनिर्मुक्तः सुप्तवत् मत्तवत् विषभूमपानवत् सत्त्वादि हीनः [5]तन्मात्रावस्थितः परमसुखमैकान्तिकमधिगच्छतीति <u>सांख्यम्</u> ।

'तथा निवृत्तः' जीवस्यापावकाविद्योपाधिनिलये सति प्रलीभूतः । 'निर्गुणा'दि[पदानां][6] तत्तत्कार्यकारणादिविशेष परत्वेनाऽपौनरुक्त्यम् । जन्मजरामरणदुःख[निर्वृत्तिश्च आ त्यन्तिकी जन्ममरणदुःख][6]योरत्यन्ताभावोऽपवर्ग इति पूर्वमेव <u>देवलेना</u>ऽभिधानात् । सुप्तादिदृष्टान्तेन स्वगतदुःखानुभवाभाव दर्शयति ।

1 ४ ४ १
2 सम्पद्य निर्वृत —ग
3 दु खजातमभिधाय—ग
4 ६ ५ ५९
5 तन्मात्रावस्थित —ग and घ
6 [ ] Supplied by ग and घ

पुनर्देवलः

सायुज्य सालोक्यं प्रकृतिलयो मोक्षश्चेति चतुर्विधं प्रयोजनम्। तेषामैश्वर्यावाप्तियुक्त्या हिरण्यगर्भनारायणशिवमहेन्द्रसोमसूर्यस्कन्दज्येष्ठोमादेवीप्रभृतीनां देवतानां मेकजल्प(?)सायुज्यम् ॥

तत्सालोक्यमभ्युदयविशेषत्वादनुपदिष्टम्। पृथिव्यादिषु भूतेष्वपि देवतत्व तद्भावभावित्वं च प्रकृतिलयो वसुंधराद्भुतपवनवरुणमारुतसरस्वतीनां पृथिव्यगन्धमभ्युदाप्या काष्ठोष्वापपत्वमपि देवतत्व तद्भावभावित्वं च योगविशेषाच भवति। 'अपुनर्भवो मोक्षः'। 'ज्येष्ठा'ऽत्र माहेश्वरी शक्तिः।

महाभारत

यज्ञेन दमानाप्नोति वैराजं तपसा पुनः।
सन्यासाद्ब्रह्मणस्स्थाने वैराग्यात् प्रकृतौ लयम् ॥
ज्ञानात् कैवल्यमाप्नोति पञ्चैता गतयः स्मृताः।

वैराज स्थूलमहाभूतशरीरभोक्तृत्वावच्छिन्नपरमात्मस्वरूपं विराट्। तस्य स्थाने। ब्रह्म सूक्ष्म [1]प्राणेन्द्रियावच्छिन्नः परमात्मैव। 'प्रकृतिः सिसृक्षावच्छिन्नः स एव।

ब्रह्माण्डपुराणे[2]

पुर्यष्टकेन लिङ्गेन प्राणाख्येन स युज्यते।
तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन तु ॥
संसार विनिवृत्ते तु मुक्तो लिङ्गेन मुच्यते।
स चापि त्रिविधः प्रोक्तो मोक्षो वै तत्त्वदर्शिभिः ॥

1 ब्रह्मसूक्ष्मं—म and म
2 ४ I. —৭৭.

पूर्वो वियोगोऽज्ञानेन द्वितीयो रागसंक्षयात् ।
लिङ्गाभावात्तु कैवल्यं कैवल्यात्तु निरञ्जनः ॥

'पुर्यष्टकं' लिङ्गशरीरम् ।

मार्कण्डेयपुराणे[1]

यथा हि कनकात्[2] छिन्नमपद्रव्यवदग्निना ।
दग्धदोषं द्वितीयेन खण्डेनैक्यं व्रजेन्नृप ॥
न विशेषमवाप्नोति तद्वद्योगात्मना गतिः[3] ।
निर्दग्धदोषस्तेनैक्यं प्रयाति ब्रह्मणा सह ॥
यथाऽग्निरग्नौ प्रक्षिप्तः समानत्वमनुव्रजेत् ।
तदाख्यस्तन्मयो भावी न गृह्येत विशेषतः ॥
परेण ब्रह्मणा तद्वत् प्राप्यैक्यं दग्धकल्मषः ।
योगी याति पृथग्भावं न कदाचिन्महीपते ॥
यथा जलं जलेनैक्यं निक्षिप्तमुपगच्छति ।
तथाऽऽत्मा साम्यमभ्येति योगिनः परमात्मनि[4] ॥

'कनकात् खण्डं' पृथग्भूतमिति शेषः । 'साम्य'मेकत्वम् ।

ब्रह्मपुराणे

क्षीरात् समुद्धृतं स्वाम्यं न पुनः क्षीरतां व्रजेत् ।
पृथक्कृतो[5] गुणेभ्यश्च नाऽऽत्मा भूयो गुणी भवेत् ॥

1 ४ १७—४१
2 कनकात् खण्ड—ख and ग
3 यति —ख. and ग
4 परमात्मना—ख.
5 पृथक्त्वात्तुगैस्तत्व—ग

2

क्षीरे क्षीरं जले तोयं पवने पवनो यथा ।
ब्रह्मभावनया योगी याति तन्मयतां तथा ॥
एवं तन्मयतां योगी ब्रह्मभावनया गतः ।
विहाय शोकमोहौ तु सर्वं ब्रह्मैव पश्यति ॥
यथा श्यामतया भाति केवलस्फटिको मणिः ।
पुरुषस्यापि विद्दीप्त्या चैतन्यं भाति केवलम् ॥

<u>महाभारते</u>

यथार्णवगता नद्यो व्यक्तीर्जहति नाम च[1] ।
न च स्वतां नियच्छन्ति तादृशः[2] सत्त्वसंक्षयः ॥
एवं सति कुतः संज्ञा प्रेत्यभावः पुनर्भवेत् ।
प्रतिसंमिश्रिते जीवेऽगृह्यमाणे विशेषतः ॥
परेण परधर्मा च भवत्येष समेत्य वै ।
विमुक्तकर्मा शुद्धेन शुद्धेन च सुबुद्धिमान् ॥
विमलात्मा स[3] भवति समेत्य विमलात्मना ।
यथा क्षमी दुःखसुखे जहाति
मुनेस्तथाकार्यां गतिमेत्यलिङ्गः ।
श्रुतिप्रमाणागममङ्गलैश्च
शेते जरामृत्युभयादतीतः ॥

'न च स्वतां नियच्छन्ति' स्वस्वरूपमुपलक्षणं न लभन्तीत्यर्थः । 'सत्त्वसंक्षयः' जीवस्य सम्यक्क्षयो बन्धविच्छेद इत्यर्थः । 'प्रेत्यभावो' जन्म । 'अलिङ्गः' लिङ्गशरीररहित इत्यर्थः ।

1 व्यक्ति —क
2 तादृश —ग and ख
3 च for स—ग and घ

तथा

संयोज्य तपसाऽऽत्मानमीर्ष्यामुत्सृज्य मोहनीम् ।
त्यक्त्वा कामं च मोहं च ततो ब्रह्मत्वमश्नुते ॥

[1]नरसिंहपुराणे

तपो हि यः सेवति काननस्थो
वने महत्सत्त्वसमाधियुक्तः ।
विमुक्तपापो नियतः प्रशान्त-
स्स याति दिव्यं पुरुषं पुराणम् ॥

1 नरसिंहपुराणे १ १०—म and मा
विमुक्तपापो हि मन प्रशान्तः प्रयाति विष्णोस्सदनं द्विजेन्द्र ।
इति मुद्रितपाठ

क्षीरं क्षीरे जले तोयं पवने पवनो यथा ।
ब्रह्मभावनया योगी याति तन्मयतां तथा ॥
एवं तन्मयतां योगी ब्रह्मभावनया गतः ।
विहाय शोकमोहौ तु सर्वं ब्रह्मैव पश्यति ॥
यथा स्वप्रभया भाति केवलस्फाटिको मणिः ।
पुरुषस्यापि चिद्दीप्त्या चैतन्यं भाति केवलम् ॥

<u>महाभारते</u>

यथार्णवगता नद्यो व्यक्तीर्जहति नाम च[1] ।
न च स्वतां नियच्छन्ति तद्रूपाः[2] सत्त्वसंक्षयः ॥
एवं सति कुतः संज्ञा प्रेत्यभावः पुनर्भवेत् ।
प्रतिसंमिश्रिते जीवेऽगृह्यमाणे विशेषतः ॥
परेण परधर्मा च भवत्येव समेत्य वै ।
विशुद्धधर्मा शुद्धेन बुद्धेन च सुबुद्धिमान् ॥
विमलात्मा स[3] भवति समेत्य विमलात्मना ।
यथा ह्यसौ दुःखसुखे जहाति
मुक्तस्तदाग्र्यां गतिमेत्यलिङ्गः ।
श्रुतिप्रमाणागममङ्गलैश्च
शेते जरामृत्युभयावतीर्णः ॥

'न च स्वतां नियच्छन्ति' स्वस्वरूपमुदकरूपं न त्यजन्तीत्यर्थः। 'सत्त्वसंक्षयः' जीवस्य सम्यगक्षयो न त्वविच्छेद इत्यर्थः। 'प्रेत्यभावो' जन्म। 'अलिङ्गः' लिङ्गशरीररहित इत्यर्थः ।

1 [illegible]
2 [illegible]
3 [illegible]

लिङ्गो वृत्तिविशेषार्थमुत्क्रामेत्। क्रमशो यायावराणां वृत्तिमुपास्य वनमाश्रयेदुत्तरायणपूर्वपक्षे।

मनुः[1]

सन्त्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा[2] ॥
अग्निहोत्रं समादाय गृह्यं[3] वाऽग्निपरिच्छदम्।
ग्रामादरण्यं निष्क्रम्य निवसेन्नियतेन्द्रियः ॥

'सर्वं परिच्छदं' ग्राम्यमित्यर्थः। 'गृह्यं' स्मार्तमग्निम्। 'अग्निपरिच्छदं' स्रुक्स्रुवादिकम्[4] ॥

यमः

यज्ञाङ्गान्यग्निहोत्रं च धेनूं रथपरिच्छदम्।
समादाय सदारो वा तदाऽरण्यं व्रजेद्द्विजः ॥
पुत्रे ज्येष्ठे गुणवति तत्कुटुम्बं निवेद्य च।
दारान्निक्षिप्य वा गच्छेन्निर्ममो विजितेन्द्रियः ॥

याज्ञवल्क्यः[5]

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम्।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥

1 ६ ३–४

2 मेधातिथि — परिच्छदं गवाश्वशयनासनादि। यदि भार्याया इच्छा तदा सहगमनम् अन्यथा एकाकिनः। अन्ये तु पत्नीं निक्षिप्य एकाकी गच्छेदिति वदन्ति। तस्या भार्यासामर्थ्ये सति पुत्रेषु निक्षेपः वनगमनं वा। असमर्थामपि पुत्राणां वनगमने आपस्तम्बादिभिः स्मृतं पुत्रापाये इत्यत्र। कर्माधिकारसम्बन्धो नास्ति स वानप्रस्थः। इतरः पुत्रादीन् परिग्रहीष्यतीति व्यवस्था ॥ (ed Jha, I 497)

3 गृह्यं साग्निपरिच्छदम्—पा

4 अग्निपरिच्छदं स्रुक्स्रुवादि (मेधातिथिः I 497)

5 १, ४५

॥ ३ ॥

अथ वानप्रस्थ्यम्

तत्र <u>महाभारते</u>

आश्रमादाश्रमं गच्छेदित्ययं सूचितो विधिः ।
नित्यं हि मृत्युरागच्छन्न क्रमं संप्रतीक्षते ॥
उत्पाद्य पुत्राननृणांश्च कृत्वा
वृत्तिं च तेभ्योऽनुविधाय किंचित्[1] ।
स्थाने कुमारीः प्रतिपाद्य सर्वा
अरण्यमासाद्य मुनिर्बुभूषेत् ॥

<u>यमः</u>

द्वितीयमायुषो भागमुषित्वा तु गृहे द्विजः ।
तृतीयमायुषो भागं गृहमेधी वने वसेत् ॥
गृहमेधी यदा पश्येद्वलीपलितमात्मनः ।
शिथिलत्वं च गात्राणां तदाऽरण्यं समाश्रयेत् ।
उत्पाद्य धर्मतः पुत्रानिष्ट्वा यज्ञैश्च शक्तितः ॥
दृष्ट्वाऽपत्यस्य चाऽपत्यं ब्राह्मणोऽरण्यमाश्रयेत् ।

<u>शङ्खलिखितौ</u>

पुत्रानुत्पाद्य संस्कृत्य वेदमध्याप्य तेभ्यो वृत्तिं विधाय दारैः संयोज्य गुणवति पुत्रे कुटुम्बमावेश्य कृतप्रस्थान

1 कांचित्—अ and ब

लिङ्गो वृत्तिविशेषार्थमुत्क्रामेत्। क्रमशो यायावराणां वृत्तिमुपास्य वनमाश्रयेदुत्तरायणपूर्वपक्षे।

मनुः[1]

सन्त्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा[2]॥
अग्निहोत्रं समादाय गृह्यं[3] चाग्निपरिच्छदम्।
ग्रामादरण्यं निष्क्रम्य निवसेन्नियतेन्द्रियः॥

'सर्वं परिच्छदं' ग्राम्यमित्यर्थः। 'गृह्य'स्मार्तमग्निम्। 'अग्निपरिच्छदं' स्रुक्स्रुवादिकम्[4]॥

यमः

पञ्चाङ्गान्यग्निहोत्रं च धेनू रथपरिच्छदम्।
समादाय सदारो वा तदाऽरण्यं व्रजेद्द्विजः॥
पुत्रे ज्येष्ठे गुणवति तत्कुटुम्बं निवेद्य च।
दारान्निक्षिप्य वा गच्छेन्निर्ममो विजितेन्द्रियः॥

याज्ञवल्क्यः[5]

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम्।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्॥

1 ६ ३-४

2 मेधातिथि — परिच्छद [illegible] । यदि भार्या इच्छति तदा सहगमनम् अन्यथा [illegible] । [illegible] ॥" (ed Jha, I 497)

3 गृह्यं [illegible]—मा

4 अग्निपरिच्छदं स्रुक्स्रुवादि (मेधातिथिः I 497)

5 ३ ४५

'ब्रह्मचारी' ऊर्ध्वरेताः। 'साग्निः' वैतानाग्निसहितः। 'सौपासनो' गृह्याग्निसहित'[1]।

छागलेयः

पुत्रेषु भार्यां संस्थाप्य वनं गच्छेद्यथाविधि।
अपत्नीकः समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्॥

आपस्तम्बः[2]

अथ वानप्रस्थः। अत एव ब्रह्मचर्यवान् प्रव्रजति तस्योपदिशन्त्येकाग्निरनिकेतस्स्यादशर्माऽशरणो मुनिः स्वाध्याय एवोत्सृजमानो वाचम्। तस्याऽरण्यमाच्छादनं विहितम्। ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेत्। अन्ततः प्रवृत्तानि। ततोऽपो वायुमाकाशमित्यभिनिश्रयेत्। तेषामुत्तर उत्तरस्संयोगः फलतो विशिष्टः। अथ वानप्रस्थस्यैवाऽऽनुपूर्व्यमेक उपदिशन्ति। विद्यां समाप्य दारान् कृत्वा अग्नीनाधाय कर्माण्यारभते सोमावरार्ध्यानि यानि श्रूयन्ते गृहान् कृत्वा सदारः सप्रजः सहाग्निभिः बहिर्ग्रामाद्वसेत्। एको वा शिलोञ्छेन वर्तेत। न चात ऊर्ध्वं प्रतिगृह्णीयात्। अभिषिक्तश्च जुहुयात्। शनैरपोऽभ्युपेयादभिघ्नन्नभिमुख आदित्यमुदकमुपस्पृशेत् इति सर्वत्रोदकस्पर्शनविधिः॥

क्षारलवणमधुमांसानि वर्जयेत्[3]। तस्य द्वन्द्वद्रव्याणामेक उपदिशन्ति पात्रार्थं भोजनार्थं वा असिपरशुदात्रादीनाम्।

1 [illegible]

[illegible]

3 Not found [illegible]

द्वन्द्वानामेकैकमुपादायेतराणि दत्त्वाऽरण्यमवतिष्ठेत। तस्या-
ऽरण्येनैवाग्न उर्ध्वं होम वृत्तिः प्रतीक्षाऽऽच्छादन विहितम्।
येषु कर्मसु पुरोडाशाश्चरवस्ते कार्याः। सर्वं चोपांशु
सह स्वाध्यायेन नाऽरण्यमभ्याश्रावयेत। अग्न्यर्थं शरणम्।
आकाशे स्वयम्। अनुपस्तीर्णे शय्यास्थाने। नवे सस्ये प्राप्ते
पुराणमनुजानीयात्। भूयांस वा नियममभिकाङ्क्षन्नन्वहमेव
पात्रेण साय प्रातरर्थमाहरेत्। ततो मूलैः फलैः पर्णैस्तृणै-
रिति वर्तयंश्चरेदन्ततः प्रवृत्तानि ततोऽपो वायुमाकाशमित्य-
भिनिःश्रयेत। तेषामुत्तर उत्तरः संयोगः फलतो विशिष्टः।

'अत एव' ब्रह्मचर्यात्। एकाग्निः यदा ब्रह्मचारी वान-
प्रस्थो भवति तदा लौकिक एकोऽग्निराहार्य्य। 'अनिकेतः'
गृहरहितः। 'अशर्मा' सुखरहित। 'अशरणः' रक्षकशून्यः।
'मुनि' मौनी। 'अन्ततः प्रवृत्तानि' आरण्यैर्नीवारादिभिः
कियन्तमपि काल नीत्वा ततो मूलादिभिस्तृणपर्यन्तैः कालं
यापयेत्। 'अन्ततः' तान्येव मूलादीनि हिंसां विना
वातादिना पतितान्यादाय वर्तयंश्चरेत्। 'अभिनिःश्रयेत्'
भवेत्। 'सोमावराद्ध्यानि' सोमयागात् प्राचीनानि दर्श-
पूर्णमासादीनि। 'अभिषिञ्च' स्नात। 'अभिघ्नन्' जल-
प्राण्यपसारणाय उदकं पाणिना ताडयन्। 'तस्य द्वन्द्व द्रव्या-
णामिति'। अस्य वानप्रस्थस्य विहितद्रव्याणां वास्त्रादीना
युगलमुपादेयमित्युपदिशन्ति। 'आरण्येन' फलादिद्रव्येण

अस्माद्यम् (ब्रह्मका p १४०) आरम्भणं इतिमन्यन्तमिति पुस्तके। निर्वापसिन्धी
धारणम् वर्णते —

निम्मुक्तात्ते धैर्य्यं मस्यै गोधूमयोर्वा।
धान्यं दैवधान्यञ्च शमीधान्यं तथाऽपरम्॥
सिन्धधान्यं तथा धान्यमूर्णं सारमपरम्॥

इति शेषः । 'प्रतीक्षा' आतिथ्य । 'सर्वं चोपांशुकर्मकाण्ड' सर्वमुपांशु कर्म कर्तव्यम् । 'नाऽऽरण्यमभ्याश्रावयेदिति' नाभ्यधिकं मन्त्रादिभिः स्वरैः शरण्य हविराश्रावयेत् । मन्त्रोऽपि मध्यमाभ्यामेव । 'अग्न्यर्थं शरणं' गृह कुर्यात । आत्मार्थं शय्यासने कुर्यादिति शेषः । 'पुराणमनुजानीयात्' पुरातनमन्नं ब्राह्मणेभ्यो दद्यादिति शेषः । 'अन्वहमेव पात्रणे 'त्यभ्यस्तमनुवृत्तिरुच्यते ॥

॥ ४ ॥

अथ वानप्रस्थधर्माः

तत्र मनुः[1]

मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ।
एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥
वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा ।
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥
यद्भक्ष्यः स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः ।
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतम् ॥
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ।
दर्शमस्कन्दयन् पर्व पौर्णमासं च योगतः ॥
[2]नक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाऽऽहरेत् ।
उत्तरायणं च क्रमशो दाक्षस्याऽयनमेव च ॥
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव निर्वपेत्तु पृथक्पृथक्[3] ॥

1 ६. ५—११
2 नक्षेष्ट्याग्रयणं इति [illegible]
3 विधिवन्निर्वपेत् पृथक् इति [illegible]

देवताभ्यश्च तद्हुत्वा[1] वन्यं मेध्यतरं हविः ।
[2]शेषं समुपभुंजीत लवणं च स्वयंकृतम् ॥
स्थलजौदकशाकानि पुष्पमूलफलानि च ।
मेध्यवृक्षोद्भवान्यन्यान् [3]स्नेहांश्च फलसंभवान् ॥
वर्जयेन्मधुमांसानि भौमानि कवकानि च ।
भूस्तृणं शिग्रुकं[4] चैव श्लेष्मातकफलानि च ॥
न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ।
न यातयामान्यासौऽपि [5]पुष्पाणि च फलानि च ॥

'यज्ञेषु यो' यज्ञमेष्ट्यो "अग्निवा अकामयते" त्यादि तैत्तिरीयब्राह्मणोक्ताः । 'उत्तरायण' "संवत्सरं वसन् विभाय इष्टी "रित्यापस्तम्बसूत्रोक्तम् । 'यज्ञस्यायनं 'दाक्षायणयज्ञः । 'भौम'मत्र वने चराणां गोजिह्विकेति प्रसिद्धम् । 'कव कानां' द्विजत्वेन निषेधे प्राप्ते पुनर्निषेधो भूस्तृणादीनामपि भक्षणे तत्सममापद्विरतार्थः ।

यमः

अकृष्टोत्थं मूलफलं व्रीहीन् संभृत्य चाऽपरान् ।
हविष्यार्थं प्रयच्छेत्तु महासत्रेषु पञ्चसु ॥
यस्यै यस्यै यथा यद्वै देवतायै हविर्द्विजः ।
तस्यै तस्यै तथा सम्यक् हविष्यं कल्पयेत पृथक् ॥
श्रावणेन विधानेन सार्थं मातरुपस्पृशेत् ।
वेणुदशामाकनीवारास्तन्दुलोपणवेणुकाः ॥

फलानामुपभुञ्जीत पक्वमासं च वर्जयेत् ।
मूलं पुष्पं फलं पत्रं द्विधा स्थलजतोयजम् ॥
भक्षयेत् स्वयमाहृत्य कृष्टं च परिवर्जयेत् ।
यतः पत्रमुपादद्यान्न तत्पुष्पमुपाहरेत्[1] ॥
यतः पुष्पमुपादद्यान्न ततः फलमाहरेत् ।
यतश्च फलमादद्यान्न ततः काष्ठमाहरेत् ॥
यस्य छायामुपासीत न ततः किंचिदाहरेत् ।
न दुःखेद्यशमशर्म हिमातपसहो भवेत् ॥
शोषयंश्चात्मनो देहं तपसा सिद्धिमाप्नुयात् ।
न भक्तं किंचिदश्नीयादुदकं तृषितः पिबेत् ॥
सर्वभूतेषु नियतः संवसेत् सततं द्विज ।

छागलेयः

शाकमूलफलाहारो जर्तिलापुष्पमेव च ।
नीवारो मांसमथवा आहारो वन्य एव च ॥
वर्षासु फलधान्यानि उत्सृज्य नवसंग्रहम्[2] ।
[3]सवर्णं च स्वयं कुर्यान्मधुमांसविवर्जितः ॥
अध्यात्मपरसन्तुष्टो जितक्रोधो जितेन्द्रियः ।
रात्रौ ध्यानपरो नित्यं निद्रालस्यं विवर्जयेत् ॥

अत्र मांसं व्याघ्रादिघातोपजातं भक्ष्यं मेतरदित्युक्तम् ।

याज्ञवल्क्यः[4]

दान्तः त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् ।
स्वाध्यायवान् दानशीलः सर्वसत्त्वहिते रतः ॥

1 ग om. this line
2 नवसंग्रहम्—ख. and ग.
3 सवर्णं न स्वयं कुर्यात्—ग and घ
4 ३ ४

बृहस्पतिः[1]

वसीत चर्म चीरं वा छत्रोपानद्विवर्जितः ।

सुमन्तुः

अग्निकार्यसमीपेक्षो भूमिशाय्या जटाजिनम् ।
वन्याशं वनवासश्च वानप्रस्थस्य कीर्तितम् ॥

वसिष्ठः[2]

[3]श्रावणकेनाग्निमुपसमाधायाऽऽहिताग्नि [ः स्यात्] । वृक्षमूलिक ऊर्ध्वं षड्भ्यो मासेभ्योऽनग्निरनिकेतनः । दद्या-देवपितृमनुष्येभ्यः स गच्छेत् स्वर्गमानन्त्यम् ॥

'श्रावणकेन' वैखानसं शास्त्रं श्रावणकमिति भर्तृयज्ञः। तदुक्तविधिनेत्यर्थः ॥

[4]आरण्यः सर्वभूतानां संविभागरुचिः अमत्सरी परीवादपैशुन्यमृषावादवर्जितः । शुचिर्ग्रामं न प्रविशेत् । अरण्यनिलयः पश्वर्थे पुरोडाशांश्चरुं वा निर्वपेत् । [5]पर्वभागेषु देवान् यथाभागैर्योजयेत् । एकाग्निपरायणः । परैरस्पृष्टान्या-श्रमान्तरितानि नाऽभ्यवहरेत् । परिपूतां प्रोक्षितां भूमिमाक्रामेत । संस्कृतानि मन्त्रैरधिश्रयेत् ॥

बौधायनः[1]

वनप्रतिष्ठस्सन्तुष्टः चर्मचीराजिनप्रियः[2] ।
देवविप्राग्निकार्येषु युक्तस्तपसि तापसः ॥
कृच्छ्रां वृत्तिमसहार्यां सामान्यां मृगपक्षिभिः ।
[3]तदहर्जातसभावां कषायकटुकाश्रयाम् ॥
परिगृह्य शुभां वृत्तिमेतां दुर्जनवर्जिताम् ।
वनवासमुपाश्रित्य ब्राह्मणो नावसीदति ॥
मृगैः सह परिस्पन्द संवासस्तेष तैः सह[4] ।
[5]तैनैव सदृशी वृत्तिः प्रत्यक्षं स्वर्गलक्षणम् ॥

गौतमः

न फालकृष्टमधितिष्ठेत् ग्रामं च न प्रविशेत्[6] ।

देवलः

सर्वप्राणिष्वनुक्रोशो हृदयतुष्टिरपापचिन्तनं सर्वोप मोगवर्जनम् । भूमिशिलातृणसिकताशर्कराणामन्यतमाधि शयनं सदा सत्ययोगो धर्ममार्जयमनर्दनं चेति ॥

'अनुक्रोशो' दया ।

पैठीनसिः

वानप्रस्थोऽरण्यमभिगम्य प्राग्नीमिष्टिं कृत्वा अग्निभूम इत्युपस्थाय वन्येन जीवेतीयारहृदयदरणाव मभ्यो तिपिपि

1 ३ ३ १ -२१
2 जन्प्रिय इति मुद्रितबौधायने
3 तदहर्जननिर्जन्याम् इति मुद्रितबौधायनीये (पृ १)
4 तैरवसन्नियेन च इति मुद्रितबौधायने (पृ)
5 नैव इति ... मुद्रित बौधायने च
6 ३ ३ -११

गृहेषु तामितर्पणं कुर्वन्स्वकं दिवाद्वरात्रत्रिचतुर्थप्रभृतीनि कृत्वा स्नातो भूमः कृशः कशी धमनिसन्ततश्च मृगचर्यया वा चरन् क्षपयेदिन्द्रियग्रामम्। यायावरीं वा वृत्तिमुपासीत ॥

'ब्राह्मी' प्रभवेदवस्था। 'नक्तं दिवेत्यादि'नैतेषु कालेषु भोजनविकल्प'। शक्त्यपेक्षयोच्यत इति बौधायन'[1] ॥

अथ वानप्रस्थस्य द्वैविध्यम्। पचमानकाश्चाऽपचमानकाश्च। तत्र पचमानकाः पञ्चविधाः सर्वारण्यकवैतुषिककन्दमूलभक्षाः, फलभक्षाः, शाकभक्षा इति। तत्र सर्वारण्यका नाम द्विविधाः, विविधमारण्यमाश्रयन्त, इन्द्रावसिक्ता रेतोवसिक्ताश्चेति। तत्रेन्द्रावसिक्ता नाम वल्लिगुल्मलतावृक्षाणामानयित्वा सायंप्रातरग्निहोत्रं हुत्वा यत्यतिथिप्रभृतिभ्यश्च दत्वा अथेतरच्छेषभक्षाः। कन्दमूलफलशाकभक्षाणामप्येवमेव पञ्चैव—अपचमानका उन्मज्जकाः, प्रवृत्ताशिनो मुखेनादायिनस्तोयाहारा वायुभक्षाश्चेति। तत्रोन्मज्जका नाम लोहाश्मकरणवर्जं हस्तेनाऽऽदायिनः प्रवृत्ताशिनः। मुखेनाऽऽदायिनो मुखेनाऽऽदत्ते। तोयाहाराः केवलतोयाहाराः। वायुभक्षा निराहाराश्चेति। वैखानसानां विहिता दशौ ता दीक्षाः। श्रपाण्यविधिमभ्युपेत्य दण्डश्च मौनं छिन्नश्चाऽऽश्रमाचः। वैखानसाः सिध्यन्ति निराहाराश्चेति शास्त्रपरिग्रहः सर्वेषां ब्रह्मवैखानसानाम् ॥

हारीतः

श्रेतौ श्रावणकं पाणिमाधाय वल्कलशाणचर्मचीरकुशमुञ्ज[2]फलकवासा वानप्रस्थोक्तेन विधिना। वानप्रस्थो

1 ३। ३। १—७; —१
2 [illegible]—म. and ग

द्विविधो भवति—श्रानुज्ञायिकोऽनुपस्थायिकश्चेति। स्वानुज्ञायिकश्चतुर्विधः—एकवृत्तिः संप्रक्षालक आत्मवृत्तिरहिंसकश्च।

एकवृत्तिर्दीक्षितो गुरुणाऽनुज्ञातो दिशमुपनिष्क्रम्य निष्काम्यलवणमधुरकटुकषायादीनां या मूलफलानां यत् प्रथमं पश्येत् तेन षण्मासान् यापयेत्। समाप्ते पुनर्ग्रहणम्। कन्दमूलफलवेणुश्यामाकनीवाराणां मासपर्याप्तमाहृत्य तद्धरेणोपयुनक्ति सर्संप्रक्षालोदन्तोलूखलिकमृगोपचारी (?) प्रभृतय आत्मवृत्तयो भवन्ति। शीर्णपर्णशैवालगोमयाद्यहिंसकोऽनुपस्थायिकश्चतुर्विधोऽर्द्धमासभक्षी चातुर्मास्यपाषमास्यसांवत्सरादित्येकः। एताभिर्वृत्तिभिराहृत्य देवपितृमनुष्यार्थान् कुर्वीत शेषं प्राश्नीयात्। 'श्रावणक चाऽग्नि' मिति पत्नीरहितत्वेन त्रेताग्न्यभावे बोद्धव्यम्। वैखानस प्रोक्तेन श्रावणकमग्निमाधायेत्यन्वयः।

मनुः[1]

त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसञ्चितम्।
जीर्णानि चैव वासांसि शाकमूलफलानि च॥

गौतमः

[2]नातिसंवत्सरं भुञ्जीत।

विष्णु

[3]संवत्सरनिचयी पूर्वनिचयानाश्वयुज्यां जह्यात्।

1 ६ १५
2 ३ ३
3 ९४ १२

मनुः

[1]अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा ।
अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा ॥
नक्तं चाऽन्नं समश्नीयात् दिवा चाऽऽहृत्य शक्तितः ।
चतुर्थकालिको वा स्यात्स्याद्वा चाष्टमकालतः ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत् ।
पक्षान्तयोर्वाऽप्यश्नीयात् यवागूं क्वथितां सकृत् ॥
पुष्पमूलफलैर्वाऽपि केवलैर्वर्तयेत्सदा ।
सद्यः प्रक्षालको वा स्यान्माससञ्चयिकोऽपि वा ॥
षण्माससञ्चयो वा स्यात्समानिचय एव वा ।
स्वाभाविकैः स्वयं शीर्णैः वैखानसमते स्थितः ॥
भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः ॥
ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः ॥
उपस्पृशेत् त्रिषवणं पितॄन् देवांश्च तर्पयेत् ।
तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ॥

शुक्ले कृष्णे 'पक्षे इति शेषः । 'प्रपदैः' पादाग्रैः ।

यमः

एकपादेन तिष्ठन्तः केचित्सूर्यमरीचिपाः ।
पञ्चाग्निधूमपाः केचित् केचिद्दुग्धविभिन्नाः ॥
पञ्चाग्निरता केचित् केचिद्द्वादशकालिकाः ।
पक्षोपवासिनः केचित्केचिन्मासोपवासिनः ॥

[1] ६ १९—२४

ऊष्मपाः सोमपाः केचिद् वायुभक्षास्तथापरे ।
शुक्लपक्षे पिबन्त्येके यवागूं कथितां सकृत् ॥
कृष्णपक्षे पिबन्त्यन्ये भुक्तेऽन्ये[1] यथागतम् ।
पयः पिबन्ति शुक्लेऽन्ये कृष्णपक्षे च गोशकृत् ॥
एताश्चान्याश्च विविधा दीक्षास्तेषां महात्मनाम् ।
चतुर्थश्चौपनिषदो धर्मः साधारणः स्मृतः ॥

वायुपुराणे

वानप्रस्थाश्रमेऽप्येताश्चतस्रो वृत्तयः स्मृताः ।
सद्यः प्रक्षालकाः केचित् केचिन्मासिकसञ्चयाः ॥
वार्षिकसञ्चयाः केचित् केचिद्द्वादशवार्षिकाः ।
कुर्वन्त्यतिथिपूजार्थं यज्ञतन्त्रार्थमेव च ॥

श्रीरामायणे[2]

वैखानसा वालखिल्याः पृश्नयोऽथ मरीचिपाः ॥
मुनयः सलिलाहारा वायुभक्षास्तथैव च ।
अश्मकुट्टाश्च दातपाः[3](?) पत्राहाराश्च तापसाः ॥
दन्तोलूखलिनश्चैव दण्डकारण्यवासिनः ।
तापसो हि महाभागा ज्वलनार्कसमप्रभाः ॥
आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ।
तथोपरसना दान्तास्तथैवाऽवस्त्रधारिणः ॥
सजपाश्च महात्मानस्तथा पञ्चतपा द्विजाः ।
चातुर्मास्यकृताहारा निराहारास्तथैव च ॥
वृक्षमस्ताग्रपादाश्च ये चरन्ति महत्तपः ।
अदर्शनेन ये धर्मं चरन्ति नियतव्रताः ॥

1 भुक्तमन्ये —ख and ग.
2 Name omitted in Udaipur MS. आरण्यकाण्ड ६. १ et seq.
3 बहव इति मुद्रित रामायणेषु
4

एकाङ्गुष्ठेन तिष्ठन्ति ये च भूताभिर्हिंसका ।
[1]सस्यभक्षाः पयोभक्षा निर्विष्टफलभोगिनः ॥
फलाहारे च निरता वायुभक्षास्तथाऽपरे ।
एते चाऽन्ये च धर्मज्ञा मुनयो धर्मवत्सलाः ॥
शरभङ्गाश्रमे राममभिजग्मुः समागताः ।

याज्ञवल्क्यः[2]

श्रौतस्मार्त्तं फलस्नेहैः कर्म कुर्यात् क्रियास्तथा ।

[3]तथा

यः कण्टकैर्वितुदति चन्दनैश्च विलिम्पति ।
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च ॥

शङ्खलिखितौ

कृष्णाजिनोत्तरीयः ।

विष्णुपुराणे

[4]चर्मकाशकुशैः कुर्यात् परिधानोत्तरीयके ।
यन्यस्मीन गात्राणामभ्यङ्गश्चाऽस्य शस्यते ॥

हारीतः

स्थाण्वेकपादैकपार्श्वोत्पादाग्रग्रीष्मतपनवर्षावकाशा
भिमजलशयनकुशासनस्थण्डिलशाकरोढमश्मसुमलकीलक
शय्यामभूमिभिरात्मानं क्षपयत् ।

1 पुनभक्षा—[illegible]
2 १ [illegible]
3 १ १
4 १ १ १ and ११

अथात्रोदाहरन्ति

रक्तमांसमयो देहः शुक्रयोनिसमुद्भवः ।
न चानेनैव शक्या वै लोकाः प्राप्तुं कथं चन ॥
धनभोगपरित्यागाद्रागलोभविवर्जनात् ।
वैराग्यज्ञान[1]विज्ञानात्तपसा सिद्धिमाप्नुयात् ॥
कामक्रोधपरित्यागात् स्नेहसङ्गविवर्जनात् ।
संयमादिन्द्रियाणां च तपसा सिद्धिमाप्नुयात् ॥
शौचस्नानादिभिर्मन्त्रैर्जपहोमादिभिस्तथा ।
तपसा सर्वमाप्नोति दिव्यं देहमनुत्तमम् ॥
तपो दानं तपो यज्ञस्तपः सिद्धिं समश्नुते ।
नाऽशक्यं तपसः किञ्चित् तस्माच्छ्रेष्ठतमं तपः ॥
नानापुष्पसमृद्धेषु वनेषु मधुगन्धिषु ।
देवारण्येषु पुण्येषु वानप्रस्थस्तपश्चरेत् ॥
प्राप्यते तपसा लोकः शोध्यते तपसाऽशुभम् ।
तपसा सर्वमाप्नोति यत्किञ्चिन्मनसेच्छति[2] ॥
ध्यानसन्निधानज्ञस्तत्त्वात्मा तु व्यवस्थितः[3] ।
सूक्ष्मात् सूक्ष्ममवाप्नोति परं ब्रह्म यदव्ययम् ॥

'स्थाण्वादिनोर्ध्वबाहु'रित्यन्तेनाऽभ्यासप्रकाराः कथिताः । 'ग्रीष्मतपन' ग्रीष्मकालेऽग्निसेवा ।

<u>शङ्खः</u>

कृच्छ्रैर्वाऽपि नयेत् कालं ब्रह्मचर्यं च पालयेत् ।
एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ॥

1 Lacuna in Udaipur M Supplied from ग and घ
2 मनसेच्छसि —ग and घ
3 ब्रह्मव्यवस्थित —ग and घ

नाऽग्निशुश्रूषया क्षान्त्या स्नानेन विविधेन च ।
वानप्रस्थो दिवं याति याति भोजनवर्जनात् ॥

[1]मनुः

अग्नीनात्मनि वैतानान्समारोप्य यथाविधि ।
अनग्निरनिकेतस्स्यान्मुनिर्मूलफलाशनः ॥
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥
ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान् वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥
एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् ।
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥
ऋषिभिः ब्राह्मणैश्चैव गृहस्थैरेव सेविताः ।
विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥
अपराजितां वाऽऽस्थाय व्रजेद्दिशमजिह्मगः ।
आनिपाताच्छरीरस्य मुक्तो[2] वार्यनिलाशनः ॥
आसां महर्षिचर्याणां त्यक्त्वाऽन्यतमया तनुम् ।
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥

'अपराजिता' ऐशानी । 'अजिह्मगः' ऋजुगामी ।

1 ६. २५–३२.
2 युक्त इति मुद्रितमानवे

यमः

वने तपसि युक्तानां महर्षीणां महात्मनाम् ।
उदीच्या दिशि दृश्यन्ते विमानानि तपस्विनाम् ॥
स्वर्गताश्च तथैवाऽन्ये क्षत्रिया वनवासिनः ।
पर्णैश्च शाकैर्जलभोजनैश्च
मूलैश्च कन्दैः फलवायुपुष्पैः ।
एतैश्च युक्ता उपयुज्यमानैः
प्रजेद्द्विजः स्वर्गमितो वनस्थः ॥

इति कृत्यकल्पतरौ वानप्रस्थाश्रमधर्मः ॥

॥ ५ ॥

अथ यत्याश्रमः

तत्र मनुः[1]

> वनेषु तु विहृत्यैवं तृतीयं भागमायुषः ।
> चतुर्थमायुषो भागं त्यक्त्वा संगान् परिव्रजेत् ॥
> आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।
> भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्द्धते ॥
> ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
> अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥
> अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।
> इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत् ॥
> अनधीत्य द्विजो वेदमनुत्पाद्य तथाऽऽत्मजान् ।
> अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

'विहृत्य' अटित्वा, यथोक्तविधिमनुष्ठायेति यावत् । 'परिव्रजेत्' संन्यासविधिना क्षपयत् । 'भिक्षाबलिपरिश्रान्तः' भिक्षाबलिदानेनाऽऽयासितः । 'मोक्षे निवेशयेत्,' मोक्षशब्देन प्राधान्यात् संन्यासाश्रमो लक्ष्यते ।

1 ६।३३-७

शङ्खलिखितौ

वनवासादूर्द्ध्वं शान्तस्य परिणतवयसः कामत परिव्रज्य तमेवाग्निं आत्मन्यारोप्य[1] अपगतभयलोभमोहक्रोधशोकद्रोहमदमत्सरः कालं नाऽनुचिन्तयेत्। अनवस्थितत्वान्मनसः श्रद्धा ह्यनियता भवति। तस्माच्छ्वःश्व उपासीत। तदहरेव सन्न्यसेत् सर्वारम्भपरिग्रहानुत्सृज्य।

महाभारते

काषाय पाचयित्वा तु श्रेणिस्थानेषु तु त्रिषु।
प्रव्रजेच्च परं स्थानं परिव्रज्यामनुत्तमाम्॥

'श्रेणिस्थानेषु च त्रिषु,' 'ब्रह्मचर्याद्याश्रमेषु।

[2]याज्ञवल्क्यः—

वनाद्गृहाद्वा कृत्वेष्टिं सर्ववेदसदक्षिणाम्।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चाऽऽत्मनि॥
अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान्।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नाऽन्यथा॥

[3]वसिष्ठः

परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा प्रतिष्ठेत।

अथाऽप्युदाहरन्ति।

अभयं सर्वभूतेभ्यो दत्त्वा चरति यो मुनिः।
तस्याऽपि सर्वभूतेभ्यो न भयं जातु विद्यते॥

1 Lacuna supplied by ग and ख
2 १ ५६—५७
3 १ १—१ इत्यादि मतिपुस्तक च इति मुद्रितपाठिके

अभयं सर्वभूतेभ्यो यस्तु दत्वा निवर्तते ।
हन्ति जातानजातांश्च प्रतिगृह्णाति यस्य सः ॥

'निवर्तते' प्रच्यवते पारिव्राज्यादिति शेषः ।

[1]मनुः

अगारादिति निष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥

'पवित्रोपचितः' पवित्रैर्मन्त्रजपैर्युक्तः । 'समुपोढेषु' उपसंहृतेषु ॥

छागलेयः

रागादिविषयासङ्गः पुण्यपापशुभाशुभम् ।
लोकयात्राभयं चैव त्यक्तं संन्यास उच्यते ॥

नरसिंहपुराणे[2]

वेदमपारसुगमक्षेर्यं सम्पन्नं येन दुस्तरम् ।
वैराग्यज्ञानपूर्वं वै लोकेऽस्मिन्नास्ति तत्समः ॥
यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं गिरः ।
संन्यसेदकृतोद्वाहो ब्राह्मणो ब्रह्मचर्यवान् ॥

महाभारते

चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ ।
हंसः परमहंसश्च यो यः पश्चात् स उत्तमः[3] ॥

1 ६ १
2 ५८ १६—१७
3 सत्तम — स and न

॥ ६ ॥

अथ सन्यासविधि

तत्र <u>बौधायनः</u>[1]

अथातः सन्यासविधिं व्याख्यास्यामः ।

सोऽत एव ब्रह्मचर्यवान् प्रव्रजतीत्येकेषाम् । अथ शालीनयायावराणामनपत्यानाम् । विधुरो वा । प्रजां स्वधर्मे प्रतिष्ठाप्य वा सप्तत्या ऊर्ध्वं सन्यासमुपदिशन्ति । वानप्रस्थस्य वा कर्मविरामे ।

[2]एष 'नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् । तस्यैवाऽऽत्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन' ॥ इति

अपुनर्भवं नयतीति नित्य । महत्त्वेन गमयतीति महिमा । केशश्मश्रुलोमनखानि वापयित्वोपकल्पयते । यष्टयः शिक्यं जलपवित्रं कमण्डलुं पात्रमिति । एतत् समादाय ग्रामान्ते ग्रामसीमान्तेऽग्न्यागारं वाऽऽज्यं पयो दधीति त्रिवृत् प्राश्योपवसेदपो वा ।

1 २ १७ १–१७ १९–११ ११–४ ; १ १८ १
2 तै आ १ १२ ९ ७
5

ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम्। ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् [इति। पच्छोऽर्धर्चशः][1] ततः समस्तयाऽप्यस्तया वाऽऽत्मानमात्मना आश्रमादाश्रम मुपनीय ब्रह्मपूतो भवति इति विज्ञायते।

अथाप्युदाहरन्ति॥

आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः।
भिक्षाबलिपरिश्रान्तः पश्चाद्भवति भिक्षुकः॥ इति

स एष भिक्षुरानन्त्याय। पुराऽऽदित्यस्याऽस्तमयाद्गार्हप त्यमुपसमाधायाऽन्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीय मुद्धृत्य [अन्वयोपसमाधाय] [2]गार्हपत्ये आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा [3]समिद्वत्याऽऽहवनीये पूर्णाहुतिं जुहोति [ओं] स्वाहेति। ब्रह्मान्वाधानमिति विज्ञायते।

अथ सायं हुतेऽग्निहोत्र उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वन्द्वं न्यञ्चि पात्राणि सादयित्वा दक्षिणेना-ऽऽहवनीयं ब्रह्मायतने दर्भान् संस्तीर्य तेषु कृष्णाजिनं चा न्तर्धाय तां रात्रिं जागर्ति। य एवं विद्वान् ब्रह्मरात्रिमुपोष्य ब्राह्मणोऽग्नीन् समारोप्य प्रमीयते स सर्वं पाप्मानं तरति तरति ब्रह्महत्याम्।

1 Lacuna supplied by [illegible] and [illegible]

2 [ ] not in printed [illegible] p. 204

3 [illegible]

अथ ब्राह्मे मुहूर्ते उत्थाय काल एव प्रातरग्निहोत्रं जुहोति। अथ पृष्ठ्यां स्तीर्त्वाऽपः प्रणीय वैश्वानरं द्वादशकपालं निर्वपति सा प्रसिद्धेष्टिः सन्तिष्ठते।

आहवनीयेऽग्निहोत्रद्रव्याणि प्रक्षिप्याऽमृण्मयान्यनाय सानि। [1]गार्हपत्ये अरणी "भवतं नस्समनसा" विस्रनया। अथाऽऽत्मन्यग्नीन् समारोपयति। [2]"या ते अग्ने यज्ञिया तनूरि"ति त्रिस्त्रिरेकैकं समाजिघ्रति। अथाऽन्तर्वेदि तिष्ठन् ओंभूर्भुवस्स्वः सन्न्यस्तं मया [सन्न्यस्तं मया सन्न्यस्तं मया] इति त्रिरुपांशूक्त्वा त्रिरुच्चैः। त्रिषत्या हि देवा इति विज्ञायते। "अभयं सर्वभूतेभ्यो मत्त"इति चाऽपामञ्जलिं निनयति।

अथाप्युदाहरन्ति—

> अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः।
> न तस्य सर्वभूतेभ्यो भयं चाऽपीह जायते॥ इति

स वाचंयमोऽभिव्रजति[3]।

यष्टिं शिक्यं जलपवित्रं च कमण्डलुं पात्रमित्येतत् समादाय, यत्राऽऽपस्तत्र गत्वा स्नात्वाऽप आचम्य सुरभि

1 भवतं नस्समनसौ समोकसावरेपसौ। मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः॥ (तै. सं. ४.२.५.१)

2 तस्मिन्नग्नीं भूरुमामभिमृशन् यथा—"या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानम् अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां योनिम् जातवेदो भुव आजायमानस्सक्षय एहि॥ (तै. ब्रा. १.५.   )

3 भवति इति मुद्रितबौधायन (पृ. २७) बौ.ध. २.१०.१८, is omitted by Buhler. It runs thus "सखा मे गोपाय इति दण्डमादत्ते। यदस्य पारे रजस इति शिक्यं गृह्णाति। येन देवा पवित्रेण इति जलपवित्रं गृह्णाति। येन देवा ज्योतिषोर्ध्वा उदायन् इति कमण्डलुं गृह्णाति। सप्तव्याहृतिभिः पात्रं गृह्णाति॥"

मस्याऽब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वाऽन्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वोत्तरीयं वासः पीडयित्वाऽन्यत् प्रयतं वासः परिधाय अथ आचम्य 'ॐ भूर्भुवःस्वरि'ति पवित्रमादाय तर्पयति—

ॐ भूस्तर्पयामि । ॐ भुवस्तर्पयामि । ॐ स्वस्तर्पयामि ॐ[1] भूर्भुवस्स्वर्महर्नम इति देववत् पितृभ्योऽञ्जलिमादाय तर्पयति । "ॐ भूः स्वधा, ॐ भुवः स्वधा, ॐ स्वः स्वधा, ॐ भूर्भुवस्स्वः [2]स्वधा ॐ महः स्वधा, इति । अथोदुत्यं चित्रं इति द्वाभ्यामादित्यमुपतिष्ठते । ॐ मिति ब्रह्म ते ब्रह्म वा एष ज्योतिर्य एष तपत्येष वेदो य एष तपति वेद्यमेवैतद्य एष तर्पयत्येवमेवैष आत्मानं तर्पयति आत्मानं नमस्करोति आत्मा ब्रह्माऽऽत्मा ज्योतिः ।

सावित्रीं सहस्रकृत्व आवर्तयेत् शतकृत्वोऽपरिमितकृत्वो वा । ॐ भूर्भुवस्स्वः इति पात्रमादायाऽपो गृह्णाति । न चाऽत्र ऊर्ध्वमनुसृताभिरपरिस्रुताभिरपरिपूताभिरद्भिराचामेत्[3] । न चाऽत्र ऊर्ध्वं शुक्लं वासो बिभृयात् ।

त्रिषवणी वा । अथेमानि व्रतानि भवन्ति—

अहिंसा सत्यमस्तेयं मैथुनस्य च वर्जनं त्याग इत्येव पञ्चोपव्रतानि भवन्ति—अक्रोधो गुरुशुश्रूषा अप्रमादः शौचं [4]आहारशुद्धिश्चेति ।

1 Printed [illegible] interpolates here instead of ॐ भूर्भुवस्स्वर्महर्नम इति— ॐ महस्तर्पयामि । ॐ जनस्तर्पयामि । ॐ तपस्तर्पयामि । ॐ सत्यं तर्पयामि इति । 2 नमः for स्वधा in printed बौ. ध. सू. [illegible] ४

3 *Printed* बौ. ध. सू. २. ७. ११ *reads*—अपरिस्रुताभिः अपरिपूताभि र्वा आचामेत्.

4 *Ibid.* आहारशुद्धिश्चेति (बौ. ध. सू. २. १. २)

'सन्यासविधिं' चतुर्थाश्रमेतिकर्तव्यताम्। समस्त गर्भाधानादि संस्कारः। अत एव ब्रह्मचर्यवान् अविप्लुत ब्रह्मचर्य । 'एकेषा' दर्शनमिति शेष'।

'विधुरे'मृतभार्ये पुरुषे सन्यासमुपदिशन्ति इत्य न्वयः। 'कर्मविरामे'कर्मानुष्ठानसामर्थ्योपरमे। 'एष' इति 'येन सूर्यस्तपतीति' श्रुत्या अभिहितस्याऽऽत्मनो व्यपदेशः। ब्राह्मणस्य संबन्धीति शेषः। अनेन ब्राह्मणस्य सन्यासेऽधिकार इति दर्शयति। 'स च नित्य आत्मा' न कर्मणा वर्द्धते 'पुण्येन नो कनीयान्' पापेनेति शेषः। 'तस्यैव' 'परब्रह्मण' आत्मा स्वरूपं 'पदवित्' पद्यते गम्यतेऽनेनेति पदमत्र वेदः 'उप कल्पयत' सम्भवति। 'यष्टय'स्त्रयो वैणवा दण्डाः। 'पात्रं' भिक्षापात्रं। 'त्रिवृदिति'सत्त्वप्रमाज्यादित्रयम्। 'उपचसेत्' पुनर्भोजन न कुर्यात्। 'अपो वे'त्यास्याद्यभावे विकल्पः। पच्छः' पादशः 'अर्द्धर्चशः' अर्द्धर्चेन। समस्तया कृत्स्नया व्यस्तया व्याहृतिरहितया। आत्मानमात्मनेत्यादि। 'ब्रह्म' शब्देन सावित्र्यत्रोच्यते। 'पूतो' विपूतपापो भवत्येवेत्यर्थः॥

पुनराश्रमग्रहणेन सावित्र्यनुप्रवेशादूर्द्ध पुनराश्रमभाव उच्यते। स एव भिक्षुरानन्त्याय कल्पत इति शेषः। 'उपसमा धाय' प्रज्वाल्य। आहृत्य मिश्रयोनिपक्षेऽपि अथ आयतने निधाय समिद्धति(?)। 'प्रादेशमात्रीं'पालाशीं समिधमाधाय उद्धृत्याऽऽहवनीये तृणानि दर्भान् 'पात्राणि यज्ञायुधानि कृष्णाजिनं चाऽन्तधाय' दर्भान्वास्तीर्य 'अकाल एव'अनु दितएव पृष्ठ्यां स्तीर्त्वा गार्हपत्याहवनीययोरन्तरा उत्तपराजि

ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम्। ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् [इति। पच्छोऽर्धर्चशः][1] ततः समस्तया व्यस्तया चाऽऽत्मानमात्मना आश्रमादाश्रममुपनीय ब्रह्मपूतो भवति इति विज्ञायते।

अथाप्युदाहरन्ति॥

आश्रमादाश्रमं गत्वा कृतहोमो जितेन्द्रियः।
भिक्षाबलिपरिश्रान्तः पश्चाद्भवति भिक्षुकः॥ इति

स एष भिक्षुरानन्त्याय। पुराऽऽदित्यस्याऽस्तमयाद्गार्हपत्यमुपसमाधायाऽन्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धृत्य [अन्वाधोपसमाधाय] [2]गार्हपत्ये आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा [3]समिद्वत्याऽऽहवनीये पूर्णाहुतिं जुहोति [ओं] स्वाहेति। ब्रह्मान्वाधानमिति विज्ञायते।

अथ सायं हुतेऽग्निहोत्र उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वन्द्वं न्यञ्चि पात्राणि सादयित्वा दक्षिणेनाऽऽहवनीयं ब्रह्मायतने दर्भान् संस्तीर्य तेषु कृष्णाजिनं चान्तर्धाय तां रात्रिं जागर्ति। य एवं विद्वान् ब्रह्मराग्निमुपोष्य ब्राह्मणोऽग्नीन् समारोप्य प्रमीयते स सर्वं पाप्मानं तरति तरति ब्रह्महत्याम्।

1 Lacuna supplied by [illegible] and [illegible]

2 [ ] not in printed बौधा p 204

3 [illegible] (तै. सं. १ ५, ६, २)

अथ ब्राह्मे मुहूर्त उत्थाय काल एव प्रातरग्निहोत्रं जुहोति । अथ पृष्ठ्यां स्तीर्त्वाऽपः प्रणीय वैश्वानरं द्वादशकपालं निर्वपति सा प्रसिद्धेष्टिः संतिष्ठते ।

आहवनीयेऽग्निहोत्रद्रव्याणि प्रक्षिप्याऽमृण्मयान्यनायसानि । [1]गार्हपत्ये अरणी "भवतं नस्समनसा" इत्यनया । अथाऽऽत्मन्यग्नीन् समारोपयति । [2]"या ते अग्ने यज्ञिया तनूरि"ति त्रिस्त्रिरेकैकं समाजिघ्रति । अथाऽन्तर्वेदि तिष्ठन् ओंभूर्भुवस्स्वः सन्यस्तं मया [सन्यस्तं मया सन्यस्तं मया] इति त्रिरुपांशूक्त्वा त्रिरुच्चैः । त्रिषत्या हि देवा इति विज्ञायते । "अभयं सर्वभूतेभ्यो मत्त"इति चाऽपामञ्जलिं निनयति ।

अथाप्युदाहरन्ति—

अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्वभूतेभ्यो भयं चाऽपीह जायते ॥ इति

स वाचंयमोऽभिव्रजति[3] ।

यष्टिशिक्यं जलपवित्रं च कमण्डलुं पात्रमित्येतत् समादाय, यत्राऽऽपस्तत्र गत्वा स्नात्वाऽप आचम्य सुरभि

1 "भवतं नस्समनसौ समोकसावरेपसौ । मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ (तै सं ४ १ ५, १)

2 तैत्तिरीयाणां पूर्णपाठमिदम् यथा— या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मा-त्मानम् अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि । यज्ञो भूत्वा यज्ञमासीद स्वां योनिम् जातवेदो भुव आजायमानस्सक्षय एहि ॥ (तै ब्रा २ ५, ८ ८)

3 मथनि इति मुद्रितपीतवाक्ये (पृ २ ७) चोना १ १ १२ is omitted by काश्मीर It runs thus "सखा मे गोपाय इति दण्डमादत्ते । यदस्य पारे रजस इति शिक्यं गृह्णाति । येन देवा पवित्रेण इति जलपवित्रं गृह्णाति । येन देवा ज्योतिषोर्ध्वा उदायन् इति कमण्डलुं गृह्णाति । सर्वम्पदार्थमिति पात्रं गृह्णाति ॥"

मत्याऽब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वाऽन्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वोत्तीर्य वास पीडयित्वाऽन्यत् प्रयतं वासः परिधाय अप आचम्य 'ॐ भूर्भुवःस्वरि'ति पवित्रमादाय तर्पयति—

ॐ भूस्तर्पयामि । ॐ भुवस्तर्पयामि । ॐ स्व स्तर्पयामि ॐ[1] भूर्भुवस्स्वर्महर्नम इति देववत् पितृभ्यो ऽञ्जलिमादाय तर्पयति । " ॐ भूः स्वधा, ॐ भुवः स्वधा, ॐ स्वः स्वधा, ॐ भूर्भुवस्स्वः [2]स्वधा ॐ महः स्वधा, इति । अथोदुत्यं चित्रं इति द्वाभ्यामादित्यमुपतिष्ठते । ॐ मिति ब्रह्म ते ब्रह्म वा एष ज्योतिर्य एष तपत्येष वेदो य एष तपति वेद्यमेवैतद्य एष तपत्येवमेवैष आत्मानं तर्पयति आत्मानं नमस्करोति आत्मा ब्रह्माऽऽत्मा ज्योतिः ।

सावित्रीं सहस्रकृत्व आवर्तयेत् शतकृत्वोऽपरिमि कृत्वो वा । ॐ भूर्भुवस्स्वः इति पात्रमादायाऽपो गृह्णाति । न चाऽत्र ऊर्ध्वमनुद्धृताभिरपरिस्रुताभिरपरिपूताभिरद्भिरा-चामेत्[3] । नचाऽत्र ऊर्ध्वं शुक्लं वासो बिभृयात् ।

त्रिषवणी वा । अथेमानि व्रतानि भवन्ति—

अहिंसा सत्यमस्तेयं मैथुनस्य च वर्जनं त्याग इत्येव पञ्चवोपव्रतानि भवन्ति—अक्रोधो गुरुशुश्रूषा अप्रमादः शौचं [4]आहारशुद्धिश्चेति ।

1 Printed ॐ interpolates here instead of ॐ भूर्भुवस्स्वर्महर्नम इति— ॐ भूस्तर्पयामि । ॐ भुवस्तर्पयामि । ॐ स्वस्तर्पयामि । ॐ सर्वं तर्पयामि इति ...
स्वधा for स्वधा printed ...

3 Printed ... १ १९ adds—... ... ... आचमनम्

'सन्यासविधिं' चतुर्थाश्रमेतिकर्तव्यताम्। समस्त गर्भाधानादि संस्कारः। अत एव ब्रह्मचर्यवान् अविप्लुत ब्रह्मचर्यः। 'एकेषां' दर्शनमिति शेषः।

'विधुर'मृतभार्ये पुरुषे सन्यासमुपदिशन्ति इत्य न्वय। 'कर्मविरामे'कर्मानुष्ठानसामर्थ्योपरमे। 'एष' इति 'येन सूर्यस्तपतीति' श्रुत्या अभिहितस्याऽऽत्मनो व्यपदेशः। ब्राह्मणस्य संयन्त्वीति शेषः। अनेन ब्राह्मणस्य सन्यासेऽधिकार इति दर्शयति। 'स च नित्य आत्मा' न कर्मणा वर्द्धते 'पुण्येन नो कनीयात्' पापेनेति शेषः। 'तस्यैव' 'परब्रह्मण' आत्मा स्वरूप 'पदवित्' पद्यते गम्यतेऽनेनेति पदमत्र वेदः 'उप कल्पयते' संभवति। 'यष्टय'स्त्रयो वेणवा दण्डाः। 'पात्रं' भिक्षापात्र। 'त्रिवृदिति'संसृष्टमाज्यादित्रयम्। 'उपवसेत्' पुनर्भोजनं न कुर्यात्। 'अपो वे'त्याज्याद्यभावे विकल्पः। 'पच्छ' पादशः 'अर्द्धर्चशः' अर्द्धर्चेन। समस्तया कृत्स्नया व्यस्तया व्याहृतिरहितया। आत्मानमात्मनेत्यादि। 'ब्रह्म' शब्देन सावित्र्यप्रोच्यते। 'पूतो' विधूतपापो भवत्येवेत्यर्थः॥

पुनराश्रमग्रहणेन सावित्र्यनुप्रवेशात्पूर्वं पुनरावृत्त्यभाव उच्यते। स एष भिक्षुरानन्त्याय कल्पत इति शेषः। 'उपसमा धाय' प्रज्वाल्य। आहृत्य भिक्षयोनिपक्षेऽपि अथ आयतनं निधाय समिदग्नि(?)। 'प्रादेशमात्रीं 'पालाशीं समिधमाधाय उद्धृत्याऽऽहवनीये तृणानि दर्भान 'पात्राणि यज्ञायुधानि कृष्णाजिनं चाऽन्नधाय' दर्भेष्वास्तीर्य 'अक्षत एव'अनु दितएव पृष्ठ्यां स्तीर्त्वागार्हपत्याहवनीययोरन्तरा उत्तरराजि

कृत्वा अमृण्मयाश्ममयानि मृण्मयाश्ममयव्यतिरिक्तानि धीर्षिमयानि (?) गार्हपत्येऽरणी प्रक्षिपति इति शेषः। 'त्रिरुत्वैदेदि'ति अन्तर्वेदीति शेषः। 'सुरभिमत्या' दधिक्राव्ण इत्येतयर्चा। 'अब्लिङ्गा' 'आपोहिष्ठीया। 'वारुणी, 'इम मे वरुण' इत्याद्या' हिरण्यवर्णाः शुचय 'इत्याद्याश्चतस्रः 'पावमान्यः' 'पवमानः सुवर्जनः' इत्यनुवाकः। 'अघमर्षणमि' 'ऋतं च[1] सत्यं चेति' सूक्तम्। 'पवित्रं 'जलपवित्रम्। 'देव सवितरिति' प्राचीनावीतित्वप्रतिषेधार्थम्। 'ओमिति ब्रह्मेत्यादि' 'आत्मास्पोसिरित्यन्तं सूक्तम्' ॐकार इति।

आदित्योपस्थानानन्तरं सावित्रीं सहस्रकृत्व आवर्तयेत्। ॐ भूर्भुवस्स्वरित्यादेः। यदा यदा यो गृह्णातीति तदा सप्रणवाभिर्व्याहृतिभिरेवमादायाऽपो गृह्णीयादिति शेषः। 'अपरिस्रुताभिः' जलपवित्रेणाभिस्रुताभिः। 'अपरिपूताभिः, निर्धिसनादिना अनिरस्तापद्रव्याभिः। 'एकपर्णी-त्रिपर्णी चेति' केचित् पठन्ति। "सोऽपपाठः, अपस्तात् दण्डप्रयोपकल्पनस्योक्तत्वा"दिति बोधायनभाष्यकारः[2]। 'त्यागः' सगस्यति शेषः।

1 Folio 6 of Nagpur M ends here fol 7 and 8 of it are lost

2 [illegible] (पृ १ [illegible] मनुभगम्)—"एकपर्णी त्रिपर्णी च इति पाठ [illegible]। [illegible] एकपर्णी इति पाठ [illegible]। [illegible]। See [illegible] p 949 and [illegible] p 336, both confirm [illegible] statement. [illegible] (पृ २ १) accepts the reading एकपर्णी त्रिपर्णी च — [illegible] (XII 10, 11) and Yajñavalkya (III, 57) prescribe only the tridaṇḍa to the Saṃnyāsin. मनुस्मृति १२ १ and 10, 8—(पत्रार्थे)

<u>नरसिंहपुराणे</u>

[1]एवं वनाश्रमे तिष्ठंस्तपसा दग्धकिल्बिषः ।
चतुर्थमाश्रमं गच्छेत् सन्न्यासविधिना द्विजः ॥
दिव्यपितृभ्यो देवेभ्यः स्वपितृभ्यश्च यत्नतः ।
दत्त्वा श्राद्धं ऋषिभ्यश्च मनुजेभ्यस्तथाऽऽत्मने ॥
इष्टिं वैश्वानरीं कृत्वा प्राजापत्यामथाऽपि वा ।
अग्निं स्वात्मनि संस्थाप्य मन्त्रवत् प्रव्रजेत् पुनः ॥
ततः प्रभृति पुत्राद्यैः [2]स्नेहलोभादि वर्जयेत् ।
दद्याच्च भूमावुदकं सर्वभूताभयंकरम् ॥
त्रिपर्वं वैणवं सौम्यं सत्वचं समपर्वकम् ।
वेष्टितं कृष्णगोवालरज्ज्वा च चतुरङ्गुलम् ॥
[3]ग्रन्थिभिर्वा त्रिभिर्युक्तं जलपूतेन चोपरि ।
गृह्णीयाद्दक्षिणे हस्ते मन्त्रेणैव तु मन्त्रवित् ॥
क्षौमं वा कुशसूत्रं वा सूत्रं कार्पासिकं तु वा ।
नैरवं ग्रन्थितं शिक्यं पद्माकारसमन्वितम् ॥

1 ६ १—६
2 स्नेहसंगादि—म

मनुस्मृतिः—

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियता दण्डाः स त्रिदण्डीति कथ्यते ॥
वाग्दण्डं मौनमातिष्ठेत् कर्मदण्डस्त्वनीहताम् ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते ॥

याज्ञवल्क्यस्मृतिः ३ ५७—

सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥

3 *Ibid* ६ ८११

मस्याऽस्मिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वाऽन्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वोत्तीर्य वासः पीडयित्वाऽन्यत् प्रयतं वासः परिधाय अप आचम्य 'ॐ भूर्भुवस्सुवरि'ति पवित्रमादाय तर्पयति—

ॐ भूस्तर्पयामि। ॐ भुवस्तर्पयामि। ॐ स्वस्तर्पयामि ॐ[1] भूर्भुवस्सुवर्महर्नम इति देववत् पितृभ्यो ऽञ्जलिमादाय तर्पयति। "ॐ भूः स्वधा, ॐ भुवः स्वधा, ॐ स्वः स्वधा, ॐ भूर्भुवस्स्वः [2]स्वधा ॐ महः स्वधा, इति। अथोदुत्यं चित्रं इति द्वाभ्यामादित्यमुपतिष्ठते। ॐ मिति ब्रह्म ते ब्रह्म वा एष ज्योतिर्य एष तपत्येष वेदो य एष तपति वेद्यमेवैतद्य एष तर्पयत्येवमेवैष आत्मानं तपयति आत्मानं नमस्करोति आत्मा ब्रह्माऽऽत्मा ज्योतिः'।

सावित्रीं सहस्रकृत्व आवर्तयेत् शतकृत्वोऽपरिमितकृत्वो वा। ॐ भूर्भुवस्स्वः इति पात्रमादायापो गृह्णाति। न चाऽत ऊर्ध्वमनुद्धृताभिरपरिस्रुताभिरपरिपूताभिरद्भिरा चामेत्[3]। तथाऽत ऊर्ध्वं शुक्लं वासो बिभृयात्।

त्रिदण्डी वा। अथेमानि व्रतानि भवन्ति—

अहिंसा सत्यमस्तेयं मैथुनस्य च वर्जनं त्याग इत्येव पञ्चैवापव्रतानि भवन्ति—अक्रोधो गुरुशुश्रूषा अप्रमादः शौचं [4]आहारशुद्धिश्चेति।

1 [illegible] used [illegible] here instead of ओं भूर्भुवस्स्वर्महर्नम इति — ओं भूस्तर्पयामि। ओं भुवस्तर्पयामि ओं स्वस्तर्पयामि। ओं [illegible] इति [illegible] for [illegible] [illegible] ओं ५ ६ १ ४

3 [illegible] ओं ५ [illegible] १ २१ [illegible]—[illegible]

4 [illegible] आहारशुद्धिश्च (बौ ध. सू. २ १८)

'सन्यासविधिं' चतुर्थाश्रमेतिकर्तव्यताम्। समस्त गर्भाधानादि संस्कारः। अत एव ब्रह्मचर्यवान् अविप्लुत ब्रह्मचर्यः। 'एकेषां' दर्शनमिति शेष।

'विधुरे' मृतभार्ये पुरुषे सन्यासमुपदिशन्ति इत्य न्वयः। 'कर्मविरामे' कर्मानुष्ठानसामर्थ्योपरमे। 'एष' इति 'येन सूर्यस्तपतीति' श्रुत्या अभिहितस्याऽऽत्मनो व्यपदेशः। ब्राह्मणस्य संचन्वीति शेष'। अनेन ब्राह्मणस्य सन्यासेऽधिकार इति दर्शयति। 'स च नित्य आत्मा' न कर्मणा वर्द्धते 'पुण्येन नो कनीयान्' पापेनेति शेष। 'तस्यैव' 'परब्रह्मण' आत्मा स्वरूपं 'पदवित्' पद्यते गम्यतेऽनेनेति पदमत्र वेदः 'उप कल्पयते' सम्भवति। 'यष्ट्य' स्त्रयो वैणवा दण्डाः। 'पात्र' भिक्षापात्र। 'त्रिवृदिति' संसृष्टमाज्यादित्रयम्। 'उपवसेत्' पुनर्भोजनं न कुर्यात्। 'अपो वे' त्याज्याद्यभावे विकल्प। 'पच्छ' पादशः 'अर्द्धर्चश' अर्द्धर्चेन। समस्तया कृत्स्नया व्यस्तया व्याहृतिरहितया। आत्मानमात्मनेत्यादि। 'ब्रह्म' शब्देन सावित्र्यभिधीयते। 'पूतो' विधूतपापो भवत्येवेत्यर्थः॥

पुनराश्रमग्रहणेन सावित्र्यनुप्रवेशावृर्द्धं पुनरावृत्त्यभाव उच्यते। स एष भिक्षुरानन्त्याय कल्पत इति शेषः। 'उपसमा धाय' प्रस्याल्य। आहृत्य भिक्षयोनिपक्षेऽपि अथ आयतने निधाय समिद्धमि(?)। 'प्रादेशमात्रीं' पालाशीं समिधमाधाय उद्धृत्याऽऽहवनीये तृणानि दमात् 'पात्राणि यज्ञायुधानि कृष्णाजिनं चाऽन्तधाय' दर्भेष्वासीय 'अकाल एव' अनु दिसत्य पृष्ठ्यां स्तीत्मागार्हपत्याहवनीययोरन्तरा उत्तरार्जि

कृत्वा अमृण्मयाश्ममयानि मृण्मयाश्ममयव्यतिरिक्तानि दीर्घीमयानि (?) गार्हपत्येऽरणी प्रक्षिपति इति शेषः। 'त्रिरक्षी वेदि'रिति अन्तर्वेदीति शेषः। 'सुरभिमत्या' दधिक्राव्ण इत्येतयर्चा। 'अब्लिङ्गा'' 'आपोहिष्ठीया। 'वारुणी, 'इमं मे वरुण' इत्याद्या 'हिरण्यवर्णाः शुचय'इत्याद्यास्तस्रः 'पावमान्यः' 'पवमानः सुवर्जनः' इत्यनुवाकः। 'अघमर्षणमि' 'त्यृतं च[1] सत्यं चेति' सूक्तम्। 'पवित्रं'जलपवित्रम्। 'देव वदिति प्राचीनावीतित्वमतिदेशार्थम्। 'ओमिति ब्रह्मत्वादि' 'आस्माद्योतिरित्यन्तं सूक्तम्' ॐकार इति।

आदित्योपस्थानानन्तरं सावित्रीं सहस्रकृत्व आवर्तयेत्। ॐ भूर्भुवःस्वरित्यादेः। यदा यदा यो गृह्णातीति तदा समर्पणाभिर्व्याहृतिभिरेवमादायाऽपो गृह्णीयादिति शेषः। 'अपरिस्रुताभिः' जलपवित्रेणाभिस्रुताभिः। 'अपरिपूताभिः, निरीक्षणादिना अनिरस्तापद्रव्याभिः। 'एकवर्णी त्रिवर्णी चेति' केचित् पठन्ति। "सोऽपपाठः, अधस्तात् पण्डन्त्रयोपकल्पनस्योक्तत्वा"दिति बोधायनभाष्यकारः[2]। 'स्यागः' संगस्यति शेषः।

1 Folio 6 of Nagpur M ends here fol 7 and 8 of it are lost

2 [illegible] बोधायनभाष्ये (२ १ [illegible] [illegible]) —"एकवर्णी त्रिवर्णी च इति [illegible] [illegible]। [illegible] एकवर्णी इति [illegible] [illegible]। [illegible] [illegible]। [illegible] [illegible]। See [illegible] p 94 and [illegible] p 336, which confirm Mitramisra statement. गोविन्दस्वामी (२ १ ६) accepts the reading एकवर्णी त्रिवर्णी वा — [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] Ma (VII 10 11) and Yajnavalky (III 57) prescribe only the tridand to th Sannyasin. अनुस्मृति १ १ and 10, 8—(अपरार्क)

<u>नरसिंहपुराणे</u>

[1]एवं वनाश्रमे तिष्ठंस्तपसा दग्धकिल्बिषः ।
चतुर्थमाश्रमं गच्छेत् सन्यासविधिना द्विजः ॥
दिव्यपितृभ्यो देवेभ्यः स्वपितृभ्यश्च यत्नतः ।
दत्त्वा श्राद्धं ऋषिभ्यश्च मनुजेभ्यस्तथाऽऽत्मने ॥
इष्टिं वैश्वानरीं कृत्वा प्राजापत्यामथाऽपि वा ।
अग्निं स्वात्मनि सम्पाप्य मन्त्रवत् प्रव्रजेत् पुनः ॥
ततः प्रभृति पुत्राद्यैः [2]स्नेहलोमादि वर्जयेत् ।
दद्याच्च भूमावुदकं सर्वभूताभयंकरम् ॥
त्रिदण्डं वैणवं सौम्यं सत्वचं समपर्वकम् ।
वेष्टितं कृष्णगोवालरज्ज्वा च चतुरङ्गुलम् ॥
[3]ग्रन्थिभिर्वा त्रिभिर्युक्तं जलपूतेन चोपरि ।
गृह्णीयाद्दक्षिणे हस्ते मन्त्रेणैव तु मन्त्रवित् ॥
क्षौमं वा कुशसूत्रं वा सूत्रं कार्पासिकं तु वा ।
वेष्टयं ग्रन्थिनं शिक्य पद्माकारसमन्वितम् ॥

1 ६ १—६
2 स्नेहसमादि—म

मनुस्मृतिः—

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियता दण्डाः स त्रिदण्डीति कथ्यते ॥
वाग्दण्डो मौनमातिष्ठेत् कर्मदण्डस्त्वनीहताम् ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते ॥

याज्ञवल्क्यस्मृतिः ३ —

सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥

3 *Ibid* ६ ११

पद्‌भिर्वा पञ्चभिर्युक्तं मुष्टिभिः शिक्यलक्षणम् ।
गृह्णीयान्मन्त्रतो विद्वान् पात्रं चाऽपि कमण्डलुम् ॥
आसनं दारुजं प्रोक्तं समाग्रं वर्तुलं समम् ।
शौचार्थमासनार्थं च मुनिभिस्तैरनुष्ठितम् ॥
कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ।
पादुके चाऽपि गृह्णीयात् कुर्यान्नाऽन्यस्य संग्रहम् ।
एतानि तस्य लिङ्गानि यतेः प्रोक्तानि धर्मतः ॥
संगृह्य कृतसन्यासो गत्वा तीर्थमनुत्तमम् ।
स्नात्वाप्याचम्य विधिवत् जलपूताशुकेन च ॥
वारिणा तर्पयित्वा तु विधिवत् भास्करं नमेत् ।
आसीनः प्राङ्मुखो मौनी प्राणायामत्रयं चरेत् ॥
गायत्रीं वा यथाशक्ति स्वाध्यायत्परमं पदम् ।

दक्षः

संन्यस्तमिति यो ब्रूयात् प्राणैः कण्ठगतैरपि ।
त्रिंशत् परान् त्रिंशदपरान् त्रिंशच्च परतः परान् ॥
सद्यः संन्यसनादेव नरकात्त्रायते पितॄन् ।

महाभारते

एतदेव हि पर्याप्तं भिक्षोरप्यात्मनीप्सितः ।
यथाऽस्य पञ्चभिः प्रियतः प्रियतं नाऽस्य कस्यचित् ॥
गृहपर्णं विन्ध्यमार्गो जरयाऽभिपरिप्लुतः ।
प्रियतं स्वधर्मं मत्य आर्तानां न स गृह्यः ॥
अधिकारिशरीरेण दुष्प्रापं प्राप्य सत्तमः ।
नाऽप्यमामति संसारसागरान्महा स नराधमः ॥

<u>दक्ष</u>

मन्योम्भग्ग मुगम्नेऽपि विपर्यस्तु धन्गीग्मा ।
प्रमादिन्यन्पमत्यपु मनुष्यपु सु षा पन्था ।
मम्मा पपकपायेन धनन्य दण्डधारणम ॥
न्ति धम्नु न नापनोनि विपगरय ईापत ।
त्रिदण्डग्यपदृशेन जीयन्ति पाग्यो जना ॥
पो हि ग्रम न जानाति न त्रिदन्डाहपो हि स ॥

॥ ७ ॥

अथ यतिधर्मः

सांख्ययोगयोर्भिक्षोः प्रैषप्रैक्षमाश्रितवचनानन्तरं

हारीतः ॥

तदेव चतुर्थमिच्छुरारम्भस्यानग्नीन् हुत्वा मनोवाक्कर्मदण्डान् संन्यस्य भूतेभ्यो ऽभयं दत्त्वा ऽरण्यं गत्वा न प्रत्येयादनग्निरनिकेतोऽव्यसननिपानो मुण्डः कषायवासास्त्रिदण्डकुण्डिकाजलपवनपवित्रसूक्ष्मजन्तुनिवारणपाणिः मनोवाक्कर्मणां या परपीडाकरत्वेन दण्डरूपता तां परित्यज्याऽनपत्याऽभयप्रदानं भूतेभ्यो निरासार्थमरण्यगमनम् ।

तदेतत् कृत्वा न प्रत्येयात्'। चतुर्थाश्रमं गत्वा पुनरर्वाचीनमाश्रमान्तरं स्वातन्त्र्येण वा नाऽऽश्रयणीयमित्यर्थः। 'अनग्निरि'ति पाकार्थस्याग्नेः प्रतिषेधः। श्रौतस्मार्ताग्न्यभावस्य सिद्धत्वात्। 'कुण्डिका' कमण्डलुः। 'पवित्रं' 'जलपवनार्थम्' वस्त्रखण्डम्।

मनुः[1]

> वाग्दण्डोऽथ मनोदण्डः [2]कर्मदण्डस्तथैव च।
> यस्यैते नियता बुद्धौ त्रिदण्डीति स उच्यते ॥

1 १२, १०—११

2 कायदण्डस्तथैव च। यस्यैते निहिता बुद्धौ—इति कुल्लूकभट्टी

त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः ।
कामक्रोधौ वशे यस्य ततः सिद्धिं नियच्छति ।

दक्षः

नाऽध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ।
एवं सर्वैः सुनिष्पन्नो यतिर्भवति नेतरः ॥

[1]मनुः

एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥
अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसञ्चयिको[2] मुनिर्भावसमन्वितः ।
कपालं वृक्षमूलानि कुचेलमसहायता ॥
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ।
नाऽभिनन्देत मरणं नाऽभिनन्देत जीवितम् ॥
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ।
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ।
अतिवादांस्तितिक्षेत नाऽवमन्येत कञ्चन ॥
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ।
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ।
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ॥

1 ६. ४२—४९, ८—४
2 असङ्कुसुक इति पुस्तकान्तरे । स्थिरमतिः इति व्याख्यानं च

आत्मनैव सहायेन सुखार्थी विचरेदिह ।
क्लृप्तकेशनखश्मश्रुः ¹दण्डी पात्री कुसुम्भवान् ॥
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ।
संरक्षणार्थं तु जन्तूनां रात्रावहनि वा सदा ॥
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ।
ग्रीष्महेमन्तिकान्मासान् अष्टौ प्रायेण पर्यटेत्² ॥

दयार्थं सर्वभूतानां वर्षास्वेकत्र संवसेत् ।

'एक एवे'ति पूर्वपरिचितस्य परित्याग उच्यते । 'असहायवानि'त्यपूर्वस्यापि परित्यागमाह । 'सिद्धिमेकस्ये'ति एकस्य सर्वसङ्गविरहिणो ममत्वशून्यस्य सिद्धिं पश्यन्नेक एव विचरेत् । अन्यथा पुत्रादिषु कृतममत्वो न तान् जहाति न च नेर्दीपत इत्यर्थः । 'सप्तद्वारावकीर्णा मि'ति षडिन्द्रियाणि । बुद्धिः सप्तमी । 'एतैर्गृहीतेष्वर्थेषु' वाक् प्रवर्तत इति वचो द्वाराण्युच्यन्ते । तैरेतैर्गृहीतान्यविषयां वाचं न वदेत् किं तु मोक्षाश्रयामेव वदेदित्यर्थः । 'कुसुंभ' ' कमण्डलुः ।

मत्स्यपुराणे

अष्टौ मासान् विहारः स्याद्यतीनां नियतात्मनाम् ।
एकत्र चतुरो मासान् वार्षिकान्निवसेत्पुनः ॥
³अविमुक्ते प्रविष्टानां विहारो नैव विद्यते ।
न देहो भविता तत्र दृष्टं शास्त्रं पुरातनम् ॥

1 [illegible]
[illegible]
3 [illegible]

मनुः[1]

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥

यमः

निर्ममो निरहङ्कारो निरपेक्षो निरामिषः।
य आत्मनाऽऽत्मशयेन विचरेत् स सुखी भवेत् ॥
शुचिपिप्पलकं चैव त्रिविष्टपकमण्डलुम्।
कन्थां पवित्रं पुण्यं च लघुमात्रं परिव्रजेत् ॥
अभ्या सूचणं निर्दिष्टं कीटवत्पर्यटन्महीम्।
एकवासा अवासा च एकदृष्टिरलोलुपः ॥
एक एव चरेद्भैक्ष्यं धर्मवानविहिंसकः।
अभ्यसनविधानं तु सुमतिः सुसमाहितः ॥
शून्यागारं गुहावासी पर्वतेषु नदीषु च।
ग्रामान्ते वृक्षमूले वा शुचौ देवकुलेऽपि वा ॥
तत्राऽऽसीनः प्रसन्नात्मा धारणास्त्रिविधाश्चरेत्।
पर्यङ्कं दण्डकोणेषु युञ्जीताऽऽत्मा यथाविधि ॥
नित्यं स्थण्डिलशायी स्यादनित्यो वसतिं वसेत्।
अरण्यनित्यो मुण्डस्स्यान्मनसा ज्ञानमभ्यसेत् ॥

मथा

नाय प्राननमृष्येन न प्रसक्येन भोजने।
नेन्द्रियार्थेषु सज्जेत कदाचिदपि कामतः ॥

॥ ७ ॥

अथ यतिधर्म

सांख्ययोगयोर्भिक्षो र्ब्रह्मचर्येच्छाप्राप्तिवचनानन्तर हारीतः ॥

तदेव तदपवर्गमिच्छन्नात्मस्थानग्नीन् हुत्वा मनोवाक्कर्मदण्डान् संन्यस्य भूतेभ्यो ऽभयं दत्त्वा ऽरण्यं गत्वा न प्रत्येयादनग्निरनिकेतोऽप्यसनविधानो मुण्डः कषायवासास्त्रिदण्डकुण्डिकाजलपवनपवित्रसूक्ष्मजन्तुनिवारणपाणिः मनोवाक्कर्मणां या परपीडाकरत्वेन दण्डरूपता तां परित्यज्याऽनपायाऽभयदानं भूतेभ्यो निरामार्थमरण्यगमनम् ।

तदेतत् 'हुत्वा न प्रत्येयात्' । चतुर्थाश्रमं गत्वा पुनरर्वाचीनमाश्रमान्तरं स्नातकत्वं वा नाऽऽश्रयणीयमित्यर्थः । 'अनग्निरि'ति पाकार्थस्याऽग्नेः प्रतिषेधः । श्रौतस्मार्ताग्न्यभावस्य सिद्धत्वात् । 'कुण्डिका' कमण्डलुः । 'पवित्रं' 'जलपवनार्थम्' वस्त्रखण्डम् ।

मनुः[1]

वाग्दण्डोऽथ मनोदण्डः [2]कर्मदण्डस्तथैव च ।
यस्यैते नियता बुद्धौ त्रिदण्डीति स उच्यते ॥

1 १ १०—११
2 वाग्दण्डस्तथैव च । यस्यैते निहिता बुद्धौ—इति मुद्रितप्रतौ

त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः ।
कामक्रोधौ वशे यस्य ततः सिद्धिं नियच्छति ।

दक्ष

नाऽध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ।
एवं सर्वं सुनिष्पन्नो यतिर्भवति नेतर ॥

[1]मनु:

एक एव चरन्नित्यं सिध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥
अनग्निरनिकेतस्याद्ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसंकुसुको[2] मुनिर्भावसमन्वित ।
कपालंवृक्षमूलानि कुचैलमसहायता ॥
समतामेव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ।
नाऽभिनन्देत मरणं नाऽभिनन्देत जीवितम् ॥
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ।
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत ।
अतिवादांस्तितिक्षेत नाऽवमन्येत कञ्चन ॥
न चेमं देहमाश्रित्य वैरं कुर्वीत कनचित ।
क्रुध्यन्तं न प्रतिक्रुध्येदाकृष्टः कुशलं वदेत् ॥
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ।
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ॥

आत्मनैव सहायेन सुखार्थी विचरेदिह ।
क्लृप्तकेशनखश्मश्रुः ¹दण्डी पात्री कुसुम्भवान् ॥
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ।
संरक्षणार्थं तु जन्तूनां रात्रावहनि वा सदा ॥
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ।
ग्रैष्महैमन्तिकान्मासान् अष्टौ प्रायेण पर्यटेत्[2] ॥

दयार्थं सर्वभूतानां वर्षास्वेकत्र संवसेत् ।

'एक एवेत्य'नेन पूर्वपरिचितस्य परित्याग उच्यते । 'असहायवानि'त्यपूर्वस्यापि परित्यागमाह । 'सिद्धिमेकस्ये'ति एकस्य सर्वसङ्गविरहिणो ममत्वशून्यस्य सिद्धिं पश्यन्नेक एव विचरेत् । अन्यथा पुत्रादिषु कृतममत्वो न तान् जहाति न च तैर्हीयत इत्यर्थः । 'सप्तद्वारावकीर्णामि'ति षडिन्द्रियाणि । बुद्धिः सप्तमी । 'एतैर्गृहीतेष्वर्थेषु' वाक् प्रवर्तत इति वचो द्वाराण्युच्यन्ते । तेनैतैर्गृहीतान्यविषयां वाचं न वदेत् किं तु मोक्षाश्रयामेव वदेदित्यर्थः । कुसुम्भः' कमण्डलुः ।

मत्स्यपुराणे

अष्टौ मासान् विहारस्स्याद्यतीनां नियतात्मनाम् ।
एकत्र चतुरो मासान् वार्षिकान्निवसेत्पुनः ॥
³अविमुक्तं प्रविष्टानां विहारो नैव विद्यते ।
न देहो भविता तत्र दृष्टं शास्त्रं पुरातनम् ॥

1 कुण्डी पात्राणि मातृकापाठः
2 । भिक्षुर्विचरन्महीमिति पुस्तकपाठः
3 See Tirtha Kāṇḍ of कृत्यकल्पतरु_अविमुक्तमाहात्म्यम् च

मनुः[1]

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥

यम

निर्ममो निरहंकारो निरपेक्षो निरामिष ।
य आत्मनाऽसहायेन विचरत् स सुखी भवेत् ॥
शुचिपिप्पलकं चैव त्रिपिष्टपकमण्डलुम् ।
कन्थां पवित्रं पुण्यं च लघुमात्रं परिव्रजेत् ॥
अध्वा सूर्येण निर्दिष्टे कीटवत्पर्यटेन्महीम् ।
एकवासा अवासा च एकदृष्टिरलोलुपः ॥
एक एव चरन्नित्यं धर्मध्यानविहिंसक ।
अभ्यसनविधान तु सुमतिः सुसमाहित ॥
शून्यागार गुहावासी पर्वतेषु नदीषु च ।
ग्रामान्ते वृक्षमूले वा शुचौ देवकुलेऽपि वा ॥
तत्राऽऽसीनः प्रसन्नात्मा धारणात्त्रिविधाश्चरत् ।
पर्यंक दण्डकोणेषु युञ्जीताऽस्मा यथाविधि ॥
नित्य स्थण्डिलशायी स्यादनित्यां वसतिं वसेत् ।
अरण्यनित्यो मुण्डस्स्यान्मनसा ध्यानमभ्यसेत् ॥

तथा

सायं प्रातर्नतृप्यन न प्रसज्येत भोजने ।
नेन्द्रियार्थषु सज्जेत कदाचिदपि कामम ॥

यो चास्य दक्षिणं बाहुं चन्दनेनानुलेपयेत्।
सव्यं चाऽप्यस्य यस्तक्षेत् समौ तौ पुरुषौ मतौ॥
एवमस्य समज्ञायो नित्यमेव प्रियाऽप्रिये।
इष्टे वा यदि वा द्वेष्ये समः सर्वत्र वर्तयेत्॥
समः लाभे च पापे च शत्रौ मित्रे समो भवेत्।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः॥
न प्रहृष्यति संमाने नाऽपमाने च कुप्यति।
रागद्वेषौ समौ यस्य स मुनिः सर्वनिस्पृहः॥
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वाऽऽघ्राय च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥
अरोषतोषः समलोष्टकाञ्चनः
प्रहीणशोको गतसन्धिविग्रहः।
व्यपेतनिन्दास्तुतिरप्रिया
ऽप्रियश्चरत्युदासीनवदेव भिक्षुः॥

'*पिप्पलकं*' सीवनसूत्रं '*त्रिविष्टब्धं*' त्रिपदिका '*लघु मात्रः*' अल्पपरिकरः। अथवा सूत्रेण निर्दिष्टस्तस्य भवेदिति शेषः। त्रिधा गच्छेदिति यावत्। '*एकवासा*' एकपरिधानवासाः। '*अवासास्तु*' वासोरहितः। '*एकशाटीपरिहितो ऽजिनेन वेति*' वसिष्ठवचनात्[1]। '*पर्यङ्कदण्डकोणेष्वि*'ति पर्यङ्कः पर्यस्तिकादण्डः, स्तंभादिः '*कोणो*' गृहादीनाम्। एतेषु कृताऽवष्टम्भ इति शेषः। केचित्तु पर्यङ्कदण्डकोणपदा *विषयासनभेदेषु सत्सु युञ्जीतेति व्याचक्षते*। '*युञ्जीत*' योगं *कुर्यात्*। '*अनित्यां चर्यां चरेदित्ये*'कत्र न *चिरं* वसे

1 वसि० १० ११—एकशाटीपरिहितो
ऽजिनेन वा गवाश्वैस्तृणैरवस्तृतं

दित्यर्थः। 'सायंप्रातर्नैतुप्येत' इत्यत्रैव वा हेतुः। 'प्रसज्येत भोजने' इति [1]तक्षण शास्त्रेण।

महाभारते

प्रदक्षिणं प्रसव्यं च ग्राममध्येन वा चरेत्।
भैक्षचर्यामनापन्नो न गच्छेत्पूर्वकेतितः॥
चानप्रस्थगृहस्थाभ्यां न संसृज्येत कर्हिचित्।
येन केन चिदाच्छन्नो येन केनचिदासिनः॥
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः।

'प्रदक्षिणं' मित्यादि प्रकारत्रयं 'पर्याकुलभिक्षा' चरणनिर्वृत्त्यर्थम्। 'अनापन्नः' आपद्रहितः। 'केतितो' निमन्त्रितः।

शङ्खलिखितौ

त्रिदण्डकुण्डी, पक्ष्मपवित्रप्रयोजनापेक्षी, मुण्डः, काषायवासा, भैक्षवृत्तिरसविभागरुधिरमिश्रपतितनिन्दितोपकूलवर्जी च, कौपीनमात्रवासा, व्रणमात्रच्छेपनपरितुष्टः, पक्षकषायः, कालाकांक्षी, सदायुक्तः आत्मरतिरसंविधानशीलः, कुहुकुकल्कदम्भापवर्जितः, सदा नैकग्रामवासी, सङ्कल्पोपात् पर्यटनशीलः, सदाऽऽत्मज्ञानविवेकार्यकुशलः, ऊर्द्ध्वं वर्षाभ्यो नैकस्थानवासाभिरतिः, नैकदेशामूत्रपुरीषउत्सर्गपरिपूताभिरद्भिः कार्यं कुर्यात्। दण्डपवित्रपाणिः, द्विपरिधानी, कुशचीरचरकल्कः, वासो शीतमावरणमेकम्।

'त्रिदण्टकुण्डी' त्रिदण्डकमण्डलुयुक्तः। 'पक्ष्मपवित्रप्रयोजनापेक्षी'। पक्ष्मशब्दोऽग्रगोवालवचनः। पक्ष्म

[1] लक्षणं for तक्षणम्—म

पवित्रयोरर्थः प्रयोजनं पात्रशुद्धिजलपावनादि। 'कौपीनमात्रवासाः' गुह्यदेशमात्राच्छादनवसनः। 'मात्र'शब्दो ऽत्राधिकपरिमाणनिवृत्त्यर्थः। 'व्रणमात्रलेपनपरितुष्टः।' 'व्रण'शब्दोऽत्र शरीरपरः। 'लेपन'माहारस्तेन शरीरयात्रामात्रेणाऽऽहारेण परितुष्टो भवेत्। न 'रसलालस' इत्यर्थः। 'कालाकाङ्क्षी' जीवितकालप्रतीक्षां कुर्यात्। न तु वैराग्यादिना। 'अविहितोपायेनाऽऽत्मानं व्यापादयेदि'त्यर्थः। 'असंविधानः' असञ्चयवान्। 'कल्कः' पापम्। 'आत्मज्ञानविवेकार्थकुशलः'। आत्मविषयज्ञानं आत्मज्ञानम्। तत्र 'विवेको' देहाद्यतिरिक्तस्याऽऽत्मतत्त्वस्याऽवबोधः। तस्मिन्नेवार्थे कुशलः। 'द्विपरिधानी' द्वे परिधाने कौपीनकटिवेष्टनाख्ये यस्य स तथा। 'कसर्क' वार्क्ष। 'शीतप्रावरणं' शीतनिवारणार्थमुपरि वासो धारयेत्।

पुन <u>शङ्खलिखितौ</u>

शीतोष्णवातवर्षाणि नाऽत्यन्तं परिहरेत्। नाऽऽत्मनः प्रतीकार कुर्यात्। न कारयेन्नानुमन्येत।

'प्रतीकार' व्याध्युपद्रवे जात इति शेषः।

<u>गौतमः</u>[1]

अनिचयो भिक्षुः। ऊर्ध्वरेता ध्रुवशीलो वर्षासु भिक्षार्थी ग्राममियात्। जघन्यमनिवृत्तं चरेत्। निवृत्ताशीः। वाक्चक्षुःकर्मसंयोगः[2]। कौपीनाच्छादनार्थं वासो बिभृयात्। प्रहीणमेके निर्णिज्य[3]। नाविप्रयुक्तमोषधिवनस्पतीनामङ्ग

1 ३ ११—२५
2 ... इति मस्करीभाष्य (पृ ..)
3 निर्णिज्य (... पृ १)

मुपाददीत। न द्वितीयामपत्तु रात्रिं ग्रामे वसेत्। मुण्ड शिखी वा। [1]यज्ञयज्ञीयवचनम्। ममो मूतपु। हिंसानुग्रहयोरनारम्भी।

'भुयनीले ययाम्' ग्रामाद्ग्रामान्तर न गच्छेत इत्यर्थ। 'जघन्य शब्दोऽत्र गृहस्थभोजनमिपात पश्चा दर्थे। अनिवृत्तमिति मिथायिशेपणम्। तत भिक्षार्थं गतः सन् प्रत्याख्यातो न पुनस्तस्मिन्नेव दिवस प्रत्यावृत्य भिक्षेमत्यथ'। निवृत्तानी रात्मन परस्य वा ेशमार्गमनरहित। प्रहीण' परित्यक्त। 'निर्णिज्य प्रक्षाल्य'अपत्तु ययमुयज। 'मुण्ड शिखी वा मयमुण्ड शिखायज मुण्डा वा। जटि स्यनिवृत्यर्थोऽयमारम्भ। इति नृयणासदायमस्यरिण [2]।

विष्णु

'निराशी स्यात्। निर्नमस्कार।

दृपट

परिव्राजको दीक्षामभृति मयारम्भान परित्यजेत्। पतुमासान्तर केशश्मश्रुणवपनयन्। नाप्यात श्मश्रुगमाणि। पिशाचारकुम्भपराष्ट्रत्तानि परभ्या न पश्येत।

मयारम्भान गृहादीनामिति शेष। पग्यासो मासा भ्यन्तर यत्र मवति मिशापिशेपणम्। अथाम 'अस्नान।

<u>पुनर्वैखलः</u>

स भिक्षुररागानुक्रोशप्रधानः कषायी मुण्डितः त्रिदण्डकमण्डलुपवित्रपात्रपादुकासनः, कन्थामात्रो, ज्ञानरतिरात्मक्रीडः, च मुनिरसङ्गो, निरपेक्षः। परार्तिक्षम, क्षीणविगतपापः, समसुखदुःख , क्षमावान्, स्वल्पसक्तो, मत्पस्थः, तुल्यारिमित्रो, निष्परिग्रहो, ब्रह्मवादी, मङ्गलव्यवहारसंस्कारजीव, स्त्रीभारमधनधान्यविषयोपभोगस्नेपर्के च्छर्दिदर्पमोहमायाहर्षविरोधविस्मयविवादग्रामवितर्कतन्त्र क्षेति यतिधर्माः।

<u>पसिद्धः</u>[1]

शून्योऽममोऽपरिग्रहः। सप्तागाराण्यसंकल्पितानि चरेद्भैक्षं विधूमे सन्नमुसले। एकशाटीपरिहितः। अजिने वा गोलोमैस्तृणैरवस्तृतशरीरः। स्थण्डिलशायी। अनित्यां वसतिं वसेत्। ग्रामान्ते देवगृहे शून्यागारे वृक्षमूले वा। मनसा ज्ञानमधीयानः न ग्राम्यपशूनां दर्शने विचरेत्।
अथाप्युदाहरन्ति।

अरण्यनित्यस्य जितेन्द्रियस्य
सर्वेन्द्रियप्रीतिनिवर्तकस्य।
अध्यात्मचिन्तागतमानसस्य
ध्रुवा ह्यनावृत्तिरपेक्षकस्य॥

अव्यक्तलिङ्गो व्यक्ताचारोऽनुन्मत्त उन्मत्तवेषः।
अथाप्युदाहरन्ति।

1 व ६-२

न शब्दशास्त्राभिरतस्य मोक्षो
  न चापि लोकग्रहणे रतस्य।
न भोजनाच्छादनगर्वितस्य
  न चाऽपि रम्यावसथप्रियस्य॥
[1]न कुड्ये नोदके सङ्गो न चैले न त्रिपुष्करे।
नागारे नासने नान्ने यस्य वै मोक्षवित्तु स ॥ इति॥

ब्राह्मणकुले यल्लभते तद्भुञ्जीत। मांसमद्यमधुमांसवर्जनं, न च तृप्येत्। ग्रामे वा वसेत्। अजिह्मोऽशठो (शरणो) सङ्कुसुकं नन्त्रियमात्रं कुर्वीत केनचित्। उपेक्षकः सर्वभूतानां [हिंसानुग्रहपरिहारेण।] पैशुन्यमत्सराभिमानाहंकाराश्रद्धानार्जवात्मस्तवपरगर्हादम्भलोभ [मोहक्रोधासूया] विवर्जनं सर्वाश्रमाणां धर्मिष्ठः यज्ञोपवीत्युदककमण्डलुहस्तः शुचिर्ब्राह्मणात् वृषलान्नवर्जनं न हीयते ब्रह्मलोकात्[2]।

'गोभिर्लूनैस्तृणैरवस्तृतशरीरः', गोभिश्छिन्नैः तृणैराच्छादितशरीरः। 'न ग्राम्यपशूना यत्र विचरेत्।' यत्र ग्राम्यपशून् पश्यति न तत्र नित्यमासीत। किन्त्वेकान्तनिरतेन भवितव्यमित्यर्थः। 'अव्यक्तलिङ्गः' न लिङ्गविशेषधारणमेव यत्परं स्यात्। किं [3]तु व्यक्ताचारो भवेत्। शौचादि प्रमादी न स्यादित्यर्थः। तदुक्तं महाभारते

भूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम्॥ इति।

1 Fol 9 of Nagpur M[S] begins here
2 १ १—११
3 किन्तु व्यक्ताचारो भवेत् इति ना ग and श्री मि-मोथ पृ २

'अनुन्मत्त' उन्मत्तवेषेण चरेदित्यन्वयः। लोके पूजापरिहारार्थं चैतत् 'त्रिपुष्करे' त्रिदण्डानामिति कश्चित्। भिक्षापात्रधारे काष्ठत्रये चेति रोगाद्यापत्स्वेकाश्रमपि गृह्णीतेत्यनुज्ञातम्। 'धर्मिष्ठः' धर्म्येषु मध्ये प्रधानतमः।

हारीतः

ससूर्यचक्षुर्भ्योऽद्भुतपरिपूताभिरद्भिः कार्यं कुर्याद्दिवा क्रोशादियोजनान्तं गच्छेत्। शून्ययुगपत्रम् क्रोशादियोजनान्तं गच्छेत्।

क्रोशादर्वाक् योजनात्परतो न गच्छेदित्यर्थः। 'शून्यं' प्रान्तरं यदि न स्यात्।

पुनर्हारीतः

केतनं चाऽभियोगं[1] च आशिषं कोपमेव च।
वर्जयेच्च समं यथाप्रार्थं सर्वत्र सर्वदा॥
हिंसाप्रवर्तकं चैताभियोगात्कर्मसम्भवः।
आशिषः पुण्यनिर्ध्वंसः कोपसिद्धिविनाशकः॥
भिक्षोपकरणविनाया मार्जनं भिक्षुसत्क्रिया।
नरकाय नियोगाद्या उभयोरप्यसत्क्रिया॥
पूज्यमानः प्रवृत्तेषु वर्द्धते ब्रह्मतेजसा।
निवृत्तेस्तूपशाम्येत समिद्धोऽग्निरिवाऽम्भसा॥
फलमग्नौ हुते यद्वत् प्रवृत्तेस्तद्वदापयत्।
भस्मन्येव हुते यद्वन्निवृत्तेस्तद्वदापयत्॥
तस्माद्भिक्षुः प्रवृत्तेषु आचरीताऽप्यहिंसया।

1 केतनं च नियोगं च—नौ नि मोक्ष 41 च and न

'केतन'मत्र निमन्त्रणम्। 'नियोग' 'पराज्ञानुष्ठानम्। 'भिक्षोवकपवित्राया' इति 'आर्जव'मिति क्रियाविशेषणम्। तेन भिक्षाया ऋजुभावेन शोभना। भिक्षुसत्क्रियेत्यर्थ। नरकायेति'नियोगाया असत् क्रिया, उभयोरपि नरका येत्यन्वयः।

पुनर्हारीतः

अहिंसा नाम सर्वभूतेष्वनभिद्रोहः। चक्षुर्मनोवाक् शरीरकर्मणां न्यास'। कर्मेन्द्रियबुद्धीन्द्रियाणां संयम। अहंकारकामक्रोधलोभोपनिवर्तनम्। आशीःप्रतिष्ठासङ्गापरिग्रहो ममत्ववर्जनं कलहवादकुतूहलोपनिवृत्तिः, विनय नित्यं [1]प्रत्याहितत्वं प्राणतत्परता प्रमादसमानसत्वम्। पूर्वापररात्रानुसंधानम्। प्राणायामसेवन दिवापर्यटन न रात्रौ न वर्षासु प्रकीर्णस्थाने न भुक्तावतरणम्। न विक्षोभण नोत्क्षेपण सङ्गचो भैक्ष्यग्रहणं सुविमृष्टभोजनं सम मानावमानता समदुःखोपभोगता समलोष्टाश्मकाञ्चनता जन्तूनां शरीरारूढानां, [2]यक्षपामरव्यञ्जनचक्रान्तेन नीय माने नाऽपसर्पकरणम्।

तस्मादवपलगमनासनपरिग्रहेण समदर्शिना भिक्षुणा व्यवहर्तव्यमाह।

[3]अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः।
तस्य सर्वेभ्यो भूतेभ्यो न भयं विद्यते क्वचित्॥
अभूतमध्ये वसति भयं तस्य न विद्यते।
मैत्रश्च सर्वभूतानामहिंसानिरत शुचिः॥

1 पर्युषितत्वम्—श्री मि मोक्ष पृ ५१
2 पचचामर—ना चमचामर श्री मि मोक्ष १
3 These two ślokas are missing in मा and न except the first hemistich.

बौधायनः[1]

अथ यत्रोपनिषदमाचार्या ब्रुवत [तमोवाहरन्ति]— स्थानमौनवीरासनसवनोपस्पर्शनचतुर्थषष्ठाष्टमकालव्रतयुक्तस्य ।

कणपिण्याकयावकसक्तुदधिपयोव्रतत्वं चेति ।

तत्र मौने युक्तस्त्रैविधवृद्धैराचार्यैर्मुनिभिरन्यैर्वाऽऽश्रमिभिर्बहुश्रुतैर्दन्तैर्वन्तान् संभाषयाऽन्तर्मुख एव यावदर्थं संभाषयेन यत्र [यत्र] लोपो भवतीति विज्ञायते ।

स्थानमौनवीरासनानामन्यतमेन युक्तो न अर्थं सर्वं सम्भिपानयत् । यत्नगतमेवावन्माश्रमनुवर्तयेतापस्सु न यत्नलोपो भवतीति विज्ञायते ।

स्थानमौनवीरासनरसनोपस्पर्शनचतुर्थषष्ठाष्टमकालव्रतयुक्तस्य ।

अष्टौ तान्यव्रतघ्नानि आपो मूलं[2] फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ इति ।

मार्यमाणरभिहोत्रमन्त्रान् जपेत् । वारुणीभिस्सायं सन्ध्यामुपतिष्ठेत मैत्रीभिः प्रातः ।

अनग्निरनिकेतः स्यादशर्माऽशरणो मुनिः ।
भिक्षार्थी ग्राममन्विच्छेत् स्वाध्याय वाचमुत्सृजेदिति ।

1 २, १ १०—१४

2 दृश्यमिति मुद्रित बौधायने (३ ११), मो मिश्रोक्त ३ ४१ कर्म् इति पद्ध भारत

विज्ञायते च—[1]परिमिता वा ऋच परिमितानि सामानि परिमितानि यजूंषि। अथैतस्यैषाऽन्तो नाऽस्ति यद्ब्रह्म तत् प्रतिगृणत आचक्षीत स प्रतिगर इति।

एवमेव आशरीरविमोक्षणाद्वृक्षमूलिको वेदसन्यासी।

वेदो वृक्षस्तस्य मूलं प्रणवः।

प्रणवात्मक तत् ध्यायन् प्रणवो ब्रह्म ब्रह्मभूयाय कल्पत इति होवाच प्रजापतिः।

सप्तभिर्व्याहृतिभिः ब्रह्मभाजन प्रक्षालयेत् इति।

छागलेयः

अत पर प्रवक्ष्यामि योगवृत्तिसमाश्रयम्।
त्यज धर्मानधर्म च उभे सत्यानृते त्यज॥
अहिंस्रः सर्वभूतानां कर्मणा मनसा गिरा।

महाभारते[2]

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज॥
त्यज धर्ममसङ्कल्पादधर्मं चाऽप्यहिंसया।
उभे सत्यानृते बुध्या बुद्धिं परमनिश्चयात्॥

दक्ष

एको भिक्षुयथोक्तस्स्यात् द्वौ चैव मिथुन स्मृतम्।
त्रयो ग्रामा समाख्याताः ऊर्ध्वन्तु नगरायते॥

1 त स्रं., ४ १ ४
2 Sāntiparva, ३३९ ४४–४५

नगरं हि न कर्तव्यं ग्रामो वा मिथुनं तथा[1] ।
एतत्त्रयं हि कुर्वाणो स्वधर्माच्च्यवते यतिः ॥
राजादिवार्ता तेषां तु भिक्षा वार्ता परस्परम् ।
स्नेहपैशुन्यमात्सर्यं सन्निकर्षान्न संशयः ॥
लाभपूजानिमित्तं हि व्याख्यानं शिष्यसंग्रहः ।
एते चान्ये च बहवः प्रपञ्चाः कुतपस्विनाम् ॥
ध्यानं शौचं तथा भिक्षा नित्यमेकान्तशीलता ।
भिक्षोश्चत्वारि कर्माणि पञ्चमं नोपपद्यते ॥
तपोजपैः कृशीभूताः व्याधिनाऽऽवसथार्हकाः ।
वृद्धा ग्रहगृहीतार्या च चान्ये विकलेन्द्रियाः ॥
नीरजाश्च युवानश्च भिक्षुर्नाऽऽवसथार्हकाः ।

'पञ्चमं नोपपद्यत' इति एताभ्यामुत्कृष्टमित्यर्थः ।

संवर्तः

अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा ।
सलिला शोधयेत्तास्तु ततोऽश्नीयाद्द्विजोत्तमः ॥
अरण्ये निर्जने विप्रः पुनरासीत यत्नवान् ।
एकाकी संयतो नित्यमन्यं वाङ्मूर्तिभिर्युताः[2] ॥

वसिष्ठः[3]

मुण्डोऽममोऽपरिग्रहः । सप्तागाराण्यसङ्कल्पितानि चरेद्भैक्षम् ।

1 स्वयम् for तथा—मा
2 यति for पुनः—मा and ग.
3 १ [illegible]

यमः

चरेन्माधुकरीं वृत्तिं वल्मीकनिचयोपमाम् ।
अक्रोधनमदृष्टात्मा तपस्तद्धि सनातनम् ॥
प्राजापत्यसहस्रं च भैक्षं च तुलयाधृतम् ।
प्राजापत्यसहस्राद्धि भैक्षमेवाऽतिरिच्यते ॥

मनुः[1]

एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वभिसज्जति ॥
विधूमे सन्नमुशले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥

तथा[2]

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नाऽनुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
[3]आकीर्णं भिक्षुर्कैर्वाऽन्यैरगारमुपसंव्रजेत् ॥

शङ्खः

सप्तागारं चरेद्भिक्षां भिक्षुर्कं नाऽनुभिक्षयेत् ।
नाऽभ्यावपेद्गमनया नाऽश्नीयात्स्वयमिद्वे ॥

1 ६ ५ —५८
2 मनु ६ ५ — १
3 Supplied by ग and म

याज्ञवल्क्यः[1]

अप्रमत्तश्चरेद्भैक्ष्यं सायाह्नेऽनभिलक्षितः ।
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ।

[2]बोधायनः

अथ भैक्षचर्या—ब्राह्मणानां शालीनयायावराणामपवृत्ते वैश्वदेवे भिक्षां लिप्सेत । अथस्पृष्ट्वा प्रयोजयात् । गोदोहनमात्रमाकाङ्क्षेत् । अथ भैक्षचर्यादुपावृत्तः शुचौ देशे न्यस्य हस्तपादान् प्रक्षाल्याऽऽचम्याऽऽदित्यस्याग्रे निवेदयेत् । 'उदु त्यं[3] चित्रमिति[4]' ब्रह्मणे निवेदयति । '[5]ब्रह्म जज्ञानमि'ति विज्ञायते—आधानात् प्रभृति यजमान एवाऽग्नयो भवन्ति । तस्य प्राणो गार्हपत्योऽपानोऽन्वाहार्यपचनो व्यान आहवनीय उदानसमानौ सभ्यावसथ्यौ पञ्च वा एतेऽग्नयः । आत्मस्थाः आत्मन्येव जुहोति । स एष आत्मयज्ञ आत्मनिष्ठ आत्मप्रतिष्ठ आत्मानं क्षेमं नयतीति विज्ञायते । भूतेभ्यो दयापूर्वं संविभज्य शेषमद्भिः संसृज्यौषधवत् प्राश्नीयात् । प्राश्याऽप आचम्याऽऽचम्य ज्योतिष्मत्याऽऽ-

1 ३ ९

2 २ ७ ४

3 उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ तै. सं. १.४.४३

4 चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा ।
जगतस्तस्थुषश्च ॥ तै. सं. १.४.४३

5 ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ (तै. सं. ४.२.८)

दित्यमुपतिष्ठेत '[1]उद्वयं तमसस्परी'ति 'यास्त आसन्नसो प्राण'इति[2] जपित्वा।

> अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया।
> आहारमात्रं भुञ्जीत केवलं प्राणयात्रिकम् ॥ इति

अथाप्युदाहरन्ति—

> अष्टौ मासा मुनेर्भैक्ष्यं षोडशाऽरण्यवासिनः।
> द्वात्रिंशत्तु गृहस्थानाममितं ब्रह्मचारिणः॥
> भैक्षं वा सर्ववर्णेभ्यः एकान्नं वा द्विजातिषु।
> अपि च सर्ववर्णेभ्यो नत्वेकान्नं द्विजातिषु॥

देवलः

नित्यं प्रत्यादित्ये निवृत्तमुसलोद्यमे प्रशान्तधूमे काले ग्रामं प्रविश्य, भैक्षार्थं सर्वत पर्यटन् अग्रतो युगमात्रमवलोक्य सङ्कल्पितानि विवृतद्वाराणि, अन्यथयनेऽनासक्तः प्रविशेत्। प्रविष्टः सकलपभणयकुहकषिन्मयविलम्बनपरिहासयाचनाप्रेक्षितादि परिहरेत्। गोदोहनमात्रं स्थित्वा व्रजेत्। भिक्षां लब्ध्वा न प्रहृष्येत्। अलब्ध्वा न कुप्येत्। अन्त्यवसायिपरिपन्थि श्वार्तीश्वरप्रेतमूतकभिक्षां नोपलभ्यां प्रतिहतां गृह्णीयात्। आत्मनः सत्कृतां परबाधाकरीं वर्जयेत्। मधुमांसकुबीजविरहितां गृहीत्वा तद्भैक्षमेकान्ततो भैक्षपात्रेणान्येन वा तूष्णीं भूत्वा मात्रया भुञ्जीत।

1 उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ तै० ब्रा० २ ४

2 यास्त आसन्नसो प्राणोसोपसु कमयाभोर्त्र यातुनो मनमूल्यो गाबोसरिय विभाम्यामि तनूम्स्तुमा म छद ममस्त्र अस्तु मा मा हिं सी ॥ त० सं० ५ ५ १ १

हारीतः

मृद्दारुविदलालाबुपर्णपाणिपात्रो वा भिक्षार्थं ग्रामं प्रविशेत्। माभिच्छद्य वधामात्सुजेत्। [न विकुत्सयत्[1]] नाऽतिमात्रमभीयात्।

शङ्खलिखितौ

काष्ठालाबुविदलपार्थिवानामेकं भैक्षभाजनम्। न तस्य गोबालरज्वा सोदकं परिधर्षणम्। मात्स्यात्मिकं शौचम्। नाऽप्राचामेष भूमौ निक्षिपेत्। नाऽशुचिः संस्पृशेत्। भुक्ताऽऽचान्ताः पुनराचम्य द्रव्याण्यभ्युक्षयेयुस्तं यथान्यदविकृतं स्यात्।

यमः

हिरण्मयानि पात्राणि कपायसमयानि च।
यतीनां अन्यपात्राणि भजयत्तानि भिक्षुकः॥
सुवर्णरूप्यपात्रेषु ताम्रकांस्यायसे शुचिः[2]।
भिक्षां दत्वा न धर्मोऽस्ति गृहीत्वा नरकं व्रजेत्॥

मनुः[3]

अतैजसानि पात्राणि तस्यस्युर्निर्व्रणानि च।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे॥

नरसिंहपुराणे

[4]स्थित्यर्थमात्मनो नित्यं भिक्षाटनमाचरेत्।
सायाह्ने काले विप्राणां गृहाणि विचरेन्मुनिः॥

1 [ ] Supplied by ग and ख

2 कांस्यपात्रेषु च—ग and ख

3 ६ १

4 १ ११

उद्घाटयेच्च कवचं दक्षिणेन करेण च ।
पात्रं वामकरे स्थाप्य दक्षिणेनाऽवशोषयेत् ॥
स्यादर्धो यावदन्नेन तावद्भैक्षं समाचरेत्[1] ।
ततो निवृत्य तत्पात्रं संस्थाप्याचम्य संयमी ॥
चतुरङ्गुलैः प्रच्छाद्य ग्रासमात्रं समाहितः ।
सर्वव्यञ्जनसंयुक्तं पृथक् पात्रे निवेदयेत् ॥
सूर्यादिदेवभूतेभ्यो दत्त्वान्नं प्रोक्ष्य वारिणा ।
भुञ्जीत पर्णपुटके पात्रे वै वाग्यतो यतिः ॥
वटाश्वत्थार्कपत्रेषु कुम्भीतिन्दुकपर्णयोः ।
कोविदारकरञ्जेषु न भुञ्जीत कदाचन ॥
मलाशाः सर्व उच्यन्ते यतयः कांस्यभोजने ।
कांसिकस्य तु यत्पापं गृहस्थस्य तथैव च ॥
कांस्यभोजी यतिः सर्वं प्राप्नुयात् किल्बिषं तयोः ।
भुक्तपात्रे यतिर्नित्यं क्षालयेन्मन्त्रपूर्वकम् ॥
न दुष्येताऽस्य तत्पात्रं यज्ञेषु चमसा इव ।
अथाऽऽचम्य निरुद्धासुः उपतिष्ठेत भास्करम् ॥
जपध्यानेतिहासेषु दिनशेषं नयेद् बुधः ।
कृतसन्ध्यस्ततो रात्रिं नयेद्देवगृहादिषु ॥
हृत्पुण्डरीकनिलये ध्यात्वाऽऽत्मानमकल्मषम् ॥
यतिधर्मरतः शान्तः सर्वभूतसमो वशी ।
प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्तते ॥

[2]याज्ञवल्क्यः

अभ्यसन्नथवा वेदं न्यस्तकर्मा वने वसन् ।
अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ॥

1 Lacuna उर suppl ed by ना and ख

तथा

[1]ज्ञेयं चारण्यकमहं यदादित्यादवाप्नुयात् ।
योगशास्त्रं च यत्प्रोक्तं ज्ञेयं योगमभीप्सता ।

[1]मनुः

अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गं मिदमानन्त्यमिच्छताम् ॥

'अधियज्ञं' यज्ञविधायकं ब्राह्मणम्। 'आधिदैविकं' देवताप्रकाशकम्। 'आध्यात्मिकं "अहं मनुरभवमहं सूर्य इत्यादि" मन्त्रविशेषः वेदान्ते इत्यभिहितम् ॥

यमः

यथाशक्त्यथ विंशत्या चतुर्विंशतिमेव वा ।
प्राणायामानभ्यसेत लब्धाहारो जितेन्द्रियः ॥
अहोरात्रेण विज्ञाता [illegible] मुनिः ।
प्राणायामान् दशाऽष्टौ वा प्रायश्चित्तं विधीयते ॥
वाङ्मये यथा कुर्वीत वाच्ये विंशतिमेव च ।
मानसे त्रिंशतं कुर्याज्जपने वाऽपि यथाविधि ॥

1 [illegible]—६, ११ [illegible]
2 ६, १—८४
3 बृहदारण्यकोपनिषदि (१ ४ १)
" [illegible] । ब्रह्मसूत्रे १ १
११—" [illegible]

[1]मनुः

अह्ना रात्र्या च यान्जन्तून् हिनस्त्यज्ञानतो यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥

[2]तथा

अवेक्षेत गतीर्नॄणां कर्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥
विप्रयोगं प्रियैश्चैव संयोगं च तथाऽप्रियैः ।
जरया चाऽभिभवनं व्याधिभिश्चोपपीडनम् ॥
देहादुत्क्रमणं चाऽस्मात् पुनर्गर्भे च संभवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥
अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम् ।
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥

महाभारते

आहारार्थं कर्मकुर्यात्। निन्द्यं कुर्यात्। आहारं प्राण संधारणार्थम् प्राणाधार्यास्तत्त्वजिज्ञासार्थम्। तत्त्वं जिज्ञासं येन भूयान्नभूयः[3]।

1 ६, ६९-७१
2 ६, ६१-६५
3 वी मि मोक्ष ८५ adds—एवं धर्मान्तरमेव सिद्धिरित्युक्तम्

[1]भूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे वसन् ।
समः सर्वेषु भूतेषु न लिंगं धर्मकारणम्[2] ॥
फलं कतकवृक्षस्य यद्यप्यम्बु प्रसादकम् ।
न नाम ग्रहणादेव तस्य वारि प्रसीदति ॥

तथा

अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥

[3]याज्ञवल्क्यः

न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि हि[4] मुच्यते ॥

महाभारते

कस्यैषा वाग्भवेत् सत्या मोक्षो नास्ति गृहादिति ।
अश्रद्दधानैरप्राज्ञैः सूक्ष्मदर्शनवर्जितैः ॥
अलसैरधनैरल्पैः स्तप्यमानैः स्वकर्मभिः ।
शमस्योपरमो दृष्टः प्रव्रज्यायामपण्डितैः ॥

'शमस्य' सर्वस्य ।

[5]मनुः

एष धर्मोऽनुशिष्टो वै यतीनां नियतात्मनाम् ।
वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥

1 Ascribed to Manu wrongly by वी मि मोक्ष ८५
2 धर्मकारणम्—म
3 ३, २०५
4 विमुच्यते for हि मुच्यते इति अपरार्कः
5 ६. ८६ ८६

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रमनुष्ठिता॰ ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ॥
यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम् ।
तथैवाऽऽश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥
चतुर्भिरपि चाऽप्येतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
ह्रीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥
दश लक्षणानि धर्मस्य ये विप्राः समधीयते ।
अधीत्य चाऽनुवर्तन्ते ते यान्ति परमां गतिम् ॥
दशलक्षणकं धर्ममनुतिष्ठन् समाहितः ।
वेदान्तान् विधिवच्छ्रुत्वा सन्न्यसेदनृणो द्विजः ॥
सन्न्यस्य सर्वकर्माणि कर्मदोषानपानुदन् ।
नियतो वेदमभ्यस्यन् पुत्रैश्वर्ये सुखं वसेत् ॥
एवं सन्न्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः ।
सन्न्यासेनाऽपहत्यैनः प्राप्नोति परमां गतिम् ॥

इति श्रीमद्भट्टहृदयधरात्मज श्रीलक्ष्मीधरविरचिते कृत्यकल्पतरौ
मोक्षकाण्डे यतिधर्माः ।

॥ ८ ॥

अथ वैराग्यम्

तत्र महाभारते

वैराग्यं पुनरेतस्य मोक्षस्य परमो विधिः ।
ज्ञानादेव च वैराग्यं जायते येन मुच्यते ॥

'परमो विधिः' परमं साधनम्। 'ज्ञानात्' संसारस्य दुःखमयत्वादिविज्ञानात्।

अथ वैराग्यहेतवः। तत्र तापभेदाः। तत्र विष्णुपुराणे[1]।

आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः ।
[2]उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥

आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ।

शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ।
शिरोरोगप्रतिश्याय[3] ज्वरशूलभगन्दरैः ॥
[4]श्विद् कासश्वासस्फतुच्छर्द्यादिभिरनेकधा ।
तथाऽक्षिरोगातीसारकुष्ठाद्यामयसंज्ञितैः ॥

1 ६, ५, १—४
2 °त्पन्नज्ञानवैराग्यः —ख
3 प्रतिश्याय—पीनस
4 गोरखपुर मि ५ ए ५११ reads—
गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ।

भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि[1] ।
कामक्रोधभयद्वेषलोभमोहविषादजः ॥
शोकासूयावमानेर्ष्यामात्सर्यादिमयस्तथा ।
मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा ॥
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ।
मृगपक्षिमनुष्यैश्च पिशाचोरगराक्षसैः ॥
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः ।
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ॥
तापो द्विजवर श्रेष्ठैः कथ्यते चाऽऽधिदैविकः ।
गर्भजन्मजराज्ञानमृत्युनारकजं तथा ॥
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ।
सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते ॥
उल्बसंवेष्टितो भग्नपृष्ठग्रीवास्थिसंहतिः ।
अत्यम्लकटुतीक्ष्णोष्णलवणै [2]र्मातृभोजनैः ॥
अतितापिभिरत्यर्थं वर्धमानातिवेदनः ।
प्रसारणाकुञ्चनादौ नाऽङ्गानां प्रभुरात्मनः ॥
शकृन्मूत्रमहापङ्कशायी सर्वत्र पीडितः ।
निरुच्छ्वासः सचैतन्यः स्मरञ्जन्मशतान्यथ ॥
आस्ते [3]गर्भेऽतिदुःखेन निजकर्मनिबन्धनः ।
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ॥
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ।
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ॥

1 इच्छसि इति उ. मातृका
2 मातृभोजनै—उ. मा.
3 cf. गर्भोपनिषद् and भागवत ३.३१

क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ।
मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना ॥
विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम ।
कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः ॥
पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा ।
कण्डूयनेऽपि चाऽशक्तः [1]परिवर्तेऽप्यनीश्वरः ॥
स्तनपानादिकाहारमप्याप्नोति परेच्छया ।
अशुचिस्रस्तरे सुप्तः कीटदंशादिभिः सदा ॥
भक्ष्यमाणोऽपि नैतेषां समर्थो विनिवारणे ।
जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च ॥
बालभावे यदाप्नोति आधिभौतादिकानि च ।

'तापत्रयं' दुःखत्रयम् । 'उत्पन्नज्ञानवैराग्यः' उत्पन्ने ज्ञानवैराग्ये यस्य सः तथा । ज्ञानं चात्र ब्रह्मविषयकम् । 'आत्यन्तिका लयो' मोक्षः ।

<u>तथा</u>

महातमसाऽऽच्छन्नो मूढान्तःकरणो नरः ।
न जानाति कुतः कोऽहं क्वाऽहं गन्ता किमात्मकः ॥
केन बन्धेन बद्धोऽहं कारणं किमकारणम् ।
किं कार्यं किमकार्यं वा किं वाच्यं किं च नोच्यते ॥
कोऽधर्मः कश्च वै धर्मः कस्मिन् वर्तेत वा कथम् ।
किं कर्तव्यमकर्तव्यं किं वा किं गुणदोषवत् ॥
एवं पशुसमैर्मूढैरज्ञानप्रभवं महत् ।
अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः ॥

अज्ञानं तामसो भावः कार्यारम्भप्रवृत्तयः ।
अज्ञानिनां प्रवर्तन्ते कर्मलोभाश्च भो द्विज ॥
नरकं कर्मणां लोपे फलमाहुर्मनीषिण ।
तस्मादज्ञानिनां दुःखमिह चाऽमुत्र चोत्तमम् ॥
जराजर्जरदेहश्च शिथिलावयवः [1]पुमान् ।
विगलच्छीर्णदशनो वलिस्नायुशिराकृत ॥
दूरप्रणष्टनयनो व्योमान्तर्गततारकः ।
नासाविवरनिर्यातलोमपुञ्जश्चलद्वपुः ॥
प्रकटीकृतसर्वाङ्गो नतपृष्ठास्थिसंहतिः ।
प्रशान्तजठराग्नित्वादल्पाहारोऽल्पचेष्टित ॥
कृच्छ्राच्चङ्क्रमणोत्थानशयनासनचेष्टितः ।
मन्दीभवच्छ्रोत्रनेत्रो गलल्लालाविलाननः ॥
अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः ।
तत्क्षणेऽप्यनुभूतानामस्मर्ताऽखिलवस्तुनाम् ।
सकृदुच्चारिते वाक्ये समुद्भूतमहाश्रम ॥
श्वासकासमहायाससमुद्भूतप्रजागरः ।
अन्येनोत्थाप्यतेऽन्येन तथा संवेद्यते जरी ॥
भृत्यात्मपुत्रदाराणामपमानपराकृतः[2] ।
प्रक्षीणाखिलशौचश्च विहाराहारसस्पृह ॥
हास्यः परिजनस्याऽपि निर्विण्णाशेषबान्धवः ।
अनुभूतमिवाऽन्यस्मिन् जन्मन्यात्मविचेष्टितम् ॥
संस्मरन् यौवनेऽत्यर्थं निश्वसित्यतितापितः ।
एवमेतानि दुःखानि जरायामनुभूय वै ॥

1 भ्रमन्—इति मुद्रित पाठ —शि पु कलकत्ता पृष्ठम् ८२९
2 वास्त्रीकृत —मु शि पु पृ ५१५

मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ।
श्लथग्रीवाङ्घ्रिपादोऽथ व्याप्तो वेपथुना नरः ॥
मुहुर्ग्लानीपरवशो मुहुर्ज्ञानलवान्वितः ।
हिरण्यधान्यतनयभार्याभृत्यगृहादिषु ॥
एते कथं भविष्यन्तीत्यतीव ममताकुलः ।
मर्मभिद्भिस्तथा रोगैः क्रकचैरिव दारुणैः ॥
शरैरिवाऽन्तकस्योग्रैश्छिद्यमानासुबन्धनः ।
विवर्तमानताराक्षिर्हस्तपादं मुहुः क्षिपन् ॥
संशुष्यमाणताल्वोष्ठपुटो घुरघुरायते ।
निरुद्धकण्ठो दोषौघैः उदानश्वासपीडितः ॥
तापेन महता व्याप्तः तृषा चाऽऽर्तस्तथा क्षुधा ।
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीडितः ॥
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते ।
एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम् ॥

'कार्यारम्भप्रवृत्तयो' ऽत्र निषिद्धकाम्यगोचराः । 'कर्मलोपो' नित्यनैमित्तिकाकरणम् ।

देवलः

यद्दुःखं म्रियमाणस्य यद्दुःखं मातुराशये ।
नाऽन्यत्र ह्युपमा लोके जीवतामन्तरे तयोः ॥

विष्णुपुराणे

[1]गर्भवासादि यावत्तु पुनर्जन्मोपपादनम् ।
समस्तावस्थकं तावद्दुःखमेव हि देहिनाम् ॥

१ १ १ ५१

क्षुत्तृष्णोपशमं तद्वच्छीताद्युपशमं सुखम् ।
मन्यते बालबुद्धित्वात् दुःखमेव हि तत्पुनः ॥
अत्यन्तस्तिमिताङ्गाना व्यायामेन सुखैषिणाम् ।
भ्रान्तिज्ञानावृताक्षाणां[1] प्रहारोऽपि सुखायते ॥

तथा

[2]अग्नेः शीतेन तोयस्य तृषा भक्तस्य च क्षुधा ।
क्रियते सुखकर्तृत्वं तद्वि लोपस्य चेतरैः ॥

तथा

[3]नरके यानि दुःखानि पापहेतूद्भवानि वै ।
प्राप्यन्ते नारकैर्विप्र तेषां संख्या न विद्यते ॥
न केवलं द्विजश्रेष्ठ नरके दुःखपद्धतिः ।
स्वर्गेऽपि तात भीतस्य क्षयिष्णोर्नास्ति निर्वृतिः ॥
पुनश्च गर्भे भवति जायते च पुनः पुनः ।
गर्भे विलीयते भूयो जायमानोऽस्तमेति च ॥
जातमात्रश्च म्रियते बालभावेऽथ यौवने ।
मध्यमं वा वयः प्राप्य वार्धके च ध्रुवा मृतिः ॥
यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः ।
तन्तुकारणपक्ष्मौघैरास्ते कार्पासबीजवत् ॥
द्रव्यनाशे तथोत्पत्तौ पालने च सदा नृणाम् ।
भवन्त्यनेकदुःखानि तथैवेष्टविपत्तिषु ॥
यद्यत्प्रीतिकरं पुंसां वस्तु मैत्रेय जायते ।
तदेव दुःखवृक्षस्य मूलत्वमुपगच्छति ॥

1 मभारणम्—मुद्रि लि पु पाठ क्रमपत्र दृष्टम् १६७
2 १ १० ६४
3 विष्णुपुराणे ६, ५, ४९—६

कलत्रमित्रपुत्रात्मगृहक्षेत्रधनादिकैः ।
क्रियते न तथा भूरि सुखं पुंसां यथा सुखम् ॥
इति संसारदुःखार्कतापतापितचेतसाम् ।
विमुक्तिपादपच्छायां मृते कुत्र सुखं नृणाम् ॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डिते ।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः ॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा ।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥
तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने ॥

पक्ष्मौधे 'रघुसमूहैः' 'निरस्तातिशयाह्लादसुखभावैकलक्षणा' निरतिशयसुखस्वरूपः । 'आत्यन्तिकी' सर्वमतीत्यार्थः पदे स्थिता ।

अथाऽनित्यता

तत्र विष्णुः[1]

एवमस्मिन्निरालम्बे काले सततयायिनि ।
न तद् भूतं प्रपश्यामि स्थितिर्यस्य भवेद् ध्रुवा ॥
गङ्गायाः सिकता धारास्तथा वर्षति वासवे ।
शक्या गणयितुं लोके न व्यतीताः पितामहाः ॥
चतुर्दश विनश्यन्ति कल्पे कल्पे सुरेश्वराः ।
सर्वलोकप्रधानाश्च मनवश्च चतुर्दश ॥
बहूनीन्द्रसहस्राणि दैत्येन्द्रनियुतानि च ।
विनष्टानीह कालेन मनुजेष्विह का कथा ॥

1 विष्णुस्मृति, १ २०

गजगगम पाय मर्वे ममुदिता गुणै ।
दृष्ट्वा प्रमगमगभाय पाम्नि निपन गता ॥
य ममगा जगाम्मिन गम्मिगगागगगा ।
मन्नि पाम्न गीगन पाग्ग ति 'पाम्पतार ॥

महाभारत

अनिभान्तमनाम्न्यं अगाधगमन्निगम ।
मम पान्तागमन्गान पगमरा गमिन्गगि ॥
गन्न निगत्र गिरगनिमम्नगण
प्रगतनिव भगनागाधिनि: ।
गमा मगान भयमिपापनीगम
मदा च दारा च गुना च पान्पगा ॥
निगपिनान्न भुपगीगिगम
किं पपुर्भिमिग्गगिमय ।
पितग गोगगनि गपमप
रतान गग्गा न निपतन्न च ॥
कि न पनै किं नव पपुनिपा
कि न नगिमागग गा मनिन्गगि ।
भागमानमिन्गंध गुर्ग मपिर्ग
गिमामगगम च गगा गिगा च ॥
गुग्गगगानिपगाम्नगन दमान गगगगि गगगुना ।
कपे न मागिन निपन गगग गि दुग्गं नच ।
मनगगगानिन गुग्गु गर्व गगगगं नगर ॥
मागगगनि म गपन गिगगगगगगगगिगा ।
प न नुपव निगगा गुणुगोन नविनगनि ॥

विमूढेन्द्रियवर्गस्य स तु नार्थं करिष्यति ।
बहुकृत्यो निरुद्योगः जागर्तव्ये प्रसुप्तकः ॥
विमर्भकमयस्थाने हा पुत्रक विहन्यसे ।
मृत्योर्बिभेषि किं मृत्युर्न स भीतं विमुञ्चति ॥
अजातं नैव गृह्णाति कुरु यत्नमजन्मनि ।
महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ॥
पारं क्लेशोदधेर्गन्तुं त्वर यावन्न भिद्यते ।
एवमत्याहिते लोके कालेनोपनिपीडिते ॥
सुमहद्धैर्यमास्थाय मनो मोक्षे निवेशयेत् ।

'अदैशिकं' मार्गोपदेशरहितम् । 'तमः कान्तारं' तमसा दुर्गम् । 'स्थिरनिश्चयेक्षणः' स्थिरो निश्चेष्टो निश्चयेक्षणश्चासौ स तथा । 'गुहां प्रविष्टं' दहरविद्योपदिष्टम्[1] ।

अथ विषयनिन्दा

तत्र महाभारते

विषयाणां च दौरात्म्यादिन्द्रियाणां च चापलात् ।
मनसश्चाप्यवस्थानात्सर्वः कृच्छ्रेषु वर्तते ॥
विषयान् प्रत्यनुसरन् प्राप्नोति सुमहद्भयम् ।
श्येनच्छायामनुपतन् कपिञ्जल इवाऽऽतपे ॥
जन्मान्तरशताभ्यस्ता विषयेषु रतिर्नृणाम् ।
जरद्गौरिव सस्येषु सा हि दुःखेन वार्यते ॥

1 Cf. छान्दोग्योपनिषत्— ८ १
अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म । दहरोऽस्मिन्नन्तराकाशः तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम् । [illegible]

देवलः

सुखानि यानि तान्येव मोक्तव्यानि पुनर्भवैः ।
इति दृष्टार्थतत्त्वस्य पुनरुक्तमिदं जगत् ॥

महाभारते

इषुप्रपातमात्रं हि स्पर्शयोगे रतिस्स्मृता ।
दर्शने रसने घ्राणे श्रवणे च विशेषतः ॥
ततोऽस्य जायते तीव्रा वेदना तत्क्षणात्मिका ।
कण्ठनालात्प्रलुठितं स्वादुस्वाद्वशनं समम् ॥
आस्वाद्यस्य हि सर्वस्य जिह्वाग्रे सन्धिविग्रहः ।
दिवसे दिवसे चैव रात्रौ रात्रौ तथा सदा ॥
'मोक्तव्यमिति यत्तन्तो (?) वोपबुद्धि' स उच्यते ।
जिह्वोपस्थनिमित्तं हि पतनं सर्वदेहिनाम् ॥
अहेरिव गणाद्भीतो मिष्टान्नाच्च विषादिव ।
राक्षसीभ्य इव स्त्रीभ्य स विद्यामधिगच्छति ॥

'इषुप्रपातमि'त्यल्पकालोपलक्षणम् ।

तथा

[1]मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनो नित्यास्तांस्तितिक्षस्व भारत ॥
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥

'मात्रास्पर्शाः' विषयसम्बन्धाः ।

1 भगवद्गीता, २ १४–१५

दक्षः

विषयासक्तचित्तस्तु कश्चिन्मोक्षं न विन्दति ।
यत्नेन विषयासङ्गं तस्माद्योगी विवर्जयेत् ॥

मार्कण्डेयपुराणे

[1]हासोऽस्थिसन्दर्शनमक्षियुग्म
मत्युज्ज्वलं तर्जनमङ्गनायाः ।
कुचादि पीनं पिशितं घनं तत्
स्थानं रतेः किं नरकं न योषित् ॥

महाभारते

यस्य जिह्वा सहस्रं स्याज्जीवेच्च शरदां शतम् ।
अनन्यकर्मा स्त्रीदोषाननुक्त्वा निधनं व्रजेत् ॥
अङ्गारसदृशी नारी घृतकुम्भसमः पुमान् ।
ये ऽत्र सक्ता विलीनास्ते ये स्थितास्ते दिवं गताः ॥
न सुखेन जयेन्निद्रां न पानेन तृषां जयेत् ।
नेन्धनेन जयेदग्निं न कामेन स्त्रियं जयेत् ॥
यान्येव मलवाहीनि पूतिच्छिद्राणि योषिताम् ।
तान्येव खलु काम्यानि अहो पुंसां विडम्बना ॥
येषु येषु प्रदेशेषु कायोऽत्यन्तजुगुप्सितः ।
तेषु सक्तरतो लोको वैराग्यं केन यास्यति ॥
स्त्री नाम मायाविकृतिः कोपमात्सर्यविग्रहम् ।
दूरात्त्यजेयनार्यां तां स्वल्पनामेष्यपवक्रुषः ॥

1 १५, १ [2] तत्सर्वं समग्र (?) इति अस्मत्पुर मातृकालम्

अथाऽर्थनिन्दा

तत्र महाभारते

[1]अर्थानामार्जने दुःखमार्जितानां च रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थान् शोकवर्धनान् ॥
विमोहयन्ति सम्पत्सु तापयन्ति विपत्तिषु ।
खेदयन्त्यर्जने काले कदा भोगाः सुखावहाः ॥
यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।
भक्ष्यते सलिले मत्स्यैः तथा सर्वत्र वित्तवान् ॥
राजतः सलिलादग्नेश्चौरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥

तथा

कार्पण्यदर्पमानौ च भयं वा भ्रममेव च ।
अर्थजान्विविदुः प्राज्ञा दोषानेतांस्तु देहिनः ॥
अर्थलोभेन पुरुषैर्वपुः स्त्रीभिरिव स्वयम् ।
आत्मा सत्कृत्य संस्कृत्य परोपकरणीकृतः ॥

तथा

सम्पदः प्रमदाश्चैव तरङ्गोत्सङ्गभङ्गुराः ।
कस्यात्यहिफणच्छत्रच्छायास्विव रमेद्बुधः ॥
को हि नाम श्रियं वाञ्छेत् कृपणां विपदामिव ।
सविषस्येव पानस्य यस्य मत्तमनो मदः ॥
नैषा गुणेषु रमते नैर्गुण्याच्च निवसति ।
उन्मत्ता नारिवाऽन्धा श्रीः क्वचिदप्यवतिष्ठते ॥

1 अनु. १४८ १७

पद्मा:

विषयासक्तचित्तस्तु कश्चिन्मोक्षं न विन्दति ।
यत्नेन विषयासङ्ग तस्माद्योगी विवर्जयेत् ॥

मार्कण्डेयपुराणे

[1]हासोऽस्थिसन्दर्शनमक्षियुग्म
मस्पुज्ज्वल तर्जनमङ्गनायाः ।
कुचादि पीनं पिशितं घनं तत्
स्थान रते: किं नरकं न योषित् ॥

महाभारते

यस्य जिह्वा सहस्रं स्याज्जीवेच्च शरदां शतम् ।
अनन्यकर्मा स्त्रीदोषाननुक्त्वा निधनं व्रजेत् ॥
अङ्गारसदृशी नारी घृतकुम्भसमः पुमान् ।
ये ऽत्र सक्ता विलीनास्ते ये स्थितास्ते दिवं गताः ॥
न सुखेन जयेन्निद्रां न पानेन तृषां जयेत् ।
नेन्धनेन जयेदग्निं न कामेन स्त्रियं जयेत् ॥
यान्येव मलवाहीनि पूतिछिद्राणि योषिताम् ।
तान्येव खलु काम्यानि अहो पुंसां विडम्बना ॥
येषु येषु प्रदेशेषु कायोऽत्यन्त जुगुप्सितः ।
तेषु सक्तमनो लोको वैराग्यं केन यास्यति ॥
स्त्री नाम मायाविकृतिः क्रोधमात्सर्यविग्रहम् ।
दूरतस्त्यजेत्प्राज्ञो तां श्वस्नामेध्यवद्बुधः ॥

1 २० १० तच्छ्रुतं कल्पम (?) इति बलवत्पुर मातृकायाम्

[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

[illegible] ।

[illegible]

[illegible] ।
[illegible] ।
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।

अचेष्टमानमासीनं श्रीः कञ्चिदुपतिष्ठते ।
कश्चित् कर्माणि कुर्वन्निह न प्राप्यमधिगच्छति ॥

तथा

सार्वभौमश्च यो राजा यात्रामात्रपरश्च य ।
उपभोगस्तयोस्तुल्य क्लेशधर्मौ तु विस्तरौ ॥

अथ पुत्रदारादिनिन्दा

तत्र महाभारते

संचिनोत्यशुभं कर्म कलत्रापेक्षया नरः ।
एकः क्लेशानवाप्नोति परत्रेह च दुःखितः ॥
पुत्रदारकुटुम्बेषु मग्नाः सीदन्ति जन्तवः ।
सरःपङ्कार्णवे मग्नाः जीर्णा वनगजा इव ॥
पुत्रनाशेऽर्थनाशे वा ज्ञातिसंबन्धिनामपि ।
प्राप्यते सुमहद्दुःखं दावाग्निप्रतिमं विभो ॥

तथा

माता पितृसहस्राणि पुत्रदारशतानि च ।
अनुभूतानि संसारे कस्य ते कस्य वा वयम् ॥
व्रजमानो यथाऽध्वानं छायामाश्रित्य विश्रमेत् ।
विश्रम्य च पुनर्गच्छेत्तद्भूतसमागमः ॥
महद्जेन विरज्यन्ते पत्ररागेण पादपाः ।
अन्यनाऽन्यस्य विश्लेषः कथन्नु न भविष्यति ॥
यायमत्यन्तसंवासः कस्यचित् केनचित्सह ।
अपि स्वेन शरीरेण किमुताऽन्यैः पृथग्जनैः ॥

॥ ९ ॥

अथ कामादिवर्जनम्

तत्र <u>महाभारते</u>

[1]हृदि कामद्रुमश्चित्रो मोहसंचयसंभवः ।
क्रोधमानमहास्कन्धो विचिकित्सात्वगावृतः ॥
तस्य चाऽज्ञानमाधारः प्रमादः परिषेचनम् ।
अभ्यसूयापलाशो हि पूर्वदुष्कृतसारवान् ॥
संमोहस्कन्धविटपः शोकशाखाभयङ्कर ।
मोहिनीभिः पिपासाभिर्लताभिः परिवेष्टितः ॥
तस्याऽनुशयमूलस्य मूलमभ्युद्धरेद्बलात् ।
त्यागप्रसादतीक्ष्णेन सौम्येन परमासिना ॥

'सौम्येन' शान्तिकरेण ।

<u>हारीत</u>

संकल्पात् कामः संभवति । आशायाश्च वर्द्धते लेहाग्नि वभाति स ह तृष्णालक्षणोऽनेकविध कामो येनाऽभिभूतः । मत्स्य इव कामानां लोको ह्यनेन जन्मसंसारकामावर्ते निमज्जति । स एषोऽनन्तः कामः 'कामो हि भगवान् वैश्वानर' इति श्रुतिः । तस्याऽसंकल्पो नियमनम् ।

1 हृदिकामद्रुमाश्चित्रो—स भा

सुहृज्ज्ञातिसजातीयैर्यथोरु-
क्षीणे वित्ते त्यज्यते मानवो हि ।
तथा तस्मिन् क्षीणपुण्यं मनुष्य
त्यजन्ति सर्वे सेश्वरा देवसंघाः ॥

'रजसा च प्रधर्षणं' रजोगुणेनाऽभिभवः ।

मार्कण्डेयपुराणे

[1]स्वर्गेऽपि दुःखमतुलं यदारोहणकालतः ।
प्रभृत्यहं पतिष्यामीत्येतन्मनसि वर्तते ॥
नरकांश्चापि सम्प्रेक्ष्य महद्दुःखमवाप्यते ।
एतां गतिमहं गन्तेत्यहर्निशमनिर्वृतः ॥

1 ११ २१

विष्णुपुराणे

[1]मूढानामेव भवति क्रोधो ज्ञानवतां कुतः ।
हन्यते तात कः केन यतः स्वकृतभुक् पुमान् ॥

महाभारते

न पण्डितः क्रुध्यति नाऽभिपद्यते
न चाऽपि संसीदति न प्रहृष्यति ।
न चाऽतिकृच्छ्रव्यसनेषु शोचति
स्थितः प्रकृत्या हिमवानिवाऽचलः ॥

श्रीरामायणे[2]

धन्यास्ते पुरुषव्याघ्र ये बुद्ध्या कोपमुत्थितम् ।
निरुन्धन्ति महात्मानो दीप्तमग्निमिवाऽम्भसा ॥

[3]महाभारते

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
धूमेनाऽऽव्रियते वह्निर्यथाऽऽदर्शो मलेन च ।
यथोल्बेनाऽऽवृतो गर्भस्तथा तेनेदमावृतम् ॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणाऽनलेन च ॥

1 १ १ १७
2 सुन्दरकाण्डे ५५, ४
3 भगवद्गीता ३ ३६—४१

महाभारते

सर्वोपायेन कामस्य क्रोधस्य च विनिग्रहः ।
कार्यः श्रेयोर्थिना तौ हि श्रेयोविघातार्थमुद्यतौ ॥
स्वादुकामुककामानां वैतृष्ण्यं किं न वाञ्छसि ।
मधु पश्यसि दुर्बुद्धे प्रपातं किं न पश्यसि ॥
यथा भजति कामानां तत्सुखस्याऽतिपूर्यते ।
कामानुसारी पुरुषः कामननुविनश्यति ॥
यः कामानाप्नुयात् सर्वान् यश्चैतान् सकलांस्त्यजेत् ।
प्रापणात् सर्वकामानां परित्यागो विशिष्यते ॥

मार्कण्डेयपुराणे

[1]कामः सर्वात्मना हेयो हातुं चेत् स न शक्यते ।
[2]मुमुक्षां प्रति कार्यः स स वै तस्याऽपि भेषजम् ॥

हारीतः

क्रोधाग्निनाभिभूतः, स्वेषामप्यबहुमतो, नाऽभिगमनीयोऽविश्वसनीयश्च भवति। कार्याकार्यवाच्यावाच्यानि न वितर्कयति। हितवादिनो गुरूनप्यतिक्रामत्यस्याविद्यः। प्रेतलोकापाऽऽस्मानं नयति। तत्र घोरां निरयप्रायां यातनामनुभूय क्रूरकव्यादासु तिर्यग्योनिषु जायते। तत्र सर्वासां प्रजानां वध्यो भवति। क्रमात् मनुष्यतां प्राप्य सर्वजनविद्विष्टतामुपैति। क्रोधो हि तमोरूपस्तस्य क्षमा नियमनम्।

1 १ २४
2 प्रतिपाद्य ए; प्रतिमन्तर्व —मा.

विष्णुपुराणे

[1]मूढानामेव भवति क्रोधो ज्ञानवतां कुतः ।
हन्यते तात कः केन यतः स्वकृतभुक् पुमान् ॥

महाभारते

न पण्डितः क्रुध्यति नाऽभिपद्यते
न चाऽपि संसीदति न प्रहृष्यति ।
न चाऽर्थकृच्छ्रव्यसनेषु शोचति
स्थितः प्रकृत्या हिमवानिवाऽचलः ॥

श्रीरामायणे[2]

धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् ।
निरुन्धन्ति महात्मानो दीप्तमग्निमिवाऽम्भसा ॥

[3]महाभारते

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
धूमेनाऽऽव्रियते वह्निर्यथाऽऽदर्शो मलेन च ।
यथोल्बेनाऽऽवृतो गर्भस्तथा तेनेदमावृतम् ॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणाऽनलेन च ॥

1 १ १ १७
2 सुन्दरकाण्डे ५५, ४
3 भगवद्गीता ३ ३६—४१

इन्द्रियाणि मनो बुद्धिरस्याऽधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

तथा [महाभारते]

एको लोभो महाग्राहो लोभात् पापं प्रजायते ।
ततः पापावधः प्राप्तिस्ततो दुःखं प्रपद्यते ॥
पापानां विध्यधिष्ठानं लोभमेकं नराधिप ।
लोभात्पापानि कुर्वन्ति सुविद्वांसोऽपि मानवाः ॥
क्रोधो लोभश्च निन्दा च पैशुन्यं मत्सरस्तथा ।
पञ्चैतानि राजेन्द्र लुब्धानामकृतात्मनाम् ॥
असन्तोषोऽसुखायैव लोभादिन्द्रियविभ्रमः ।
ततोऽस्य नश्यते प्रज्ञा विद्येवाऽभ्यासवर्जिता ॥

देवलः

अथातः पापदोषान् मनोवाक्यशरीरजान् व्याख्या स्यामः । तत्र मोहरागद्वेषमानलोभमदशोकममत्वाऽहंकारभयहर्ष [1]मोघचिन्ताश्चेति द्वादश मानसाः ।

तेषां च त्रिविधो मोहस्तमयः सर्वपाप्मनाम् ।
अज्ञानं संशयज्ञानं मिथ्याज्ञानमिति त्रिकम् ॥
विज्ञानं सर्वविद्यानामर्थानां स्वयमूहनम् ।
दोषैरधषणं चेति ज्ञानमज्ञानमन्यथा ॥
अमेयःमेयतोर्मध्ये भ्रमणे संशयो भवेत् ।
मिथ्याज्ञानमिति प्राहुरहिते हितदर्शनम् ॥

1 मोघचिन्ताश्च—न ब

भवत्यधर्मादज्ञानमविद्यातश्च संशयः ।
उभाभ्यामन्यथा ज्ञान पापिष्ठमुपजायते ॥
अज्ञानाद्दुःखसंप्राप्तिः संशयादूष्यते पुनः ।
मिथ्याज्ञानात्पतत्येव मूढस्तामिस्रयोनिषु ॥
आवृत्ता विषयाः सर्वे दोषैर्दोषैर्यथा तनुः ।
गुणतो हृदि तान्कृत्वा रागो रागस्य लक्षणम् ॥
[1]स सन्निकर्षादज्ञानात् सङ्कल्पादभिमानतः ।
सुखाच्च जायते रागो विषयेषु शरीरिणाम् ॥
ज्ञानद्वेषावसामर्थ्यात् क्लेशादन्यप्रसंगत ।
वियोगात् कालतः शोकात् धर्माच्च विनिवर्त्तते ॥
निवर्तते चेद्रागोऽयं शुभो द्वेषादिहेतुभिः ।
भूयो ह्युत्पद्यते सङ्गात् ज्ञानान्नश्यति केवलम् ।
अतिप्रसक्तो भोगेषु रागो भवति दोषकृत् ॥
परस्त्रीषु परस्वेषु किञ्चित् प्रार्थनयाऽपि च ।
रोषोऽमर्षोऽभ्यसूया च द्रोहो मिथ्या वितर्कितम् ॥
दुःखार्हं क्षेति दोषैर्दोषः द्वेषोऽभिधीयते ।
य उष्मा हृदये जन्तोः समुत्तिष्ठति वैकृतः ॥
पराभिद्रवचिकीर्षायां स रोष इति सञ्ज्ञितः ।
पुराभावसमुत्थेन दोषेणैवाऽभिदेशितः ॥
किञ्चिद्दृष्ट्वैव यो द्वेषस्तदमर्षस्य लक्षणम् ।
परस्य दृष्ट्वा श्रुत्वा वा स्वगुणाभ्यधिकान्गुणान् ॥
नाऽभिनन्दति यो ब्रूयात् साऽभ्यसूयेत्युदाहृता ।
सुहृदामपि यो नित्यमर्थानपि जिघांसति ॥

1 Lacuna from स सन्निकर्षात् to शोकाद्धर्मात् विनिवर्तते

असौहृदमतिः पापस्तथा द्रोहलक्षणम् ।
य साधूनपदोषांश्च मन्यते दोषकारिणः ॥
मिथ्या वितर्कितं चेति तथाहुर्मोहदोषजम्[1] ।
लोभाद्द्वेषाच्च सङ्कल्पः चिन्तनं पापकर्मणाम् ॥
दुःखाहमिति विज्ञेयं पूर्वदुष्कृतसम्भवम् ।
दुःखाद्दुष्टाभिघाताच्च दोषोऽय षड्विधो भवेत् ॥
मानात् कालात्ययात् धर्मात् प्रीतेश्च विनिवर्तते ।

<u>विष्णुपुराणे</u>

[2]तापत्रयेणाऽभिहतं य एतदखिलं जगत् ।
तदाऽशोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः ॥
अथ भद्राणि भूतानि हीनशक्तिरहं परम् ।
मुदं तथाऽपि कुर्वीत हानिर्द्वेषफलं यतः ॥
[3]सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुत ॥

<u>देवल</u>

असत्यग्रहणं तापो वेपथुर्मानसंप्लवः ।
स्वेदोऽक्षिरोगः पारुष्यं मानश्च द्वेषदोषजाः ॥
सर्वतोत्कृष्टमात्मानं सर्वेभ्यो यो नियच्छते ।
समान इति विज्ञेयो यथावत्स्पष्टवाक्क्रियः ॥
परार्थं परभोगांश्च परसामर्थ्यमेव च ।
दृष्टा श्रुत्वा च या तृष्णा जायते लोभ एव च ॥

1 मोहम्—ग and म
2 १ १
3 १ ११ १

नास्ति तृष्णासमं दुःखं नास्ति त्यागसमं सुखम् ।
तस्मात्तु लोभसञ्जातां तृष्णां विद्वान् परित्यजेत् ॥
प्राप्यापि मेदिनीं कृत्स्नां तृष्णा नाऽस्य प्रशाम्यति ।
विवर्द्धते हि भूयोऽपि सा शिखेव विभावसोः ॥
दुःखादित्वात् दुरन्तत्वात् अधर्मत्वादतृप्तितः ।
पश्चाच्छोकावहत्वाच्च न कश्चित्प्रेयसी तृषा[1] ॥

वृद्धशातातपः

यस्तृष्णा शमयेत्क्षौभैर्दीर्घैरुत्तरलङ्घनम् ।
पुरो दीर्घा पदन्यासे छाया सायन्तनीमिव ॥

[2]विष्णुपुराणे

[3]मनोरथानां न समाप्तिरस्ति
वर्षायुतेनाप्यथवाब्दलक्षैः ।
पूर्णेषु पूर्णेषु पुनर्नवानाम्
उत्पत्तयः सन्ति मनोरथानाम् ॥
पद्भ्यां गता यौवनिनश्च जाता
दारैश्च संयोगमिता प्रसूताः ।
दृष्टाः सुतास्तत्तनयप्रसूतिं
द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा ॥
द्रक्ष्यामि तेषामपि चेत्प्रसूतिं
मनोरथो मे भविता ततोऽन्यः ।
पूर्णेऽपि तत्राप्यपरस्य जन्म
निवार्यते केन मनोरथस्य ॥

1 [illegible]
2 [illegible]
3 [illegible]

आमृत्युतो नैव मनोरथाना
मन्तोऽस्ति विज्ञातमिदं ममाद्य ।
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमार्थसङ्गम् ॥
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाऽप्यनुदिनं तृष्णा मम तेष्वेव जायते ॥
तस्मादेतानहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥

महाभारते

तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी मता ।
अधर्मबहुला चैव घोरा पापानुबन्धिनी ॥
आशा हि पुरुषं बाल नाऽऽलापयति तस्थुषी ।
तस्माद्विकल्पमासाद्य भयो मृत्युर्न संशयः ॥
आसन्नान् परतो भावान् दर्शयित्वा पदे पदे ।
छागो हरितमुष्ट्येव दूरं नीतोऽस्मि तृष्णया ॥
यौवनं जरया ग्रस्तमारोग्यं व्याधिभिर्हतम् ।
जीवितं मृत्युरभ्येति तृष्णैका निरुपद्रवा ॥
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
जीवन जीर्यतः सर्वं तृष्णैका तु न जीर्यते ॥
यथा शृङ्गं नरो काले वर्धमानस्य वर्द्धते ।
एवं हि तृष्णा वित्तेन वर्धमानेन वर्द्धते ॥
अकर्मण्यपि साऽऽजीवत् तृष्णा प्रेरयते नरम् ।
तमेव सर्वपापेभ्यो लज्जा मातेव रक्षति ॥
अकृतस्याऽऽगमो नास्ति कृत नाशो न विद्यते ।
अकस्मादेव लोकोऽयं तृष्णे दासीकृतस्त्वया ॥

तृष्णा ह्यनिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥

तथा

सुखं निराशः स्वपिति नैराश्यं परमं सुखम् ।
आशां निराशां कृत्वा सुखं स्वपिति पिङ्गला ॥
सर्वत्र संपदस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥
अन्तो नास्ति पिपासायाः सन्तोषः परमं सुखम् ।
तस्मात् सन्तोषमेवेह धनमिच्छन्ति पण्डिताः ॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नाऽलमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥

'नालमेकस्य' इत्यलंशब्दः पर्याप्तौ ।

देवलः

कुलबुद्धिवपुर्विद्यावित्तैश्वर्यविभूतिभिः ।
स्वैरन्यैर्वाचने योऽन्य तन्मदस्येह लक्षणम् ॥
देवासुरमनुष्याणामुत्सिक्ता मदहेतवः ।
मदेनैव विनेशुस्ते तस्मात्त्याज्यो मदो बुधैः ॥
दर्पोत्सेकावलेपाश्च दम्भो दर्पोऽथ गर्विता ।
अन्ये च ते त्रिधा भावास्तु मदस्य विकल्पजाः ॥
अनिष्टयोगजात् द्वेषात् स्नेहादिष्टवियोगजात् ।
क्लेशाद्वा हृदि यद्दुःखं स शोक इति पठ्यते ॥
अनित्याः सर्वभावाश्चेच्छोकस्तत्र निरर्थकः ।
अथवा यदि नित्याः स्युः कुतः शोकः प्रवर्तते ॥

नैवं हि शोचंस्त्रस्यन्सतामसे वाऽपि केवलम्।
शोकाद्दुःखमवाप्नोति समासेनेह रागतः॥

'नैवं हि शोचे'दित्येवमुक्तप्रकारेण पर्य्यासोचयन दुःखमवाप्नोति इत्यर्थः।

<u>महाभारते</u>

यदि मे पश्यतः कालो भूतानि न विचारयेत्।
स्यान्मे हर्षश्च शोकश्च क्रोधश्चैव शचीपते॥
भूतानां निधनं निष्ठया स्रोतसामिव सागरे।
नैतत्सम्यग्विजानाति न वा मुह्यति वज्रभृत्॥
नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुः।
सोऽयं पचति मां कालो वृक्षे फलमिवाऽऽगतम्॥
यत्समेवाऽप्नुवन्ति हतमेवाऽप्नुवन्ति ते।
सश्यते नष्टमेवाऽथ लब्धव्यं लभते नरः॥
बुद्धिमन्तं कृतप्रज्ञं शुश्रूषुमनसूयकम्।
दान्तं जितेन्द्रियं वाऽपि शोको न स्पृशते नरम्॥
बुद्धिमन्तं च मूढं च शूरं भीरुं कविं जडम्।
दुर्बलं बलवन्तं च भाग्यवो भजते नरम्[1]॥

<u>देवलः</u>

इदं ममेति यस्त्वाऽऽपमात्मनोऽर्थेषु मन्यते।
अज्ञानंस्तदनित्यत्वं ममत्वमिति तद्विदुः॥
अहमित्यभिमानेन यः क्रियासु प्रवर्तते।
कार्यकारणयुक्तासु तदहंकारलक्षणम्॥

1 भाग्यं भो भजते नरम्—ग and ध.

अहंकारममत्वाभ्यां बध्यन्ते सर्वदेहिनः।
संसारविनियोगेषु ताभ्यां मुक्तस्य मुच्यते ॥

मार्कण्डेयपुराणे

[1]यस्मिन् यस्मिन् ममत्वेन संवित् पुंसः प्रजायते।
ततस्ततः समादाय दुःखान्येव प्रयच्छति ॥
मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे।
न तादृङ्ममताशून्ये कलविंकेऽथ मूषिके ॥

महाभारते

नाऽत्यक्त्वा सुखमाप्नोति नाऽत्यक्त्वा विन्दते पदम्।
नाऽत्यक्त्वा चाऽभयः शेते त्यक्त्वा सर्वं सुखी भव ॥
हतो देशः पुरं दग्धं प्रधानः कुंजरो हतः।
लोकसाधारणेष्वेषु मिथ्याज्ञानेन तप्यते ॥
मत्स्यूपपटहो राज्ञः सामान्यः सुखवासिभिः[2]।
ममेदमिति यो भावस्तस्य स प्रीतिकारकः ॥
अपि च भवति मैथिलेन गीतं
नगरमुपाहितमग्निनाऽभिवीक्ष्य।
मम न खलु सुपोऽपि दह्यतेऽस्मिन्
स्वयमिदमाह किल स्म भूमिपालः ॥
अनन्तं बत मे वित्तं यद्य मे नास्ति किंचन।
मिथिलायां प्रदीप्तायां न मे किंचन दह्यते ॥

1 1 1

<u>यज्ञिरुवाच</u>

आत्माऽपि चायं न मम सर्वा वा पृथिवी मम ।
यथा मम तथाऽन्येषामिति मत्वा न मे व्यथा ॥
एव ब्रह्म प्रविष्टोऽहं ग्रीष्मे शीतमिव [1]ह्रदम् ।
शाम्यामि परिनिर्वामि सुखमासे च केवलम् ॥
धेनुर्वत्सस्य गोपस्य स्वामिनस्तस्करस्य च ।
पयः पिबति यस्तस्या धेनुस्तस्येति निश्चयः ॥

<u>देवलः</u>

अहं ममेति चाऽऽत्मानं संसारे परिवर्तते ।
नाहं कश्चिन्न मे कश्चिदिति पश्यन् प्रमुच्यते ॥

<u>विष्णुपुराणे</u>

[2]अहं ममेत्यविद्येयं व्यवहारस्तथाऽनयोः ।
परमार्थस्त्वसंलाप्यो गोचरे वचसां न सः ॥

<u>तथा</u>

[3]अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः ।
अविद्यातरुसंभूतिबीजमेतद् द्विधा स्थितम् ॥
पञ्चभूतात्मके देहे देही मोहतमोवृतः ।
अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम् ॥
आकाशवाय्वग्निजलपृथिवीभ्यः पृथक् स्थिते ।
आत्मन्यात्ममयं भावं कः करोति कलेवरे ॥

1 ह्रदम् which is the Smṛti expression—..., but Udaipur Ms. has ग्रहम् in place of ह्रदम्.

2 ६ १

3 ६ ११

कलेवरोऽप्यभोग्य हि गृहक्षेत्रादिक च क ।
अदेहेऽनात्मनि प्राज्ञो ममेदमिति मन्यते ॥
इत्थं च पुत्रपौत्रादौ तद्देहोत्थापिते तु क ।
करोति पण्डित स्वाम्यमनात्मनि कलेवरे ॥
सर्वं देहोपभोगाय कुरुते कर्म मानवः ।
देह चाऽन्यथदा पुस तदा बन्धाय तत्परम् ॥
मृण्मयं हि यथा गेह लिप्यते वै मृदम्भसा ।
पार्थिवोऽयं तथा देहो मृदं मोलेपनं स्थिति ॥
पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपु ।
अथाऽऽप्यते यदि तत पुंसो गर्वोऽत्र किंकृतः ॥

देवल

आत्मबाधाकर श्रुत्वा दृष्ट्वा वा प्रत्युपस्थितम् ।
उद्वेगो जायते यस्तु हृदये तद्भयं स्मृतम् ॥
तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
आगत तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥
भवितव्यं भवस्येव नास्ति कर्मव्यतिक्रमः ।
इत्येवं दृष्टतत्त्वानां न कश्चिज्जायते भयम् ॥
आत्मनोऽभ्युदय दृष्ट्वा परस्य व्यसनानि वा ।
आनन्दो मानसो जातो हर्ष इत्यभिधीयते ॥
सर्वद्रव्येष्वतीतेषु क्षणिकेषु धनेषु च ।
न हर्षस्याऽवकाशोऽस्ति विमृश्य यदि पश्यसि ॥
माध्यस्थ्यमपि दोषाय परेषां व्यसनागमे ।
किं पुनर्मूढभावेन प्रमोदः परविप्लवे ॥
यो वृथा चिन्तयेदर्थान् मनसा ह्यपरस्परान् ।
मोपचिन्तेति तामाहुर्धर्मकर्मोपघातिनीम् ॥

वह्निस्थाप

आत्मापि चायं न मम सर्वा वा पृथिवी मम ।
यथा मम तथाऽन्येषामिति मत्वा न मे व्यथा ॥
एष ब्रह्म प्रविष्टोऽहं ग्रीष्मे शीतमिव [1]ह्रदम् ।
शाम्यामि परिनिर्वामि सुखमासे च केवलम् ॥
धनुर्धरस्य गोपस्य स्वामिनस्तस्करस्य च ।
पयः पिबति यस्तस्या धेनुस्तस्येति निश्चयः ॥

देवलः

अहं ममेति चाऽऽस्मान संसारे परिवर्तते ।
नाऽहं कश्चिन्न मे कश्चिदिति पश्यन्न बध्यते ॥

विष्णुपुराणे

[2]अहं ममेत्यविद्येयं व्यवहारस्तथाऽनयोः ।
परमार्थस्त्वसंलाप्यो गोचरे वचसां न सः ॥

तथा

[3]अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः ।
अविद्यातरुसम्भूति बीजमेतद् द्विधा स्थितम् ॥
पञ्चभूतात्मके देहे देही मोहतमोवृतः ।
अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम् ॥
आकाशवाय्वग्निजलपृथिवीभ्यः पृथक् स्थिते ।
आत्मन्यात्ममयं भावं कः करोति कलेवरे ॥

कलेवरोऽप्यभोग्य हि गृह्यक्षेत्रादिक च क' ।
अदेहेऽनात्मनि प्राज्ञो ममेदमिति मंस्यते ॥
इत्थ च पुत्रपौत्रादौ तद्देहोत्पादिते तु कः ।
करोति पण्डित स्वाम्यमनात्मनि कलेवरे ॥
सर्व देहोपभोगाय कुरुते कर्म मानव ।
देहं चाऽन्यथदा पुस तदा बन्धाय तत्परम् ॥
मृण्मय हि यथा गेहं लिप्यते वै मृदम्भसा ।
पार्थिवोऽयं तथा देहो मृद मोलेपन स्थितिः ॥
पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपुः ।
आप्याऽऽप्यते यदि ततः पुंसो गर्वोऽत्र किंकृत ॥

देवलः

आत्मबाधाकर श्रुत्वा दृष्ट्वा वा प्रत्युपस्थितम् ।
उद्वेगो जायते यस्तु हृदये तद्भय स्मृतम् ॥
तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥
भवितव्यं भवत्येव नास्ति कर्मण्यनिष्कृतिः ।
इत्येव दृष्टमस्थानां न कश्चिज्जायते भयम् ॥
आत्मनोऽभ्युदय दृष्ट्वा परस्य व्यसनानि वा ।
आनन्दो मानसो जातो हर्ष इत्यभिधीयते ॥
सर्वद्रव्येष्वतीतेषु क्षणिकेषु धनेषु च ।
न हर्षस्याऽवकाशोऽस्ति विमृश्य यदि पश्यसि ॥
माध्यस्थ्यमपि योपाय परेषां व्यसनागमे ।
किं पुनर्मूढभावेन प्रमोदः परविप्लवे ॥
यो वृथा चिन्तयेदर्थान् मनसा ह्यपरस्परान् ।
मोघचिन्तेति तामाहुर्धर्मकर्मोपघातिनीम् ॥

[1]भोगैश्वर्यमदादीनि लोभाद्यः संस्मरंस्तथा ।
स मोघचिन्तयाऽऽत्मानं हन्ति बुद्धिं च कर्म च ॥
तस्मात् विदूरगां चिन्तां त्यक्त्वा शोकं च कर्मजम् ।
आरभेत शिवं कर्म इह प्राप्तुं च सर्वशः ॥
रागसङ्कल्पजान् ग्रन्थीन् हृदयेषु दृढार्पितान् ।
उच्छिन्द्येत्तांस्तु मेधावी तत्त्वज्ञानासिनाऽद्भुतम् ।
आत्मदोषक्षयोपायमनिशामेष्यतां तनो ॥
हितं च सर्वभूतानां चिन्तयेन्मनसाऽसकृत् ।
एते मनोभवा दोषा प्राणशाऽधिनहेतवः ॥
मोहादयः समाख्याता देवासुरविमोहनाः ।
तत्संयोगान्मनो धत्ते ज्ञानधर्मप्रसङ्गतः ॥
त्यागाच्च व्यसनादीनां हानिर्गच्छति मानसम् ।
भयकाशकरो बुद्धिं तमसाऽऽवृत्य सर्वशः ॥
प्रथमं जायते मोहो देहिनां हृदि पाप्मजः ।
मोहात्तूत्पद्यते रागो रागाद्द्वेषः प्रवर्तते ॥
त्रिभिरेतैर्भवत्येव पापं शारीरवाङ्मयम् ।
[2]तस्मा हरीह सर्वेषु मानसे क्षपिति स्वयम् ॥
सर्वान् दोषान् परित्यक्तुं प्रीनेताम प्रथमं त्यजेत् ।
'अपरस्पराम्' मातस्येमाऽपरापरान ।

[3]<u>महाभारते</u>

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥

1 भोगैश्वर्यमदादीनि—ख and ग
2 ग and घ read तस्मात् शरीरस्थेषु मानसेष्वपि तत् क्रमम्
3 भगवद्गीता २ ६२–६३

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिनाशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

तथा

एकः शत्रुर्न द्वितीयोऽस्ति कश्चित्
अज्ञानतुल्यः पुरुषस्य राजन् ।
येनाऽऽवृतः कुरुते संप्रयुक्तो
घोराणि कर्माणि सुदारुणानि ॥
रागो द्वेषः काममोहौ पापानां चैव या क्रिया ।
विचिकित्सा क्रोधमोहौ दम्भोऽसूया मदस्तथा ॥
ईर्ष्या हिंसा च मात्सर्यं कुत्सा तंद्रा तथैव च ।
अज्ञानमेतन्निर्दिष्टं तृष्णा मोहोपसेवनम् ॥
क्षमया क्रोधमुच्छिन्द्यात् कामं संकल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥
अप्रमादाद्भयं रक्षेच्छ्वासं क्षेत्रज्ञसेवनात् ।
ईर्ष्यां द्वेषं च कामं च धैर्येण विनिवर्तयेत् ॥
भ्रमं प्रमोहमावर्तमभ्यासाद्विनिवर्तयेत् ।
निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्त्ववित् ॥
उपद्रवांस्तथा रोगान् हितजीर्णमिताशनात् ।
लोभं मोहं च सन्तोषाद्विषयं तत्त्वदर्शनात् ॥
अनुक्रोशादधर्मं च जयेद्धर्ममुपेक्षया ।
आयत्या च जयेदाशां समर्थं संगविवर्जनात् ॥
अनित्यत्वेन च स्नेहं क्षुधं योगेन पण्डितः ।
कारुण्येनाऽऽत्मनो मानं तृष्णां च परितोषतः ॥
उत्थानेन जयेत्तन्द्रीं वितर्कं निश्चयाज्जयेत् ।
मौनेन बहुभाष्यं च शौर्येण च भयं त्यजेत् ॥

[1]भोगैश्वर्यप्रमादादीनि लोभाद्यः संस्मरेद् वृथा ।
स मोघचिन्तयाऽऽत्मानं हन्ति बुद्धिं च कर्म च ॥
तस्मात् विदूरगां चिन्तां त्यक्त्वा शोकं च कर्मजम् ।
आरभेत शिवं कर्म शुभं प्राप्तुं च सर्वशः ॥
रागसङ्कल्पजान् ग्रन्थीन् हृदयेषु हृदार्पितान् ।
उच्छिन्द्यात्तांस्तु मेधावी तत्त्वज्ञानासिनाऽद्भुतम् ।
आत्मदोषक्षयोपायमनिशामेष्यतां तमोः ॥
हितं च सर्वभूतानां चिन्तयेन्मनसाऽसकृत् ।
एते ममोक्ता दोषा द्वादशाऽशिवहेतवः ॥
मोहादयः समाख्याता देवासुरविमोहना ।
तत्संयोगान्ममो शुद्धे ज्ञानधर्मप्रसङ्गतः ॥
त्यागाच्च व्यसनादीनां हानिगच्छति मानसम् ।
अप्रकाशकरो बुद्धिं तमसाऽऽवृत्य सर्वशः ॥
प्रथमं जायते मोहो देहिनां हृदि पाप्मज ।
मोहादुत्पद्यते रागो रागाद्द्वेषः प्रवर्तते ॥
त्रिभिरेतैर्भवत्येव पापं शारीरवाङ्मयम् ।
[2]तस्माच्छरीरे सर्वेषु मानसे क्षपिते क्षयम् ॥
सर्वान् दोषान् परित्यक्तुं श्रीनेताम् प्रथमं त्यजेत् ।
'अपरस्परान्' मात्स्येनाऽपरापराम् ।

[3]<u>महाभारते</u>

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥

1 भोगैश्वर्यप्रमादादीनि—ख and ग
2 ग and ख read तस्मात् शरीरेष्वेषु मानसेष्वपि तत् त्रयम्
3 भगवद्गीता २, ६२–६३

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिनाशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

तथा

एकः शत्रुर्न द्वितीयोऽस्ति कश्चित्
　अज्ञानतुल्यः पुरुषस्य राजन् ।
येनाऽऽवृतः कुरुते संप्रमत्तो
　घोराणि कर्माणि सुदारुणानि ॥
रागो द्वेषः काममोहौ पापानां चैव या क्रिया ।
विचिकित्सा क्रोधमोहौ दम्भोऽसूया मदस्तथा ॥
ईर्ष्या हिंसा च मात्सर्यं कुत्सा तन्द्रा तथैव च ।
अज्ञानमेतन्निर्दिष्टं तृष्णा मोहोपसेवनम् ॥
क्षमया क्रोधमुच्छिन्द्यात् कामं सङ्कल्पवर्जनात् ।
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥
अप्रमादाद्भयं रक्षेत्कासं क्षेत्रज्ञसेवनात् ।
ईर्ष्यां द्वेषं च कामं च धैर्येण विनिवर्तयेत् ॥
भ्रमं प्रमोहमावर्तमभ्यासाद्विनिवर्तयेत् ।
निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्त्ववित् ॥
उपद्रवांस्तथा रोगान् हितजीर्णमिताशनात् ।
लोभं मोहं च सन्तोषाद्विषयांस्तत्त्वदर्शनात् ॥
अनुक्रोशादधर्मं च जयेद्धर्ममुपेक्षया ।
आयत्या च जयेदाशां चार्थं सङ्गविवर्जनात् ॥
अनित्यत्वेन च स्नेहं क्षुधं योगेन पण्डितः ।
कारुण्येनाऽऽत्मनो मानं तृष्णां च परितोषतः ॥
उत्थानेन जयेत्तन्द्रां वितर्कं निश्चयाज्जयेत् ।
मौनेन बहुभाष्यं च शौर्येण च भयं त्यजेत् ॥

द्रव्येषु समतीतेषु ये गुणास्तान्न चिन्तयेत् ।
तानमाद्रियमाणस्तु स्नेहबन्धाद्विमुच्यते ॥
दोषदर्शी भवेत्तत्र यत्र रागः प्रवर्तते ।
अनिष्टवर्द्धितं पश्येद्यथा क्षिप्रं विवर्धते ॥
दुःखोपघाते शारीरे मानसे चाप्युपस्थिताः ।
यस्मिन्न शक्यते कर्तुं यत्नस्तान्निचिन्तयेत् ॥
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ।
चिन्त्यमानं हि नश्यति(?) भूयश्चापि प्रवर्तते ॥
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतद्विज्ञानसामर्थ्यं निर्यतैः समतामियात् ॥

तथा

यमर्थसिद्धिः परमा न हर्षये-
त्तथैव काले व्यसनं न मोहयेत् ।
सुखं च दुःखं च तथैव मध्यमं
निषेवते यः स धुरंधरो नरः ॥
यां यामवस्थां पुरुषोऽधिगच्छेत्
तस्यां च मेधापरितप्यमानः ।
एवं प्रवृद्धं प्रणुदेन्मनोजं
सन्तापमायासकरं शरीरे ॥
धृत्वा शिश्नोदरं रक्षेत् पाणिपादं च चक्षुषा ।
चक्षुःश्रोत्रेषु मनसा मनो वाचं च विद्यया ॥
निद्रा सर्वात्मना त्याज्या स्वप्नसोपानवेक्षिता ।
स्वप्नं हि रजसा वृद्धी तमसा चाऽभिभूयते ॥

॥ १० ॥

अथेन्द्रियजयः

<u>मनुः</u>[1]

> इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
> संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम् ॥
> इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
> सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति ॥
> न जातु कामः कामानामुपभोगेन शाम्यति ।
> हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्द्धते ॥
> न तथैमानि शक्यन्ते सन्नियन्तुमसेवया ।
> विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥
> श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
> न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥
> इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।
> तेनाऽस्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥

'कामो'ऽभिलाषः । 'कामानां' काम्यानां 'विषयाणां' शब्दादीनाम् । 'दृति'र्भस्त्रा[2] ।

1 २. ८८, ९३, ९४, ९६, ९, ९९
2 दृतिः चर्मनिर्मितं उदकपात्रम् इति कुल्लूकः ।

महाभारते

न ह्यस्याप्यरसज्ञस्य कामः कश्चन जायते।
श्रवणाद्दर्शनाद्वाऽपि स्पर्शनाद्वाऽपि जायते॥
न त्वं स्मरसि वारुण्या लावकानां च पक्षिणाम्।
ताभ्यां चाऽभ्यधिको भक्ष्यो न कश्चिदिह विद्यते॥

'अरसज्ञस्य' तज्जन्यसुखानभिज्ञस्य। [च]

तथा[1]

[2]विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥
रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥

1 भगवद्गीता २. ५९-६५

2 "इन्द्रियाणां आहारो विषयाः। निराहारस्य विषयेभ्यः प्रत्याहृतेन्द्रियस्य देहिनो विषया विनिवर्तमाना रसवर्जं निवर्तन्ते, रसो रागः विषयरागो न निवर्तते इत्यर्थः। रागोऽप्यस्य परमात्मस्वरूपं दृष्ट्वा निवर्तते॥" (श्री रामानुजभाष्यम्)

"यद्यपि विषया विषयोपलक्षितानि विषयशब्दवाच्यानि इन्द्रियाणि निराहारस्य अनाह्रियमाणविषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि विनिवर्तन्ते देहिनो देहवतः रसवर्जं रसो रागो विषयेषु यः तं वर्जयित्वा। रसशब्दो रागे प्रसिद्धः, स्वरसेन प्रवृत्तः रसिकः रसज्ञः इत्यादिदर्शनात्। सोऽपि रसो रञ्जनारूपः सूक्ष्मः अस्य यतेः परं परमार्थतत्त्वं दृष्ट्वा उपलभ्य 'अहमेव तत्' इति वर्तमानस्य निवर्तते निर्बीजं विषयविज्ञानं संपद्यते इत्यर्थः" (श्री शाङ्करभाष्यम्).

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥

'रसवर्जम्' इत्यत्र रसो राग इति <u>गीताभाष्यम्</u>[1] । 'परं दृष्ट्वा' परमात्मानं साक्षात्कृत्य ।

<u>[2]विष्णुपुराणे</u>

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य[3] विषयासङ्गि मुक्तो निर्विषयात्मनः ॥

<u>[4]महाभारते</u>

उद्धरेदात्मनाऽऽत्मानं नाऽऽत्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥
बन्धुरात्माऽऽत्मनस्तस्य येनाऽऽत्मैवाऽऽत्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेताऽऽत्मैव शत्रुवत् ॥
जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥

1 This comment appears to show that Lakṣmīdhara was conversant with the *bhāṣyas* of both Śaṅkara and Rāmānuja, and that he leaned in his views to the latter since he explains परं दृष्ट्वा as परमात्मानं साक्षात्कृत्य an interpretation opposed to *Advaita*

2 (७

3 विषयासङ्गि—ग.

4 भगवद्गीता ६ ५—७

॥ ११ ॥

अथ तत्वसृष्टिः

तत्र देवलः

तत्र सांख्यानामेका मूलप्रकृतिः। सप्त प्रकृतिविकृतयः। [1]महदहङ्कारौ। पञ्च तन्मात्राणि। षोडश विकाराः। [2]पञ्चेन्द्रियाणि। अर्थाश्च पञ्चभूतविशेषाश्च त्रयोदश करणानि। तेषां त्रीण्यन्तःकरणानि। दश बहिःकरणानि।

'पञ्च पञ्चेन्द्रियाणि' पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि इत्येव दश।

'अर्थाः' रूपादयः। 'भूतविशेषाः' पृथिव्यादयः।

तथा

अथ मूलप्रकृतिरव्यक्तं महानहंकारः। पञ्च तन्मात्राणीति प्रकृतिविकृतयः। शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, [3]गन्धतन्मात्रमिति। तन्मात्राणि त्रिविधानि। इन्द्रियाणि मनो भूतविशेषाश्च विकाराः। चक्षुःश्रोत्रघ्राणजिह्वात्वचो बुद्धीन्द्रियाणि। रूपरसगन्धस्पर्शा-स्तथार्थाः। वाक्, पाणि, पाद, पायूपस्थाः कर्मेन्द्रियाणि।

1 Omitted in Nagpur M. and Sarasvatibhavan Ms.

2 पञ्चस्वेन्द्रियाणि—क and ख

3 Omitted in Sarasvatibhavan Ms.

मापणं क्रिया गमनमुत्सर्गः प्रीतिरिति कर्मेन्द्रियार्थाः। वाय्वग्न्यम्ब्वाकाशपृथिव्यो भूतविशेषाः। दशेन्द्रियाणि बुद्ध्यहंकारमनांसि च करणानि। तेषां मनोबुद्ध्यहंकारा श्चान्तःकरणानि दश बहिः करणानि। इन्द्रियाणि च।

गुणसाम्यलक्षणमव्यक्तम् प्रधानं प्रकृतिर्विधान मित्यनर्थान्तरम्। अध्यवसायलक्षणो महान् [1]बुद्धिर्मतिरुप लब्धिरित्यनर्थान्तरम्। अभिमानलक्षणोऽहंकारो वैकारिकोऽह ङ्कारोऽभिमान इत्यनर्थान्तरम्। सत्तामात्रलक्षणानि तन्मा त्राणि स्वानुग्रहलक्षणानीन्द्रियाण्यक्षाणीन्द्रियाण्युच्यन्ते। संकल्पलक्षणं मनः। इन्द्रियार्थलक्षणा विषयविशेषा भूता नीत्यनर्थान्तरमिति।

सर्वपूर्विका प्रकृतिः। प्रकृतेर्महानुत्पद्यते। महतोऽह ङ्कारः। अहंकारात्तन्मात्राणि इन्द्रियाणि च। तन्मात्रेभ्यो विशेषा इत्युत्पत्तिक्रमः।

'गुणसाम्यलक्षणं' सत्त्वरजस्तमसां साम्यमविकृति त्वम्। तदेव लक्षणं यस्य तत्तथा।

'सर्वपूर्विका' सर्वेभ्यः प्रथमा।

यम

मनो बुद्धिरहंकारः खानिलाग्निजलानि भूः।
एताः प्रकृतयस्त्वष्टौ विकाराः षोडशाऽपरे॥
श्रोत्राक्षिरसनघ्राणत्वचः सङ्कल्प एव च।
शब्दरूपरसस्पर्शगन्धवाक्पाणिपायवः॥

1 म omits मतिरुपलब्धि

॥ ११ ॥

अथ तत्वसृष्टि

तत्र देवलः

तत्र सांख्यानामेका मूलप्रकृतिः। सप्त प्रकृतिविकृतयः। [1]महदहंकारौ। पञ्च तन्मात्राणि। षोडश विकाराः। [2]पञ्चेन्द्रियाणि। अर्थाश्च पञ्चभूतविशेषाश्च त्रयोदश करणानि। तेषां त्रीण्यन्तःकरणानि। दश बहिःकरणानि।

'पञ्च पञ्चेन्द्रियाणि' पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि इत्येवं दश।

'अर्था' रूपादयः। 'भूतविशेषाः' पृथिव्यादयः।

तथा

अथ मूलप्रकृतिरव्यक्तं महानहंकारः। पञ्च तन्मात्राणीति प्रकृतिविकृतयः। शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, [3]गन्धतन्मात्रमिति। तन्मात्राणि द्विविधानि। इन्द्रियाणि मनो भूतविशेषाश्च विकाराः। चक्षुःश्रोत्रघ्राणजिह्वात्वचो बुद्धीन्द्रियाणि। रूपरसगन्धस्पर्शास्तेषामर्थाः। वाक्, पाणि, पाद, पायूपस्थाः कर्मेन्द्रियाणि।

1 Omitted in Nagpur M and Sarasvatibhavan M

2 पञ्चबुद्धीन्द्रियाणि—ग and घ

3 Omitted in Sarasvatibhavan Ms

भापर्णं क्रिया गमनमुत्सर्गः प्रीतिरिति कर्मेन्द्रियार्थाः। वाय्वग्न्यम्ब्वाकाशपृथिव्यो भूतविशेषाः। दशेन्द्रियाणि बुद्ध्यहंकारमनांसि च करणानि। तेषां मनोबुद्ध्यहंकारा आन्त:करणानि दश बहि:करणानि। इन्द्रियाणि च।

गुणसाम्यलक्षणमव्यक्तम् प्रधानं प्रकृतिः विधान मित्यनर्थान्तरम्। अध्यवसायलक्षणो महान् [1]बुद्धिर्मतिरुप लब्धिरित्यनर्थान्तरम्। अभिमानलक्षणोऽहंकारो वैकारिकोऽहं कारोऽभिमान इत्यनर्थान्तरम्। सत्तामात्रलक्षणानि तन्मा त्राणि स्वानुग्रहलक्षणानीन्द्रियाण्यक्षाणीन्द्रियाण्युच्यन्ते। संकल्पलक्षणं मन। इन्द्रियार्थलक्षणा विषयविशेषा भूता नीत्यनर्थान्तरमिति।

सर्वपूर्विका प्रकृतिः। प्रकृतेर्महानुत्पद्यते। महतोऽहं कारः। अहंकारात्तन्मात्राणि इन्द्रियाणि च। तन्मात्रेभ्यो विशेषा इत्युत्पत्तिक्रम।

'गुणसाम्यलक्षणं' सत्त्वरजस्तमसां साम्यमविकृति त्वम्। तदेव लक्षणं यस्य तत्तथा।

'सर्वपूर्विका' सर्वेभ्यः प्रथमा।

यमः

मनो बुद्धिरहंकारः खानिलाग्निजलानि भूः।
एताः प्रकृतयस्त्वष्टौ विकाराः षोडशाऽपर॥
श्रोत्राक्षिरसनघ्राणत्वचः सङ्कल्प एव च।
शब्दरूपरसस्पर्शगन्धवाक्पाणिपायवः॥

1 स omits मतिरुपलब्धि

पायावुपस्थ इति ते विकाराः षोडशाऽपरे ।
चतुर्विंशकमित्येतत् ज्ञानमाहुर्मनीषिणः ॥
पञ्चविंशकमव्यक्तं परिदृशः पुरुषोत्तमः ।
[1]एतज्ज्ञात्वा मुमुक्ष्यन्ते यतयः शान्तबुद्धयः ॥
पञ्चविंशतिमत्त्वज्ञो याति विष्णोः परं पदम् ।

याज्ञवल्क्यः[2]

बुद्धेरुत्पत्तिरव्यक्तात् ततोऽहङ्कारसंभवः ।
तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि तु ॥
शब्दस्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ।
यो यस्माभिःसृतश्चैषां स तस्मिन्नेव लीयते ॥

'एकोत्तरगुणानि' एकैकेन गुणेन उत्तरोत्तरमधिकानि आकाशादीनि भूतानि ।

विष्णुपुराणे[3]

अव्यक्तं कारणं यत्तत् प्रधानमृषिसत्तमैः ।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् ॥
[4]अव्यक्तं नान्यदाधारममरमजरं ध्रुवम् ।
शब्दस्पर्शविहीनं तद्रूपादिभिरसंहतम्[5] ॥
त्रिगुणं तज्जगद्योनिरनादिप्रभवाऽव्ययम् ।
तेनाऽग्रे सर्वमेवाऽऽसीद्व्याप्तं वै प्रलयादनु ॥

1 एतज्ज्ञात्वाऽऽत्र मु मन्ते—ज and न
2 ३ १७९ [illegible]
3 १ २ १९—२१ २५-२२
4 अव्यक्तं इति [illegible] (गोरखपुर) पुस्तके (पृ ७)
5 [illegible] इति [illegible]

वेदवादविदो विद्वन् नियता ब्रह्मवादिनः ।
पठन्ति चैतमेवार्थं प्रधानप्रतिपादकम् ॥
नाऽहो न रात्रिर्न नभो न भूमि
 र्नासीत्तमो ज्योतिरभूच्च नान्यत् ।
श्रोत्रादिबुद्ध्यानुपलभ्यमेकं[1]
 प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥
प्रकृतौ संस्थितं व्यक्तमतीतः प्रलये तु यत् ।
तस्मात्प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः ॥
अनादिर्भगवान् कालो नाऽन्तोस्य[2] द्विज विद्यते ।
अव्युच्छिन्नास्ततस्त्वेते सर्ग[3] स्थित्यन्तसंयमाः ॥
गुणसाम्ये ततस्तस्मिन् पृथक् पुंसि व्यवस्थिते ।
कालस्वरूपरूपं तत् विष्णोः मैत्रेय वर्तते ।
ततस्तु तत् परं ब्रह्म परमात्मा जगन्मयः ॥
सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः ।
प्रधानं पुरुषं [4]चाऽपि प्रविश्य स्वेच्छया हरिः ॥
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ ।
यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते ॥
मनसो नोपकर्तृत्वात्तथाऽसौ परमेश्वरः ।
स एव क्षोभको ब्रह्मन् क्षोभ्यश्च पुरुषो मतः[5] ॥
स सङ्कोचविकासाभ्यां प्रधानत्वेऽपि संस्थितः ।
[6]विकाराश्च स्वरूपैश्च ब्रह्मरूपादिभिस्तथा ॥

1 बुद्ध्यनुपलभ्यमिति—मु पु
2 नाऽन्तो for नाऽन्त्यो in म
3 सर्गस्थित्यन्तसंयमा इति मु पु
4 पुरुषौ चापि इति मु पु
5 पुरुषोत्तम इति मु पु.
6 विकासाणुस्वरूपैश्च इति मु पु

स्पर्शरूपस्वरूपश्च तथा विष्णुः सर्वेश्वरेश्वरः ।
गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान् मुने ॥
गुणव्यञ्जनसंभूति सर्गकाले द्विजोत्तम ।
प्रधानतत्त्वमुद्भूतं महान्तं तत्समावृणोत् ॥
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ।
प्रधानतत्त्वेन समं त्वचा बीजमिवाऽऽवृतम् ॥
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।
त्रिविधोऽयमहंकारो महत्तत्त्वादजायत ॥
भूतेन्द्रियाणां हेतुः स त्रिगुणत्वान्महामुने ।
यथा प्रधानेन महान् महता स तथाऽऽवृतः ॥
भूतादिस्तु विकुर्वाणः [1]सगतात्मा त्रिधं ततः ।
ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ॥
शब्दमात्रं तथाकाशं भूतादिः समावृणोत् ।
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह ॥
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः ।
आकाशं शब्दतन्मात्रं स्पर्शमात्रं समावृणोत्[2] ॥
ततो वायुर्विकारेण रूपमात्रं ससर्ज ह ।
ज्योतिरुत्पद्यते वायुस्तद्रूपगुणमुच्यते ॥
स्पर्शमात्रस्ततो वायू रूपमात्रं समावृणोत् ।
ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ॥
संभवन्ति ततोऽम्भांसि रसाधाराणि तानि तु ।
रसमात्राणि चाम्भांसि रूपमात्रं समावृणोत् ॥
विकुर्वाणि चाम्भांसि गन्धमात्रं ससर्जिरे ।
संघातो जायते यस्मात् तस्य गन्धो गुणो मतः ॥

1 शब्दतन्मात्रकमिति ह पु
2 Line missing in Udaipur Ms

तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता ।
तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते ॥
न शान्ता नाऽपि घोरास्ते न मूढा न विशेषिणः ।
भूततन्मात्रसर्गोऽयं[1] अहंकारात्तु तामसात् ॥
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ।
एकादशं मनश्चाऽत्र देवा वैकारिकास्तथा[2] ॥
त्वक् चक्षुर्नासिका जिह्वा श्रोत्रमत्र तु पञ्चमम् ।
शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विजः ॥
पायूपस्थौ करौ पादौ वाक् च मैत्रेय पञ्चमी ।
विसर्गशिल्पगत्युक्ति कर्म तेषां प्रचक्षते[3] ॥
आकाशवायुतेजांसि सलिलं पृथिवी तथा ।
शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरोत्तरैः ॥
शान्ता मूढाश्च घोराश्च विशेषास्तेन ते स्मृताः ।
नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ॥
नाऽशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ।
समेत्याऽन्योन्यसंयोगं परस्परसमाश्रयाः ॥
एकसंघातलक्ष्याश्च संप्राप्यैक्यमशेषतः ।
पुरुषाधिष्ठितत्वाच्च अव्यक्ताऽनुग्रहेण च ॥
महदाद्या विशेषान्ताः ह्यण्डमुत्पादयन्ति ते ।
[4]उत्क्रमेण विवृद्धं च जलबुद्बुदवत्समम् ॥
भूतेभ्योऽण्डं महाबुद्धे बृहत्तदुदकेशयम् ।
प्राकृतं ब्रह्मरूपस्य विष्णोः स्थानमनुत्तमम् ॥

1 I the three Mss सर्गोऽयम् इति सु पु
2 स्मृताः for तथा in सु पु

तत्राऽव्यक्तस्वरूपोऽसौ व्यक्तरूपी जगत्पतिः ।
विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः ॥
मेरुरुल्बमभूत्तस्य जरायुश्च महीधराः ।
गर्भोदकं समुद्राश्च तस्याऽऽसन् सुमहात्मनः ॥
[1]अद्रिद्वीपसमुद्राश्च सज्योतिर्लोकसंग्रहः ।
तस्मिन्नण्डेऽभवद्विप्र सदेवासुरमानवः ॥
वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः ।
वृतं दशगुणैरण्डं भूतादि [2]र्महता तथा ॥
अव्यक्तेनाऽऽवृतो ब्रह्मन् तैः सर्वैः सहितो महान् ।
एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ॥
नारिकेलफलस्याऽन्तर्बीजं बाह्यदलैरिव ।
जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ॥
ब्रह्मा भूत्वा स जगतो विसृष्टौ संप्रवर्तते ।
सृष्टं च पात्यनुयुगं यावत् कल्पविकल्पना ॥
सत्त्वभृद् भगवान् विष्णुरप्रमेयपराक्रमः ।
[3]सर्गस्थित्यन्तकरणाद्ब्रह्मविष्णुशिवात्मिकाम् ।
स संज्ञां याति भगवान् एक एव जनार्दनः ॥
स्रष्टा सृजति चाऽऽत्मानं विष्णुः पाल्यं च पाति च ।
उपसंहरते चाऽन्ते संहर्ता च स्वयं प्रभुः ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् ॥

1 [illegible]
2 [illegible] for [illegible]
3 [illegible]

स एव सर्वभूतेशो[1] विश्वरूपो यतोऽव्ययः ।
[2]सर्गादिकं तु तस्यैव भूतस्थमुपकारकम् ॥
स एव सृज्यः स च सर्गकर्ता
स एव पालयति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्ति-
र्विष्णुर्वरिष्ठो वरदो वरेण्यः ॥

[तथा[3]]

[4]महदादेर्विकारस्य विशेषान्तस्य संक्षये ।
कृष्णेच्छाकारिते तस्मिन् प्रवृत्ते प्रतिसञ्चरे ॥
आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम् ।
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते ॥
प्रनष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका[5] ।
अपामपि गुणो यस्तु ज्योतिषा लीयते तु स ॥

तथा

ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः ।
आकाशं चैव भूतादिर्ग्रसते तं तथा महान् ॥
महान्तमेभिः सहितं प्रकृतिर्ग्रसते द्विज ।
गुणसाम्यमनुद्रिक्तमन्यूनं च महामुने ॥

1 भूतात्मा इति सु ५

2 सर्गादिकम् इति स मातृकायाम् (fol १५)

3 There should be तथा here to indicate a break in the quotation. The verses which follow are from the sixth aṃśa, chapter 4 śl 13 ff

4 ६ ४ ११-१ १४ ३-८

5 These three lines are omitted in the M

आपस्तदा प्रवृद्धास्तु वेगवत्यो महास्वनाः ।
सर्वमापूरयन्तीदं तिष्ठन्ति विचरन्ति च ॥
सलिलेनोर्मिमालेन लोका व्याप्ताः समन्ततः ।

तत्राऽव्यक्तस्वरूपोऽसौ व्यक्तरूपी जगत्पतिः ।
विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः ॥
मेरुरुल्बमभूत्तस्य जरायुश्च महीधराः ।
गर्भोदकं समुद्राश्च तस्याऽऽसन् सप्त चात्मनः ॥
[1]अद्रिद्वीपसमुद्राश्च सज्योतिर्लोकसंग्रहः ।
तस्मिन्नण्डेऽभवद्विप्र सदेवासुरमानवः ॥
वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः ।
वृतैर्दशगुणैरण्डं भूतादि [2]महता तथा ॥
अव्यक्तेनाऽऽवृतो ब्रह्मन् तैः सर्वैः सहितो महान् ।
एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ॥
नारिकेलफलस्याऽन्तर्बीजं बाह्यदलैरिव ।
जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ॥
ब्रह्मा भूत्वा स जगतो विसृष्टौ संप्रवर्तते ।
सृष्टं च पात्यनुयुगं यावत् कल्पविकल्पना ॥
सत्त्वभृद् भगवान् विष्णुरप्रमेयपराक्रमः ।
[3]सर्गस्थित्यन्तकरणाद्ब्रह्मविष्णुशिवात्मिकाम् ।
ससंज्ञां याति भगवान् एक एव जनार्दनः ॥
स्रष्टा सृजति चाऽऽत्मानं विष्णुः पाल्यं च पाति च ।
उपसंहरते चाऽन्ते संहर्ता च स्वयं प्रभुः ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् ॥

1 साद्रिद्वीप इति ख ग
2 भूतानि for भूतादि—ख
3 १ २ ११ — ख ग पाठ सृष्टिस्थित्यन्त इति

स एव सर्वभूतेशो[1] विश्वरूपो यतोऽव्ययः ।
[2]सर्गादिकं तु तस्यैव भूतस्थमुपकारकम् ॥
स एव सृज्यः स च सर्गकर्ता
स एव पालयति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्ति
विष्णुर्वरिष्ठो वरदो वरेण्यः ॥

[तथा[3]]

[4]महदादेर्विकारस्य विशेषान्तस्य सक्षये ।
कृष्णेच्छाकारिते तस्मिन् प्रवृत्ते प्रतिसञ्चरे ॥
आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम् ।
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते ॥
प्रनष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका[5] ।
अपामपि गुणो यस्तु ज्योतिषा पीयते तु सः ॥

तथा

ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः ।
आकाशं चैव भूतादि ग्रसते न तथा महान् ॥
महान्तमेभिः सहितं प्रकृतिर्ग्रसते द्विज ।
गुणसाम्यसमुद्रिक्तमन्यूनं च महामुने ॥

1 भूतस्था इति मु पु
2 संहारिकम् इति स मातृकायाम् (fol १५)
3 There should be तथा here to indicate a break in the quotation. The verses which follow are from the sixth aṁśa, chapter 4 śl. 13 ff
4 ६ ४ ११-१४, १७ १२-८
5 These three lines are omitted in the Ms

आसन्ना प्रलयस्तु वैगम्यो महात्मनः ।
तन्मात्रकस्तीर्ण विप्रर्षि विचरन्ति च ॥
सलिलेनोर्मिमालेन लोका व्याप्ता समन्ततः ।

प्रोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम् ।
इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्तस्वरूपिणी ॥
व्यक्तस्वरूपमव्यक्ते तस्मिन् मैत्रेय लीयते ।
एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ॥
सोऽप्यंशः सर्वभूतस्य मैत्रेय परमात्मनः ।
न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ॥
सत्तामात्रात्मके[1] ज्ञेये ज्ञानात्मन्यात्मनः परे ।
स ब्रह्म तत्परं धाम परमात्मा स चेश्वरः ॥
स विष्णुः सर्वमेवेदं यतो नाऽऽवर्तते यतिः ।
प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी ॥
पुरुषश्चाऽप्युभावेतौ लीयते परमात्मनि ।
परमात्मा च सर्वेषामाधारः परमेश्वरः ॥
विष्णुनाम्ना स वेदेषु वेदान्तेषु च गीयते ।

महाभारते

अक्षरोऽग्रे ततो वायुः वायोर्ज्योतिस्ततो जलम् ।
जलात्प्रसूता जगती जगत्यां जायते जगत् ॥

1 सत्त्वमात्रात्मके—मु पु

॥ १२ ॥

अथ शरीरचिन्ता

तत्र देवमनुष्यतिर्यगनुभूतो देहतः

तेषां त्रिविधो मूर्तिविशेषो-द्युतिमत्, सुगन्ध्यनिष्पाद्य मनाविलमनिमिषमस्वेदं, क्षुत्पिपासानिद्रालस्यवर्जितम्, यथेच्छाकृतिफलसम्पन्नमूर्जस्वि, निर्मलं, परमपुष्कलं, सुकृत निमित्तं, देवताशरीरम्। अनित्यमशुभं, सर्वरोगायतनं, दुःखभाजनमनेकधाधमस्थिसंघातशिरास्नायुनद्धं, मांसावलिप्तं, त्वक्प्रतिच्छन्नं, अमरसनानाशोणितमेदोमांसमज्जारतःपित्तानिलश्लेष्मांत्रगुदवस्तियकृत्प्लीहक्लोम स्वेद[1] मूत्रपुरीष कृमि पूर्णं, नवच्छिद्रं, सन्तताभावं, केशरोमनखपर्यन्तं, दुर्गंधि, नित्यसंस्कार्यं, जरामरणवशमिति मानुषशरीरम्। सन्ततोद्विग्नमसंस्कारं, विधूतनिष्यदं, क्षुत्पिपासावशं, मूढेन्द्रियगोचरं, दुष्कृतायतनमज्ञानमकर्मण्यमिति तिर्यग्योनि शरीरम्।

तथा[2]

> इच्छा द्वेषस्सुखं दुःखं क्षुत्तृष्णा चेष्टितं भयम्।
> उत्पत्तिर्मरणं चेति सामान्यं सर्वदेहिनाम्॥

1 स and म omit स्वेद

2 Nagpur M has तथा

मोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम् ।
इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्तस्वरूपिणी ॥
व्यक्तस्वरूपमव्यक्ते तस्मिन् मैत्रेय लीयते ।
एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ॥
सोऽप्यंशः सर्वभूतस्य मैत्रेय परमात्मनः ।
न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ॥
सत्तामात्रात्मके[1] ज्ञेये ज्ञानात्मन्यात्मनः परे ।
स ब्रह्म तत्परं धाम परमात्मा स चेश्वरः ॥
स विष्णुः सर्वमेवेदं यतो नाऽऽवर्तते यतिः ।
प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी ॥
पुरुषश्चाऽप्युभावेतौ लीयते परमात्मनि ।
परमात्मा च सर्वेषामाधारः परमेश्वरः ॥
विष्णुनाम्ना स वेदेषु वेदान्तेषु च गीयते ।

महाभारते

अक्षरोऽग्रे ततो वायुः वायोर्ज्योतिस्ततो जलम् ।
जलात्प्रसूता जगती जगत्यां जायते जगत् ॥

[1]मनुः

उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः ।
ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥
अपुष्पाः फलवन्तो ये ते वनस्पतयस्स्मृताः ।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥
गुच्छगुल्मं च विविधं तथैव तृणजातयः ।
[2]प्रतानाश्चैव वल्यश्च वीरुधः परिकीर्तिताः ॥
तमसा बहुरूपेण वेष्टिताः कर्महेतुना ।
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥

महाभारते

जङ्गमानां च सर्वेषां शरीरे पञ्च धातवः ।
प्रत्येकशः प्रभिद्यन्ते यैः शरीरं विचेष्टितम् ॥
त्वङ्मांसं च तथाऽस्थीनि मज्जा स्नायुश्च पञ्चमम् ।
इत्येतदिह संख्यातं शरीरं पृथिवीमयम् ॥
तेजोऽग्निश्च तथा क्रोधश्चक्षुरूष्मा तथैव च ।
अग्निर्जरयते चाऽपि पञ्चाऽऽग्नेयाः शरीरिणः ॥
श्रोत्रं घ्राणमथाऽऽस्यं च हृदयं कोष्ठमेव च ।
आकाशात्प्राणिनामेते शरीरे पञ्च धातवः ॥
श्लेष्मपित्तमथ स्वेदो वसा शोणितमेव च ।
इत्यापः पञ्चधा देहे भवन्ति प्राणिनां सदा ॥
प्राणात्प्राणयते प्राणी व्यानाद्व्यानयते सदा ।
गच्छत्यपानोऽवाङ्गेव समानो हृद्यवस्थितः ॥
उदानादुच्छ्वसिति च ध्वनिभेदश्च जायते ।
इत्येते वायवः पञ्च चेष्टयन्ति च देहिनम् ॥

1 १ ४६-४९

2 बीजकाण्डरुहाण्येव प्रतानावल्ल्य एव च इति कुल्लूकपाठः.

अपवर्गं प्राणिनः सर्वे रमन्ते स्वासु योनिषु ।
असत्समाभिशिष्टानां न जातिरिति निश्चयः ॥
अमेध्यमशिवं दुर्गन्धि निस्सारं दुःखभाजनम् ।
अध्रुवं बहुदुःखं च शरीरं गर्भवासिनाम् ।
विण्मूत्रकृमिसम्पूर्णं रोगायतनमातुरम्[2] ।
शरीरं यापयन्तीह सदा स्नानाशनादयः ॥
धात्र्या च क्रमेण स्थानमासनं च यथाक्रमम् ।
स्वजातिं न परित्यक्तुमिच्छन्ति प्राणिनः क्वचित् ॥
देही देहं परित्यज्य नेन्द्रस्थानमपीहते ।
तस्मात्कीटोऽपि जन्तूनां स्वजात्या रमते भृशम् ॥

'यथेष्टप्रकृतिमत्त्वमसहनं' यथेष्ट जातिसामर्थ्योपचय संपाता यत्र तत्तथा ।

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥

<u>विष्णुपुराणे</u>

[1]क्व शरीरमशेषाणां श्लेष्मादीनां समाचयः ।
क्व कान्तिशोभासौरम्यं कमनीयादयो गुणाः ॥
मांसास्थ्यसृग्वसापूयस्नायुविण्मूत्रसंहतौ ।
देहे चेत् प्रीतिमान् मूढो भविता नरकेऽपि सः ॥

1 मामप्—भ
2 १ १ ११

[1]मनुः

उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः ।
ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥
अपुष्पाः फलवन्तो ये ते वनस्पतयस्स्मृताः ।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥
गुच्छगुल्मं च विविधं तथैव तृणजातयः ।
[2]प्रतानाश्चैव वल्यश्च वीरुधः परिकीर्तिताः ॥
तमसा बहुरूपेण वेष्टिताः कर्महेतुना ।
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥

महाभारते

अङ्गमानां च सर्वेषां शरीरे पञ्च धातवः ।
प्रत्येकशः प्रभिद्यन्ते यैः शरीरं विचेष्टितम् ॥
त्वक्मांसं च तथाऽस्थीनि मज्जा स्नायुश्च पञ्चमम् ।
इत्येतदिह संख्यातं शरीरं पृथिवीमयम् ॥
तेजोऽग्निश्च तथा क्रोधश्चक्षुरूष्मा तथैव च ।
अग्निर्जरयते चाऽपि पञ्चाऽऽग्नेयाः शरीरिणः ॥
श्रोत्रं घ्राणमथाऽऽस्यं च हृदयं कोष्ठमेव च ।
आकाशात्प्राणिनामेते शरीरे पञ्च धातवः ॥
श्लेष्मपित्तमथ स्वेदो वसा शोणितमेव च ।
इत्यापः पञ्चधा देहे भवन्ति प्राणिनां सदा ॥
प्राणात्प्राणयते प्राणी व्यानाद्व्यानयते तथा ।
गच्छत्यपानोऽधश्चैव समानो हृद्यवस्थितः ॥
उदानादुच्छ्वसिति च ध्वनिभेदश्च जायते ।
इत्येते वायवः पञ्च चेष्टयन्ति च देहिनम् ॥

1 १ ४६-४९
2 बीजकाण्डरुहाश्चैव प्रतानावल्य एव च इति कुल्लूकपाठः

अवश्य प्राणिनः सर्वे रमन्ते स्वासु योनिषु ।
असत्समाविशिष्टानां न जातिरिति निश्चयः ॥
अमेध्यमतिदुर्गन्धि निस्सारं दुःखभाजनम् ।
अध्रुवं मनुदुःखं च शरीरं गर्भवासिनाम् ।
विण्मूत्रकृमिसम्पूर्णं रोगायतनमातुरम्[2] ।
शरीरं धारयन्तीह सदा स्नानाशनादयः ॥
शय्या च क्रमणं स्थानमासनं च यथाक्रमम् ।
स्वजातिं न परित्यक्तुमिच्छन्ति प्राणिनः क्वचित् ॥
देही देहं परित्यज्य नेन्द्रस्थानमपीहते ।
तस्मात्कीटोऽपि जन्तूनां स्वजात्या रमते भृशम् ॥

'यथेष्टाकृतिपतत्सम्भवं' यथेष्ट जातिसामर्थ्याचयव संघाता यत्र तत्तथा ।

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥

विष्णुपुराणे

[1]क्व शरीरमशेषाणां श्लेष्मादीनां समा च य ।
क्व कान्तिशोभासौरभ्य कमनीयादयो गुणाः ॥
मांसास्थ्यसृग्वसापूयस्नायुविण्मूत्रसंहनी ।
देहे चेत् प्रीतिमान् मूढो भविता नरकेऽपि सः ॥

1 मज्जय्—ब
2 ११ ११

<u>विष्णुपुराणे</u>

[1]विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा ।
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलानवाप्नोत्यनुसन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
[2]सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते ॥

[3]'विष्णुशक्तिः परा' ब्रह्मस्वरूपात् क्षेत्रज्ञाख्या । 'अपरा' जीवस्वरूपा [4]मायाऽविद्याकर्मसंज्ञा ।

[5]<u>मनुः</u>

[6]अस्याऽऽत्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ।
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥
जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनाम् ।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥

'अस्याऽऽत्मनः' शरीररूपस्य आत्मार्थत्वादात्मशब्दो ऽत्र गौणः[7]। 'कारयिता' स्पन्दात्मिकासु चेष्टासु प्रवर्तयिता। स्वप्रयत्नद्वारेण । 'भूतात्मा' पृथिव्यादिभूतसंघातत्वात् शरीरम् । 'जीवसंज्ञोऽन्तरात्मा अन्यः' अन्तःकरणं मनो रूपं जीवोऽन्तरात्मा चाऽयमेव । तदर्थत्वात्' तस्य चान्यः

1 ६ ७ ६१
2 सर्वभूते तु—म.
3 विष्णुशक्ति परा परं ब्रह्मस्वरूपा—म. and मा
4 कर्मा अविद्या कर्मस्वरूपा—ग
5 १२ १२-१३
6 योऽस्यात्मन कारयिता इति—मु मनौ
7 शब्दोऽयौन (?)—मा

|| १३ ||

अथ देहशरीरनिर्वेक

तत्र प्राहुः

पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चैतानि विजानीयान्महाभूतानि पण्डितः ॥
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
बुद्धीन्द्रियाणि जानीयात् पञ्चैवाऽस्मिन् शरीरके ॥
मनो बुद्धिस्तथाऽऽत्मा अव्यक्तं च तथैव च[1] ।
इन्द्रियेभ्यः पराण्याहुश्चत्वारि कथितानि तु ॥
शब्दं रूपं तथा स्पर्शं रसं गन्धं तथैव च ।
इन्द्रियार्थं विजानीयात् पञ्चैव सततं बुधः ॥
हस्तपादावुपस्थं च जिह्वा पायुस्तथैव च ।
कर्मेन्द्रियाणि पञ्चैव नित्यमस्मिन् शरीरके ॥
चतुर्विंशतितत्त्वानि एतानि कथितानि तु ।
तथाऽव्यक्तं तु तं विद्धि पुरुषं पञ्चविंशकम् ॥
[2]बालाग्रशतिमो भागः कल्पितस्तु सहस्रधा ।
तस्याऽपि शतिमाद्भागाज्जीवः सूक्ष्म उदाहृतः ॥

1 अव्यक्तं चैवमेव च—ख and ग
2 ख. बाला मधातिशोभाग ग. बालस्याग्र इति भो भाग

[1]यद्युष्मभावमाग्नेयो ह्यग्निना पच्यते यदि ।
अग्निर्जरयते चैव तस्माज्जीवो निरर्थकः ॥
जन्तोः प्रमीयमाणस्य जीवो नैवोपलभ्यते ।
[2]वायुरेव जहात्येनमूष्मभावश्च नश्यति ॥
यदि वातोपमो जीवः संश्लेषो यदि वायुना ।
वायुमण्डलवद्दृश्येद्गच्छेत्सह मरुद्गणैः ॥

'वायुमण्डलवद्दृश्येदि'ति वातोपम जीवपक्षे दूषणम्[3]। 'वायुसंश्लेषो जीव' इत्यत्र पक्षे वायुमण्डलवद्दृश्येदिति उत्क्रान्तिकालवातसमूहवत् स्पर्शने नोपलभ्येत इत्यर्थः । '[4]गच्छेत्सह मरुद्गणै'रिति यां दिशं वायुसमूहाः यान्ति तां दिशं गच्छेत्, न चैवं धर्माऽधर्मवशेन स्वर्गनरकप्राप्तेः श्रुतिप्रतिपादितत्वात् । तथा—

भृगुरुवाच ।

[5]न पञ्च साधारणमत्र किञ्चित्
शरीरमेको वहतेऽन्तरात्मा ।
स वेत्ति गन्धांश्च रसान् श्रुतिश्च
स्पर्शं च रूपं च गुणाश्च येऽन्ये ॥
पञ्चात्मके पञ्चगुणप्रदर्शी
स सर्वगात्रानुगतोऽन्तरात्मा ।

1 omits the verse beginning यद्युष्मभाव—नी मि मो पृ ११४
2 वायुरेव—नी मि मोक्ष पृ ११४ B
3 From here to नोपलभ्यते इत्यर्थः is missing in ना and पु
4 The explanation beginning गच्छेत्सह मरुद्गणै is appropriated by नी मि मो पृ ११५
5 शां १८५, १७

करणत्वात्। 'येन वेदयते' इति करणविभक्त्या निर्देशः। 'सहजः' आमोक्षप्राप्तेस्तत्संबन्धात्।

<u>महाभारते</u>

तत्र यः परमात्मा हि [1]स नित्यं निर्गुणः स्मृतः।
स हि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः॥
न लिप्यते कर्मफलैः पद्मपत्रमिवाम्भसा।
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते॥
स सप्तदशकेनापि राशिना युज्यते पुनः।

'सप्तदशकेन' पञ्चेन्द्रियाणि मनो बुद्धिः प्राणाद्याः पञ्च वायव इत्यनेन गणेन।

<u>तथा</u>

स येनमं [2]जीवगुणं वदन्ति
स चेष्टते च म्रियते च नित्यम्।
ततः परं क्षेत्रविदो वदन्ति
प्रावर्तयद्यो भुवनानि सप्त॥

तथा च <u>महाभारते</u>

तथा च भरद्वाज उवाच—

[3]यद्यग्निमारुतौ भूमिः खमापश्च शरीरिषु।
जीवः किं लक्षणस्तत्रेत्येतदाचक्ष्व मेऽनघ॥
यदि प्राणायते वायुर्वायुरेव विचेष्टते।
श्वसित्याभाषते चैव तस्माज्जीवो निरर्थकः॥

1 नित्यं for निर्गुणं—[illegible]
2 [illegible] for जीवगुणं—[illegible] and [illegible]
3 शां—१ ११

[1]यद्युष्मभावमापन्नो ह्यग्निना पच्यते यदि ।
अग्निर्जरयते चैव तस्माज्जीवो निरर्थकः ॥
जन्तोः प्रमीयमाणस्य जीवो नैवोपलभ्यते ।
[2]वायुरेव जहात्येनमुष्मभावश्च नश्यति ॥
यदि वातोपमो जीवः संश्लेषो यदि वायुना ।
वायुमण्डलवद् दृश्येद्गच्छेत्सह मरुद्गणैः ॥

'वायुमण्डलवद् दृश्येदि'ति वातोपम जीवपक्षे दूषणम्[3]। 'वायुसंश्लेषो जीव' इत्यत्र पक्षे वायुमण्डलवद् दृश्येदिति उत्क्रान्तिकालश्वाससमूहवत् स्पर्शने नोपलभ्येत इत्यर्थः । '[4]गच्छेत्सह मरुद्गणै'रिति यां दिशं वायुसमूहाः यान्ति तां दिशं गच्छेत्, न चैवं धर्माऽधर्मवशेन स्वर्गनरकप्राप्तेः श्रुतिप्रतिपादितत्वात् । तथा—

भृगुरुवाच ।

[5]न पञ्च साधारणमत्र किंचित्
शरीरमेको वहतेऽन्तरात्मा ।
स वेत्ति गन्धांश्च रसान् श्रुतिं च
स्पर्शं च रूपं च गुणाश्च येऽन्ये ॥
पञ्चात्मके पञ्चगुणप्रदर्शी
स सर्वगात्रानुगतोऽन्तरात्मा ।

1 omits the verse beginning यद्युष्मभाव—वी मि मो., पृ ११४

2 वायुरेव—वी मि मोक्ष पृ ११४ B

3 From here to मोक्षव्याद इत्यप is missing in ख and ग

4 The explanation beginning गच्छेत्सह मरुद्गणै is appropriated by वी मि मो पृ ११५

5 भा १८५, १

तद्वत्सुबुद्धिः स यदिन्द्रियस्थात्
ध्रुवं परं पश्यति स्वं स्वभावम् ॥
यथाऽऽत्मनोऽङ्गं पतितं पृथिव्यां
स्वप्नान्तरे पश्यति चाऽऽत्मनोऽन्यत् ।
श्रोत्रादियुक्तः सुमनाः सुबुद्धिः
लिङ्गात्तथा गच्छति लिङ्गमन्यत् ॥
यदिन्द्रियैस्तूपहितान् पुरस्तात्
प्राणान् गुणान् संस्मरते चिराय ।
तेष्विन्द्रियेषु प्रहृतेषु पश्चात्स
बुद्धिरूपात् परमप्रभावः ॥
यथेन्द्रियार्थान् युगपत् समस्तान्
नाऽऽपद्यते कृत्स्नमनल्पकाले ।
यथाबलं संचरते स विद्वान्
तस्मात्स एकः परमः शरीरी ॥
यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा ।
न दृष्टपूर्वं मनुजैर्न च तन्नास्ति[1] तावता ॥

यथाऽर्चिषोऽग्नेः पवनस्य वेगा
मरीचयोऽर्कस्य नदीषु चाऽऽपः ।
गच्छन्ति चाऽऽयान्ति च सन्ततास्तु
तद्वच्छरीराणि शरीरिणा तु ॥

'वशार्द्धता' पश्चता, मरणमित्यर्थ ।

तथा[1]

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥

तथा

नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥
अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्याऽस्य न कश्चित् कर्तुमर्हति ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नाऽयं हन्ति न हन्यते ॥
न जायते म्रियते वा कदाचिन्
नाऽयं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥
वेदाऽविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥

1 भगवद्गीता—२ १३ १६ २४

तद्वत्सुबुद्धिः स सदिन्द्रियत्वात्
ध्रुवं परं पश्यति सर्वं स्वभावम् ॥
यथाऽश्मनोऽग्निं पतितं पृथिव्यां
समान्तरे पश्यति चाऽश्मनोऽन्यत् ।
मोक्षादियुक्तः सुमनाः सुबुद्धिः
लिङ्गात्तथा गच्छति लिङ्गमन्यत् ॥
यदिन्द्रियैस्तूपहितान् पुरस्तात्
प्राणान् गुणान् संस्मरते चिराय ।
तेष्विन्द्रियेषु प्रहृतेषु पश्चात्स
बुद्धिरूपात् परमप्रभावः ॥
यथेन्द्रियार्थान् युगपत् समस्तान्
नाऽऽप्नोति कृत्स्नमनल्पकाले ।
यथाबलं सञ्चरते स विद्वान्
तस्मात्स एकः परमः शरीरी ॥
यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा ।
न दृष्टपूर्वं मनुजैर्न च तन्नास्ति[1] तावता ॥
तद्वद्भूतेषु भूतात्मा सूक्ष्मो ज्ञानात्मवानसौ ।
अदृष्टपूर्वश्चक्षुर्भ्यां न चाऽसौ नास्ति तावता ॥
न शरीराश्रितो जीवस्तस्मिन्नष्टे विनश्यति ।
यथा समित्सु दग्धासु न प्रणश्यति पावकः ॥
न जीवनाशोऽस्ति हि देहनाशे
मिथ्यैतदाहुर्म्रियतेति मूढाः ।
जीवस्तु देहान्तरगः प्रयाति
दशार्द्धतैवास्य शरीरभेदः ॥

1 तन्नास्ति for तदस्ति—३

यथाऽर्चिषोऽग्नेः पवनस्य वेगाः
मरीचयोऽर्कस्य नदीषु चाऽऽपः ।
गच्छन्ति चाऽऽयान्ति च सन्ततास्तु
तद्वच्छरीराणि शरीरिणां तु ॥

'वशार्द्धता' पञ्चता, मरणमित्यर्थः ।

तथा[1]

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥

तथा

नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥
अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्याऽस्य न कश्चित् कर्तुमर्हति ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नाऽयं हन्ति न हन्यते ॥
न जायते म्रियते वा कदाचिन्
नाऽयं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥
वेदाऽविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥

1 भगवद्गीता—२ ११ १६-२४

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा
न्यन्यानि संयाति नवानि देही ॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
अच्छेद्योऽयमदाह्योऽय मक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।

[1]मार्कण्डेयपुराणे

सा वै मदालसा पुत्रं बालमुत्तानशायिनम् ।
उल्लापनच्छलेनाऽऽह रुदमानमविस्मयम्[2] ॥
शुद्धोऽसि रे तात न ते ऽस्ति नाम
कृतं हि तत् कल्पनयाऽधुनैव ।
पञ्चात्मकं देहमिदं न तेऽस्ति[3]
नैवाऽस्य त्वं रोदिषि कस्य हेतोः ॥
न वा भवान् रोदिति विश्वजन्मा
शब्दोऽयमासाद्य महीसमूहम्[4] ।
विकल्प्यमानो विविधैर्गुणार्थै[5]
र्गुणाश्च भौताः सकलेन्द्रियेषु ॥

1 २५, १०–१
2 अविस्तरमिति मुद्रित पुस्तके (श्रीवास्तमुद्रिते)
3 इदं नैतत् इति मु पु ३ ११
4 महीशसूनुम् इति मु पु ३ १५८
5 विकल्प्यमाना विविधा गुणास्तेऽगुणाश्च भौताः सकलेन्द्रियेषु। इति मु पु १८

भूतानि भूतै: परिवर्धितानि
  वृद्धिं समायान्ति यथैव पुंसाम् ।
अथाम्बुपानादिभिरयमस्य[1]
  न तेऽस्ति वृद्धिर्न च तेऽस्ति हानिः ॥
स्वं कञ्चुके जीर्यमाणे निजेऽस्मिन्
  [2]विमूढभाव मा स्म मा व्रजेथाः ।
शुभाशुभैः कर्मभिर्देहमेतत्
  मदादिमूढैः कञ्चुकस्तेऽपिनद्धः ॥
मातेति किञ्चित् तनयेति किञ्चित्
  अम्बेति किञ्चिद्दयितेति किञ्चित् ।
ममेति किञ्चिन्न ममेति किञ्चित्
  त्वं भूतसंघं बहुधा मयथा ॥

[3]तथा

यानं शिला यानगतश्च देहो
  देहेऽपि चान्यः पुरुषो निविष्टः ।
ममत्वमुर्व्यां[4] न तथा यथा स्वे
  देहेऽतिमात्रं बत मूढतैषा ॥

[5]तथा

[6]अन्नपानेद्धुम्बपरीतो मुञ्जमध्यात्मसतां यथा ।
एवमप्यसि पृथग्भावस्तथा देहात्मनो भवान् ॥

1 [illegible]
[illegible]
3 [illegible]
4 [illegible]
5 [illegible]
6 [illegible]

'एकस्थोऽपि' संश्लेषवशोनैकत्वाभिमानेऽपि ।

<u>महाभारत</u>

सत्त्वक्षेत्रज्ञयोरप्यन्तरं विद्धि सूक्ष्मयोः ।
सृजते तु गुणानेक एको न सृजते गुणान् ॥
तथो च हृदयग्रन्थिं बुद्धिचिन्तामयं दृढम् ।
विमुच्य सुखमासीत विमुक्तच्छिन्नसंशयः ॥

<u>[1]याज्ञवल्क्य</u>

अहंकारेण मनसा गत्या कर्मफलेन च ।
शरीरेण च नाऽऽत्माऽयं मुक्तपूर्वः कथंचन ॥
वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ।
विक्रियाऽपि च दृष्टैवमकाले प्राणसंक्षयः ॥
[2]यथाणुमात्रको भूत्वा बीजस्थस्तु चरिष्णुना ।
समाविशति संस्कारस्तथा मूर्तिं विमुञ्चति ॥

<u>ब्रह्माण्डपुराणे</u>

[3]ततः प्रयाणकाले हि दोषैर्नैमित्तिकैस्तथा ।
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥
शरीरमुपसृत्याऽथ कृत्स्नान् दोषान् रुणद्धि वै ।
प्राणस्थानानि निर्भिन्दन् पुनर्मर्माण्यतीव च ॥
शीतात् प्रकुपितो वायुरूर्ध्वं च क्रमते ततः ।
स वाऽयं सर्वभूतानां प्राणस्थानेष्ववस्थितः ॥

1 ३, ११४ ११५
2 Not found in याज्ञवल्क्यस्मृति and वी मि मो
3 ३ १, ११-१९

तमसा संवृते ज्ञाने संवृतेषु च कर्मसु ।
सजीवोनाऽभ्यधिष्ठानाच्छभ्यते मातरिश्वना ॥
स जीवश्चाभ्यमानश्च कर्मभिः स्वैः पराक्रमैः ।
अष्टाङ्गां प्राणवृत्तिं तां सम्यगव्यावपते[1] पुनः ॥
शरीरं प्रजहात्येव निरुच्छ्वासं ततो भवेत् ।
एवं प्राणैः परित्यक्तो मृत इत्यभिधीयते ॥
यथा चलाहकान् व्योम्नि भावोर्न च सततस्तुतः ।
[2]प्रावृट्काले पृथक्त्वेन पश्यन्ति हतचक्षुष ॥
पश्यन्त्येवंविधं जीवं सिद्धा दिव्येन चक्षुषा ।

[3]<u>महाभारते</u>

श्रीभगवानुवाच ।
ममैवांऽशो जीवलोके जीवभूतः सनातन ।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाऽऽशयात् ॥
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चाऽयं विषयानुपसेवते ॥
उत्क्रामन्तं स्थितं वाऽपि भुञ्जानं वा गुणान्वितम् ।
विमूढा नाऽनुपश्यन्ति पश्यन्ति ज्ञानचक्षुष ॥

<u>तथा</u>

पुरुषाधिष्ठिता बुद्धिस्तेषु भावेषु वर्त्तते ।
कदाचिल्लभते प्रीतिं कदाचिदनुशोचति ॥

1 This is also th reading of ग and वी मि मो पृ ११९ ग reads सम्यगुपरचते पुन ।

2 व ३ ७७

3 भगवद्गीता १५, ७-९

'एकत्वेऽपि' संश्लेषवशेनैकत्वाभिमानेऽपि ।

<u>महाभारते</u>

सत्वक्षेत्रज्ञयोरेषमन्तरं विद्धि सूक्ष्मयोः ।
सृजतेति गुणानेक एको न सृजते गुणान् ॥
ततो वै हृदयग्रन्थिं बुद्धिचित्तमयं दृढम् ।
विमुच्य सुखमासीत विमुक्तश्छिन्नसंशयः ॥

<u>[1]याज्ञवल्क्यः</u>

अहंकारेण मनसा गत्या कर्मफलेन च ।
शरीरेण च नाऽऽत्माऽयं मुक्तपूर्वः कथंचन ॥
वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ।
विक्रियाऽपि च दृष्टैवमकाले प्राणसंक्षयः ॥
[2]यथाणुमात्रको भूत्वा बीजस्थस्तु चरिष्णुना ।
समाविशति सम्यक्स्तदा मूर्तिं विमुञ्चति ॥

<u>ब्रह्माण्डपुराणे</u>

[3]ततः प्रयाणकाले हि दोषैर्नैमित्तिकैस्तथा ।
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥
शरीरमुपसृत्याऽथ कृत्स्नान् दोषान् रुणद्धि वै ।
प्राणस्थानानि निर्भिन्दन् पुनर्मर्माण्यतीत्य च ॥
शैत्यात् प्रकुपितो वायुरूर्ध्वं च क्रमते ततः ।
स चाऽऽर्ये सर्वभूतानां प्राणस्थानेष्ववस्थितः ॥

1 ३ १६४ १६
2 Not found in [illegible] and [illegible]
3 ४ १ १४ १

तमसा संवृते ज्ञाने संवृतेषु च कर्मसु ।
सजीवोनाऽभ्यधिष्ठानाच्छय्यते मातरिश्वना ॥
स जीवश्चाव्ययमानश्च कर्मभि स्वैः पराक्रमैः ।
अष्टाङ्गां प्राणवृत्तिं तां सम्यगव्यापयते[1] पुन ॥
शरीर प्रजहत्येव निरुच्छ्वासं ततो भवेत् ।
एवं प्राणैः परित्यक्तो मृत इत्यभिधीयते ॥
यथा बलाहकान् व्योम्नि खद्योतं च ततस्ततः ।
[2]प्रावृट्काले पृथक्त्वेन पश्यन्ति हतचक्षुष ॥
पश्यन्त्येवंविध जीवं सिद्धा दिव्येन चक्षुषा ।

[3]महाभारते

श्रीभगवानुवाच ।

ममैवांऽशो जीवलोके जीवभूतः सनातन ।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥
शरीर यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाऽऽशयात् ॥
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चाऽयं विषयानुपसेवते ॥
उत्क्रामन्तं स्थितं वाऽपि भुञ्जान वा गुणान्वितम् ।
विमूढा नाऽनुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥

तथा

पुरुषाधिष्ठिता बुद्धिस्तेषु भावेषु वर्तते ।
कदाचिल्लभते प्रीतिं कदाचिदनुशोचति ॥

1 This is also the reading of मा and वी मि मो पृ ११२ म. reads सम्यगपयते पुन ।

2 ४ १ ७७

3 भगवद्गीता १५, ७–९

'एकत्वेऽपि' संश्लेषवशेनैकत्वाभिमानेऽपि ।

<u>महाभारते</u>

सत्त्वक्षेत्रज्ञयोरेवमन्तरं विद्धि सूक्ष्मयोः ।
सृजतेति गुणानेक एको न सृजते गुणान् ॥
ततो वै हृदयग्रन्थिं बुद्धिविस्मय दृढम् ।
विमुच्य सुखमासीत विमुक्तश्छिन्नसंशयः ॥

<u>[1]याज्ञवल्क्यः</u>

अहंकारेण मनसा गत्या कर्मफलेन च ।
शरीरेण च नाऽऽत्माऽयं मुक्तपूर्वः कथंचन ॥
वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ।
विक्रियाऽपि च दृष्टैवमकाले प्राणसंक्षयः ॥
[2]यथाणुमात्रको भूत्वा बीजस्थस्तु चरिष्णुना ।
समाविशति संसृष्टस्तथा मूर्तिं विमुञ्चति ॥

<u>ब्रह्माण्डपुराणे</u>

[3]ततः प्रयाणकाले हि दोषैर्निमित्तकैस्तथा ।
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥
शरीरमुपसृत्याऽथ कृत्स्नान् दोषान् रुणद्धि वै ।
प्राणस्थानानि निर्भिन्दन् पुनर्मर्माण्यतीव च ॥
शैत्यात् प्रकुपितो वायुरूर्ध्वं च लभते ततः ।
स चाऽयं सर्वभूतानां प्राणस्थानेष्ववस्थितः ॥

1 ३ १६४–१६५
2 Not found in याज्ञवल्क्यस्मृति and वी मि मो.

[1]महाभारते

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः[2] ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥
तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चाऽनघ ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥
सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥
रजस्तमश्चाऽभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥
सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत ॥
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदांल्लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥

1 भगवद्गीता—१४ ५–१४
2 प्रकृतिजेन इति उत्तमपुरुषानुभवात्

न सुखेन न दुःखेन कदाचिदपि वर्तते ।
इन्द्रियाणां स्वकार्येभ्यो[1] श्रमादुपरमो यथा ॥
भवतीन्द्रियसंन्यासादथ स्वपिति वै नरः ।
इन्द्रियाणामुपरमात् मनोऽनुपरतं यथा ॥
सेवते विषयानेव तद्विन्द्यात् स्वप्नदर्शनम् ।

ब्रह्माण्डपुराणे

[2]अतत्त्वदर्शनात्तस्मं त्रिविधं बध्यते सदा ॥
प्राकृतेन च बन्धेन[3] तथा वैकारिकेण च ।
दक्षिणाभिस्तृतीयेन बद्धोऽत्यन्तं विवर्तते ॥
इत्येते वै त्रयः प्रोक्ता बन्धा अज्ञानहेतवः ।
अनित्ये नित्यसंज्ञा च दुःखे च सुखदर्शनम् ॥
अस्वे स्वमिति च ज्ञानमशुचौ शुचिनिश्चयः ।
रागद्वेषविशुद्धिश्च तदज्ञानमुदाहृतम् ॥

देवलः[4]

प्रकृतिबन्धो, वैकारिकबन्धो, दक्षिणाबन्ध इति बन्धत्रयी । तत्राऽव्यक्तादिभिरष्टभिर्बन्धः प्रकृतिबन्धः । इन्द्रियैरिन्द्रियार्थेषु बन्धो वैकारिकबन्धः । इष्टापूर्तादिभिर्बन्धो दक्षिणाबन्धः । तत्र प्रकृतिषु बन्धो देवतानां दक्षिणाभि राश्रमिणां वैकारैरन्येषां धर्मोऽज्ञानानि[5] च बन्धहेतवः ।

1 स्वकर्मभ्य —ख and ग
2 ४ ३, १०-४ ; [illegible] —बी मि. मो पृ १४१
3 बन्धेन for बोधेन—बी मि मो पृ १४१ and ख
4 बी मि मो—पृ १४१ १४२

[1]महाभारते

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः[2] ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥
तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चाऽनघ ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥
सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥
रजस्तमश्चाऽभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥
सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत ॥
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥

1 भगवद्गीता—१४ ५-१४
2 प्रकृतिहेतव इति उदयपुरमातृकायाम्

न सुखेन न दुःखेन कदाचिदपि वर्तते ।
इन्द्रियाणां स्वकार्येभ्यो[1] क्रमादुपरमो यथा ॥
भवतीन्द्रियसंन्यासादथ क्षपिति वै नरः ।
इन्द्रियाणामुपरमात् मनोऽनुपरतं यथा ॥
सेवते विषयानेव तद्विन्द्यात् स्वप्नदर्शनम् ।

ब्रह्माण्डपुराणे

[2]अतत्त्वदर्शनात्सत्त्वं त्रिविधं बध्यते सदा ॥
प्राकृतेन च बन्धेन[3] तथा वैकारिकेण च ।
दक्षिणाभिस्तृतीयेन बद्धोऽत्यन्तं विवर्तते ॥
इत्येते वै त्रयः प्रोक्ता बन्धा अज्ञानहेतवः ।
अनित्ये नित्यसंज्ञा च दुःखे च सुखदर्शनम् ॥
अस्वे स्वमिति च ज्ञानमशुचौ शुचिनिश्चयः ।
रागद्वेषविवृद्धिश्च तदज्ञानमुदाहृतम् ॥

देवलः[4]

प्रकृतिबन्धो, वैकारिकबन्धो, दक्षिणाबन्ध इति बन्धत्रयी । तत्राऽव्यक्तादिभिरष्टभिर्बन्धः प्रकृतिबन्धः । इन्द्रियैरिन्द्रियार्थेषु बन्धो वैकारिकबन्धः । इष्टापूर्तादिभिर्बन्धो दक्षिणाबन्धः । तत्र प्रकृतिषु बन्धो देवतानां दक्षिणाभि राश्रमिणां वैकारैरन्येषां धर्मोऽज्ञानानि[5] च बन्धहेतवः ।

1 स्वकर्मेभ्य — स and मा
2 [illegible] — अतत्त्वदर्शनात् [illegible] — भी मि मो पृ १४१
3 बन्धेन for बन्धेन—भी मि मो पृ १४१ and स.
4 भी मि मो—पृ १४१ १४१
5 भी मि मो—पृ १४२.

त्रयाणामपि चैतेषां गुणानां यः फलोदयः ।
अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥
वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियाऽऽत्मचिन्ता च सात्त्विकं गुणलक्षणम् ॥
आरम्भरतिता[1] ऽधैर्यमसत्कार्यपरिग्रहः ।
विषयोपसेवा चाऽजस्रं राजसं गुणलक्षणम् ॥
लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥
त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम् ।
इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥
यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जते ।
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥
येनाऽस्मिन् कर्मणा लोके ख्यातिं गच्छति पुष्कलाम् ।
न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसम् ॥
यत्सर्वं नेच्छति ज्ञातुं लज्जते न यदाचरन्[2] ।
येन तुष्यति चास्याऽऽत्मा तत्सत्त्वगुणलक्षणम् ॥
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते ।
सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथाक्रमम्[3] ॥

'सत्त्व' ज्ञानमित्यादि—'ज्ञानं' विवेकः । 'अज्ञानं' मोहः । 'उभयरूप' रजः । 'रागद्वेष' शब्देनोभयकर्मयोग मुच्यते । सामान्यमेतदेषां लक्षणम् व्यापि सर्वप्राणिषु । अप्रतर्क्यं तर्कोऽनुमानम्, तदगोचरः । सात्त्विकं लक्षणमिति ।

1 आरम्भरुचिता इति मुद्रितपुस्तकपाठ
2 यत्सर्वमिच्छति ज्ञातुं यन्न लज्जति चाचरन् इति मुद्रितपुस्तकपाठ
3 यथोत्तरम् इति मुद्रितपुस्तकपाठ

कर्मणः सुकृतस्याऽऽहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्थाः [1]अधो गच्छन्ति तामसाः ॥

<u>मनुः</u>[2]

सत्त्वं रजस्तमश्चैव त्रीन् विद्यादात्मनो गुणान् ।
यैर्व्याप्येमान् स्थितो भावान् महान् सर्वानशेषतः ॥
यो यथैषां[3] गुणो देहे साकल्येनाऽतिरिच्यते ।
स तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥
सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम् ।
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः[4] ॥
यत्र दुःखसमायुक्तमप्रीतिकरमात्मनः ।
तद्रजो प्रतिघं[5] विद्यात् सततं हारि देहिनाम् ॥
यत्तु स्यान्मोहसंयुक्तं स व्यक्तविषयात्मकम् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥
तत्र यत् प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ।
प्रशान्तमिव शुद्धाभं सत्त्वं तदुपधारयेत् ॥

1 We follow S'aṅkara reading वृत्तस्था ; ... adopts Rāmānuja's reading वृत्तिस्था ; Udaipur M has वृत्तिस्था

2 १२ २४ ३८

3 यदैषामिति कृत्यकल्पतरु

4 १६, १७ is omitted here by *Lakṣmīdhara* and brought in later

5 प्रतिघम् इति कृत्यकल्पतरु

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥
यया धर्ममधर्मं च कार्यं चाऽकार्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥
अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥
धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाऽव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥
यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च नियच्छति[1] ॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥
विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥
यदग्रे चाऽनुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥
न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥

1 निगच्छति इति शांकरपाठ

सत्त्वगुणमेतल्लक्षणमित्यर्थः । 'आरम्भरतिता' कर्मणां का-
म्यानां दृष्टार्थानां चाऽऽरम्भाभिरतित्वम् । 'अधैर्य' स्वल्पेऽप्यु-
पद्रवहेतौ चेतसो ऽसमाश्वासः । 'असत्कार्य' परिग्रहः ।
'लोकशास्त्रविरुद्धकर्माचरणं' स्वल्पेऽप्यपराधे वैरानुबन्धः ।
'निष्ठुरिता' शीलभ्रंशः । 'याचिता' याचनशीलत्वम् ।

<u>महाभारते</u>[1]

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥
यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चाऽमेध्यं भोजनं तामसप्रियम् ॥

<u>तथा</u>[2]

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
[3]हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः[3] ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥

1 भगवद्गीता १७ –१
2 तथा omitted in the Mss १८ २६–२
3 Lacuna from this point in [illegible] Ms.

[1तथा]

यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् ।
नानारूपाणि कुरुते तथाऽऽत्मा कर्मजास्तनूः ॥

[2तथा]

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथाऽऽत्मैकोऽप्यनेकश्च 3जलपात्रेष्विवांऽशुमान् ॥

[4तथा]

बुद्धीन्द्रियाणि सर्वाणि5 मनः कर्मेन्द्रियाणि च ।
अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥
अव्यक्त आत्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ।
ईश्वरः सर्वभूतानां 6सदसत् सदसच्च यः ॥

'आत्मानः प्रभवन्ति' शुभाशुभकर्मवशेन स्थूलशरीराभिमानिनो जायन्ते। '7स्वयं किंचित् करोति' हिताहितप्राप्तिपरिहारार्थं स्वातंत्र्येण यावत् करोति। '8स्वभावतो' जात्याद्युपाधिवशेन यत् करोति यथोष्ट्रस्य कण्टकाशनशीलताभ्यासवशेन। 'यत्किंचित्' दानाध्ययनादीनि 'गुणी'

1 ३ १६२
2 ३ १४४
3 जलपात्रे इति मिताक्षरापाठः
4 ३ १७८–१७९
5 सर्वाणि for सर्वाणि in printed या मि
6 सदसच्चसदसच्च य इति मु मिताक्षरापाठः
7 cf. मि मोक्षप्रकाश —पृ २६७ —
"स्वयं किंचित् ... स्वात्मनो ... अन्वयव्यतिरेकानुमानानिरपेक्षस्तन् प्राग्भवीयानुभवजन्यधर्मसंस्कारात् स्मरणादेव प्रवर्तते स्वभावतो ... प्रयोजनाभिसन्धिनिरपेक्षं ... पिपीलिकादिर्मवत् करोति इति विज्ञानेश्वरः
8 "स्वभावतः जातिवशतः यथोष्ट्रस्य कण्टकाशनशीलता इति" ... मुद्रितमिताक्षरायां तु पाठोऽन्यथा दृश्यते

॥ १४ ॥

अथ जीवब्रह्मात्मभाव

[1]तत्र याज्ञवल्क्यः

[2]निश्चरन्ति यथा लोहपिण्डात्तप्तात् स्फुलिङ्गकाः।
सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति हि॥
तत्राऽऽत्मा हि स्वयं किञ्चित् कर्म किञ्चित्स्वभावतः।
करोति किञ्चिदभ्यासाद्धर्माधर्मोभयात्मकम्॥
निमित्तमक्षरः कर्ता बोद्धा ब्रह्म गुणी वशी।
अजः शरीरग्रहणात् स जात इति कीर्त्यते॥
सर्गादौ स यथाऽऽकाशं वायुर्ज्योतिर्जलं महीम्।
सृजत्येकोत्तरगुणांस्तथाऽऽदत्ते भवन्नपि॥
आहुत्याऽऽप्यायते सूर्यः सूर्याद्वृष्टिरथौषधीः।
तदन्नं रसरूपेण शुक्रत्वमुपगच्छति॥
स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते।
पञ्च धातून् स्वयं षष्ठ आदत्ते युगपत् प्रभुः॥
इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः।
धारणं प्रेरणं दुःखं इच्छाऽहंकार एव च॥
प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ।
तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः॥

1 ३ ६७—७४
2 निश्चरन्तीति मिताक्षरापाठः

[[1]तथा]

यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् ।
नानारूपाणि कुरुते तथाऽऽत्मा कर्मजास्तनूः ॥

[[2]तथा]

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथाऽऽत्मैकोऽप्यनेकश्च [3]जलपात्रेष्विवांऽशुमान् ॥

[[4]तथा]

बुद्धीन्द्रियाणि सर्वाणि[5] मनः कर्मेन्द्रियाणि च ।
अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥
अव्यक्त आत्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ।
ईश्वरः सर्वभूतानां [6]सदसत् सदसच्च यः ॥

'आत्मानः प्रभवन्ति' शुभाशुभकर्मवशेन स्थूलशरीराभिमानिनो जायन्ते। '[7]स्वयं किंचित् करोति' हिताहितप्राप्तिपरिहारार्थं स्वातन्त्र्येण यावत् करोति। '[8]स्वभावतो' जात्याद्युपाधिवशेन यत् करोति यथोष्ट्रस्य कण्टकाशनशीलताभ्यासवशेन। 'यत्किंचित्' दानाध्ययनादीनि 'गुणी'

1 ३ १६२
2 ३ १४४
3 जलाधारे इति मिताक्षरापाठ
4 ३ १७८–१७९.
5 सर्वाणि for सर्वापि in printed बा मि.
6 सदसत्सदसच्च यः इति मु मिताक्षरापाठ
7 बा मि मोक्षप्रकाश —पृ २६७ —

"स्वयं किंचित् स्वात्मपारतन्त्र्यव्यतिरेकेणान्यकर्मानिरपेक्षस्सन् प्राग्भवीयानुभवजन्यसंस्कारोद्बुद्धस्मरणादेव प्रवर्तते स्वभावतो यत्कश्चन प्रयोजनमनभिसंधायापि निरपेक्षं पिपीलिकादिभक्षणं करोति इति विज्ञानेश्वरः

8 "स्वभावतः जातिवशात् यथोष्ट्रस्य कण्टकभक्षणशीलत्वम् इति" कल्पतरुः शूलपाणिमिश्रपादाः तु पाठोऽन्यथा दृश्यते

शक्तिद्वारेण सत्त्वादिगुणयोगी 'वशी' स्वतन्त्रः। 'पञ्च धातून्' पञ्च भूतानि। 'धृतिः' चित्तस्थैर्यम्। 'भवः' धनपुत्रादिसंपत्तिः। तद्विपर्ययश्चाऽभवः। 'भरतो' नटः। 'सर्वाणि' शास्त्रार्थसहितानि।

[1]महाभारते

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥
क्षेत्रज्ञं चाऽपि मां विद्धि सर्वक्षेत्रेषु भारत।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तद् ज्ञानं मतं मम॥

[2]तथा

अनादिमत्परं ब्रह्म न सत्तन्नाऽसदुच्यते।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥

[तथा[3]]

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाऽप्युक्तो देहेऽस्मिन् पुरुषः परः॥

[तथा][4]

अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्राऽवस्थितो देहे तथाऽऽत्मा नोपलिप्यते॥

1 भगवद्गीता १३ १-२
2 भगवद्गीता १३ १३-१४
3 भगवद्गीता १३, २२
4 भगवद्गीता १३ ३१-३२

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥

तथा (?)

[1]एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥

[2]तथा

आश्चर्यवत् पश्यति कश्चिदेन-
माश्चर्यवद् वदति तथैव चाऽन्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥

याज्ञवल्क्यः[3]

यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते ।
[4]ईश्वरः स कथं भावैरनिष्टैः[5] सम्प्रयुज्यते ॥
करणैरन्वितस्याऽपि पूर्वज्ञानं कथं च न ।
वेत्ति सर्वगतां कस्मात्सर्वगोऽपि न वेदनाम् ॥

[[6]तथा]

रजसा तमसा चैव[7] समाविष्टो भ्रमन्निह ।
भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ॥

1 कठोपनिषद् ३. १२. तथा is wrong as it is not found in the Gītā
2 भगवद्गीता २. २९.
3 ३. १३९—
4 Lacuna in Sarasvatībhavan Ms. ends here
5 अनिष्टैः इति मिताक्षरापाठः
6 ३. १४०—१४१
7 एवं इति मिताक्षरापाठः

मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः ।
[तथाऽविपक्वकरण आत्मज्ञानस्य न क्षमः][1]
कट्वेर्वारौ यथाऽपक्व मधुर सन्नसोऽपि न ॥
प्राप्यते ह्यात्मनि तथा नाऽपक्वकरणे ज्ञाता ।
सर्वाश्रयां निजे देहे देही विन्दति वेदनाम् ॥
योगी युक्तश्च सर्वासां यो न नाऽऽप्नोति वेदनाम् ।

'यथेव मनि' यथात्मैव जीवमात्र भजत, तथासौ पापयोनिषु शूकरादिकासु जायते ।

'यथेव' मित्यादिनोक्तमनस्ये क्रमेणोत्तरमाह— 'रजसा तमसा चे'त्यादिना ।

'कट्वेर्वारौ' तिक्तकर्कटिकायाम् । 'निजदेहे' स्वकर्मोपार्जितशरीरे । 'योगी युक्तश्चे'त्यादि यश्च योगी युक्तो भवति सर्वासां वेदनानां वदिता भवति । न च दुःखोपभोक्तेत्यर्थः ।

ब्रह्मपुराणे

एक एव परात्माऽसौ द्विधा भिन्नस्तु दृश्यते ।
भोक्ता भोग्य च लोकेऽस्मिन् स एव परमेश्वरः ॥
कुर्वन्त्यचेतनाः कर्म देहेन्द्रियगुणाः समाः ।
चेतनस्तदधिष्ठाता शान्तात्मा न करोत्यसौ ॥
चलत्यचेतनं शस्त्रं ग्रामके निकटस्थिते ।
देहे च करणग्रामे चेष्टते तदधिष्ठितः ॥
आदित्येऽभ्युदिते लोकः कर्माणि कुरुते रविः ।
[2]न तानि कुरुते नाऽन्यत् कारयत्यपि कुत्रचित् ॥

1 [ ] missing in the Mss

2 Four lines from this are confused in ख

किन्तु स्वभाव एवैष नैस्थिकः सूर्यलोकयोः ।
चिन्मात्र सूर्यवद्ज्ञेयो लोकवत् करणान्यपि ॥
चैतन्यबोधितस्याऽपि ममतामूर्छितस्य च ।
प्रभवे सुखदुःखेषु भावना मनसो भवेत् ॥
प्रवृत्त्वे चाऽऽत्मकर्तृत्वे भोक्तृत्वे कर्मणामपि ।
उत्तमाधममध्यानां ममाऽहमिति मूढवत् ॥
सर्वगोऽपि शरीरस्थस्तद्ध्यानमनुवर्त्तते ।
नानाविधानां वर्णानां वर्णं धत्ते सुनिर्मलः ॥
स्फटिको न च ते तस्मादुत्पन्नास्तेऽपि नाप्यसौ ।
रजस्तमोभ्यां तत्त्वस्य यथोपाधिश्च निर्मितः ॥
तस्य भाव विभुर्धत्ते न ते तस्य न तस्य सः ।
चले चल स्थिरे तिष्ठस्तोये चन्द्रार्कबिम्बवत् ॥
आत्मा तु करणग्रामे दृश्यते न च तत्तया ।
अदृश्यो दृश्यतामेति राहुश्चन्द्रार्कमण्डले ॥
आत्मा सर्वगतो बुद्धौ दृश्यते चाऽपि संस्थित ।
दर्पणे निर्मले लोको निश्चैतन्यैः स्वमाननम् ।
पश्यत्यात्मानमात्माऽयं निर्मलायां धियि स्वयि ॥
वर्णाश्रमास्तथा वासः स्वर्गे नरक एव च ।
पुरुषस्य न सन्त्येते परमात्मनः कुत्रचित् ॥
दृश्यते च जगद्रूपमसत्यं सत्यवन्मृषा ।
तोयवत् मृगतृष्णास्तु तथा मरुमरीचिषु ॥
एक एव सूर्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मैव सर्वाधारेषु संस्थितः ॥
[1]ब्रह्म चैव शरीरेषु बाह्ये चाऽभ्यंतरे स्थितम् ।
आकाशमिव कुम्भेषु बुद्धिगम्यं न चाऽन्यथा ॥

1 ब्रह्म सर्व शरीरेषु इति ग

गर्ये सति यथा बुद्ध्या देहोऽहमिति मन्यते ।
अनात्मनात्मनो भ्रान्त्या मा स्यात् समारबन्धना ॥
सर्वविकल्पैर्हीनस्तु शुद्धो बुद्धोऽजरामरः ।
प्रशान्तो व्योमवद् व्यापी चैतन्यात्मा सकृत्प्रभुः ॥
शर्करा गुडखण्डा वा यथेक्षुरसोद्भवाः ।
तथाऽवस्थाप्रमेयाश्च यद्रूपा ह्यात्मनः ॥
प्राणोऽथिरादयिज्ञानमन्तर्याम्यविकारकः ।
देशकालशरीराग्नि तस्याऽपम्याभिधानवत् ॥
प्राणादनन्तभेदैश्च स्वमात्मानं तु जालवत् ।
विहृत्य संहरत्येव मीडमानः स्वयं हरिः ॥
अमात्रैरादिमध्यान्तैर्ब्रह्मसूत्रैस्त्रिभिः सदा ।
जाग्रत्स्वप्नसुषुप्तैश्च छादितं विश्वतेजसम् ॥
तुर्यं तु परमात्मानमव्यक्तं शाश्वतं पदम् ।
ज्ञेया जाग्रदवस्था च प्रजागरणजाग्रवत् ॥
स्वप्नावस्था च बुद्धयोनि सूक्ष्मतावत्था स्थितस्य च ।
देहेन्द्रियगुणानां च परित्यागः सुषुप्तता ॥
संयोगः सर्वभावानां तुर्यं चिन्मात्रमुच्यते ।
धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते ॥
प्राकृतैरपसृष्टो न विकारैः पुरुषस्तथा ।
यथैकस्मिन् घटाकाशे मलैर्धूमादिभिर्भिते ॥
नाऽन्ये यान्ति मलिनतां दूरस्थाः कुत्रचित्क्वचित् ।
तथा द्वन्द्वैरनेकैश्च जीवे च मलिनीकृते ॥
एकस्मिन्नाऽपरे जीवा मलिनाः सन्ति कुत्रचित् ।

'भोग्यं' पृथिव्यादि विकारजातम् । 'शर्करा'लोहम् । 'तत्स्वभावानुगं मम:' स्वभावानुगः । 'धिषि'बुद्धौ

महत्तत्त्वे । 'अभिधानवत्' देवदत्तादिनामवत् । 'दूरस्थाः' घटाकाशाः ।

तथा

एकस्मादेव चैतन्याज्जाताः क्षेत्रज्ञजातयः ।
लोहात् ज्वलनसन्दीप्तान्मरीचय इवाऽऽस्तृताः ॥
विभागत्यागसंयोगजन्ममृत्युसमागमैः ।
वर्जितः सर्वभूतात्मा नभः कुम्भेष्ववस्थितः ।
तत्र सक्तस्तु पुरुषो बध्यते प्रकृतेर्वशात् ॥
घोरसंसर्गदोषेण बध्यते शीलवानिव ।
तुषारो बुद्बुदः फेनो जलस्य सहजास्त्रयः ॥
अग्नेर्धूमस्तथा विष्णोर्मायैषा सहजा सदा ।
एतां विमोहनिर्व्यक्तां मायां द्वैतस्वरूपिणीम्[1] ॥
अद्वैतं भावयेद्ब्रह्म सकलं निष्कलं सदा ।

[2]महाभारते

श्रीभगवानुवाच ।

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥

1 "एतां व्यामोहिनीं त्यक्त्वा मायां वै तस्य रूपिणीम् इति प
2 भगवद्गीता १३, १९-२१

[1]प्रकृतिस्तेजोबन्नलक्षणा प्रवाहरूपेणाऽनादिः, सर्गः पुनः प्रलयः पुनरिति संसारस्याऽनादित्वात्। पुरुषः परमात्मांशोऽनादिरभिन्नोऽपि सन् परमार्थतो न कदाचित्पृथक् पूर्वः। 'कर्माऽविद्याभ्यामि'ति, कार्यं शरीरं, कारणानीन्द्रियाणि, तयोः कर्तृत्वे निर्वर्तकत्वे प्रकृतिः कारणं। एतेन भोग्यवर्गः सर्वः प्रकृतितो जायत इत्युक्तं भवति। 'प्रकृतिस्थः' कार्यकारणसङ्घातस्थः। 'भुंक्ते [2]प्रकृतिजान्' प्रकृतितो जातान् सुखदुःखमोहान् भुंक्ते। 'गुणेषु' कार्यकारणलक्षणेषु 'सङ्गो' विपरीतग्रहोऽहंममेति प्रत्ययः सदसद्योनि प्राप्तिषु कारणमित्यर्थः। 'सद्योनयो' देवाद्याः, 'असद्योनय' स्तिर्यगाद्याः, मध्यपोनयस्तु मनुष्या इति।

[3]तथा

> भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
> अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
> अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
> जीवभूतां महाबाहो ययेदं धार्यते जगत्॥
> एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
> अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥

1 श्री मि मोक्षप्रकाश पृ १११—"[illegible]—प्रकृतिस्त्रैगुण्यलक्षणा अनादि पुनस्सर्ग पुन प्रलय इति प्रवाहरूपेण। पुरुषो जीव अनादि परमात्मनोऽभिन्नोऽपि तत्त्वविचार पूर्वं न कदाचिदस्मात् इति व्याख्यानम्"

2 श्री मि मोक्षप्रकाश पृ १११—"प्रकृतिर्माया। स त्रिगुणा। तस्याज्जातोऽयम्। प्रकृतिस्थ इति भाष्यकार। कार्यकारणसंघातस्थ इति [illegible], "प्रकृतिस्थ प्रकृतिसंसृष्ट इति श्रीरामानुजभाष्ये; "प्रकृतिस्थ प्रकृतौ अविद्यालक्षणायां स्थित प्रकृतिस्थ इति श्रीशङ्करभाष्ये

3 भगवद्गीता ७ ४ ७

मत्तः परतरं नाऽन्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
[1]ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥
त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाऽभिजानाति मामेभ्यः परमव्ययम् ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥

[तथा]

[2]मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाऽहं तेष्ववस्थितः ॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममाऽऽत्मा भूतभावनः ॥
यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥
न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥

1 भगवद्गीता ७ १२-१५
2 भगवद्गीता ९ ४-११

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते ॥
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥

[तथा]

[1]अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

'जीवभूतां' जीवत्वं प्राप्ताम् । भोक्तृत्वेनाऽवस्थितां चेतनाम् । 'प्रोतं' ग्रथितम् ।

विष्णुपुराणे

[2]विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् ।
द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥

तथा

[3]ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥

1 भगवद्गीता ४ ६
2 १ १ ८४
3 १ ५ ४

[1]ज्योतींषि विष्णुर्भुवनानि विष्णुः
वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं
यदस्ति यन्नाऽस्ति च विप्रवर्य ॥
ज्ञानस्वरूपो भगवान् यतोऽसा
वशेषमूर्तिर्न च वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि ॥
यदा तु शुद्धं निजरूपि सर्वं
कर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि सङ्कल्पतरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः ॥
वस्त्वस्ति किं कुत्रचिदादिमध्य
पर्यन्तहीनं सततैकरूपम् ।
यच्चाऽन्यथात्वं द्विज याति भूयो
न तत्तथा तत्र कुतो हि तत्त्वम्[2] ॥
[2]मही घटत्वं घटतः कपालिकाः
कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्मस्तिमितात्मनिश्चयै
रालक्ष्यते ब्रूहि किमत्र तत्त्वम्[3] ॥
तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्
क्वचित् कदाचित् द्विज वस्तुजातम् ।

1 विष्णुपुराण (गोरखपुर) २, १२ ३८–४०

2 Sentence confused in all three manuscripts restored from printed वि पु

3 वस्तु इति मु. पु. पृ. १७५

विज्ञानमेकं निजकर्मभेद
विभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥
ज्ञानं विशुद्धं विमलं विशोक
मशेषलोभादि निरस्तसङ्गम् ।
एकं सदैकं परमं परेशः
स वासुदेवोऽस्ति यतो न किञ्चित्[1] ॥
सद्भाव एवं भवतो मयोक्तो
ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत् संव्यवहारभूतं
तत्रापि चोक्तं भुवनाश्रितं ते ॥
यज्ञः पशुर्वह्निरशेष ऋत्विक्
सोमः सुराः स्वर्गमयश्च कामः ।
इत्यादिकर्माश्रितमार्गदृष्टं
भूरादिभोगाश्च फलानि तेषाम् ॥
यच्चैतत् भुवनगतं मया तवोक्तं
सर्वत्र व्रजति हि तत्र कर्मवश्यः ।
ज्ञात्वैतत् ध्रुवमचलं स चैकरूपं
तत्कुर्याद्विशति हि येन वासुदेवम् ॥

'ज्ञानस्वरूपं' ज्ञानं चित्स्वरूपं, ब्रह्म तदात्मकं जगत्। यथा मृत्स्वरूपो घटः। 'अगुणपः' अतत्त्वज्ञः। '*अर्थस्वरूपं' यत् स्वभावं प्रकृत्याद्युपाधिसत्तया तत्स्वरूपम्।

1 स वासुदेवो न यतोऽन्यदस्ति इति मु पु पृ १७५.
2 वी. सि मोक्षप्रकाश पृ १ १ —
* अर्थस्वरूप प्रकृत्यादर्थमात्रेणाभिनिवेश स्वरूपं मन्यमाना मोक्षेणे बद्ध्यमाने, मिथ्याज्ञानकारणे इति कल्पतरु

'मोहसम्प्लवे' मिथ्याज्ञानसागरे। 'यदस्मि यन्नास्मि चे'ति यद्भावस्वरूपं तत्सर्वं स एवेत्यर्थः। 'न च वस्तुभूतः' न यत् पृथिव्यादिभिः भूतः। 'नो वस्तुषु वस्तुमेव' इति न क्रियाकारकवस्तुषु पृथिव्यादिषु जातस्वभावेष्वेव सत्सु वस्तुमेवात् घटादयो भवन्ति। किन्तु संकल्पवशेनेत्यर्थः।

तथा च श्रुतिः

'संकल्पादेवाऽस्य पितर उपतिष्ठन्ति' इति।

व्याख्यातश्चेदं 'संकल्पादेव तु तच्छ्रुतेः' इत्यत्र वेदान्तसूत्रे। 'असत्यमन्य'दिति अन्यद्व्यापमिरिक्तमसत्य मन्यथात्व भजते विनश्यतीत्यर्थः। 'सद्भाव एव' इत्यादि श्लोके कर्मकाण्डस्याऽनित्यत्वात् 'ज्ञानेन वासुदेवमाप्तो यज्ञः कर्तव्य इत्युक्तं भवति।

इति कृत्यकल्पतरौ मोक्षकाण्डे वैराग्यपर्व[1]।

1 This is mentioned thus in the नियमनिरा

विज्ञानमेकं निजकर्मभेद
विभिन्नवृत्तैर्बहुधाऽभ्युपेतम् ॥
ज्ञानं विशुद्धं विमलं विशोक-
मशेषलोभादि निरस्तसङ्गम् ।
एकं सदैकं परमं परेशः
स वासुदेवोऽस्ति यतो न किञ्चित्[1] ॥
सद्भाव एवं भवतो मयोक्तो
ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत् संव्यवहारभूत
तत्राऽपि चोक्तं भुवनाश्रितं ते ॥
यज्ञे पशुर्वह्निरशेष ऋत्विक्
सोमः सुराः स्वर्गमयश्च कामः ।
इत्यादिकर्माश्रितमार्गदृष्टं
भूरादिभोगाश्च फलानि तेषाम् ॥
यच्चैतत् भुवनगतं मया तवोक्तं
सर्वत्र व्रजति हि तत्र कर्मवश्यः ।
ज्ञात्वैतत् ध्रुवमचलं स चैकरूपं
तत्कुर्याद्विशति हि येन वासुदेवम् ॥

'ज्ञानस्वरूपं' ज्ञानं चित्स्वरूप, ब्रह्म तदात्मकं जगत्। यथा मृत्स्वरूपो घटः। 'अबुद्धय' अतत्त्वज्ञाः। '[2]अर्थस्वरूपं' यत् स्वभावं प्रकृत्याद्यर्थोपादानतया तत्स्वरूपम्।

1 न वासुदेवो न यतोऽन्यदस्ति इति मु पु पृ १०५.
2 वि. पि. मोक्षधर्म पृ १ १ —
"नवतत्त्वं [illegible] [illegible] [illegible] [illegible] [illegible] इति वचनात् "

कर्मणा जायते प्रेत्य मूर्तिमान् षोडशात्मकः ।
विद्यया जायते नित्यमव्ययो ह्यव्ययात्मकः ॥
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धितरा नराः ।
तेन ते देहजातानि रमयन्त उपासते ॥
ये तु बुद्धिं परां प्राप्ता धर्मनैपुण्यदर्शिनः ।
न ते कर्म प्रपद्यन्ति कूपं नद्या पिबन्निव ॥
कर्मणः फलमाप्नोति सुखदुःखे भवाभवौ ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचते ॥
यत्र गत्वा न म्रियते यत्र गत्वा न जायते ।
न जीर्यते यत्र गत्वा यत्र गत्वा न वर्द्धते ॥

'धर्मनैपुण्यदर्शिनः' परमं भूमिमाधनं तारतम्यं वि जानन्तः ।

यथाऽऽह मनुः[1]

अयं तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनमिति ।

'भवाभवौ' जन्ममरणे । 'विद्यया' ब्रह्मज्ञानेन ।

मार्कण्डेयपुराणे

पुत्र उवाच

एवं संसारचक्रेऽस्मिन् भ्रमता तात संकटे ।
ज्ञानमेतन्मया प्राप्तं मोक्षसम्प्राप्तिकारणम् ॥
विज्ञायतेऽत्र सर्वोऽयमृग्यजुःसामसंज्ञितः ।

'ऋग्यजुःसामभिः' घोषितः ।

1 Not found in मनुस्मृति but it is in the याज्ञवल्क्यस्मृति, १ ८

॥ १५ ॥

अथ ज्ञानकर्मोपयोगः

तत्र महाभारते

मोक्षे हि त्रिविधा निष्ठा दृष्टा पूर्वैर्महर्षिभिः।
ज्ञाननिष्ठां वदन्त्येके मोक्षशास्त्रविदो जनाः॥
कर्मनिष्ठां तथैवान्ये यतयः सूक्ष्मदर्शिनः।
प्रहायोभयमप्येवं ज्ञानं कर्म च केवलम्॥
तृतीयेयं समाख्याता निष्ठा तेन महात्मना।

तथा

शुक उवाच।

यदिदं वेदवचनं कुरु कर्म त्यजेति च।
कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्मणा
एतद्वै श्रोतुमिच्छामि तद्भवान् प्रब्रवीतु मे।
एतयोऽन्योन्यवैरूप्ये वर्तते प्रतिकूलता॥
इत्युक्तः प्रत्युवाचेदं पराशरसुतः सुतम्।
कर्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ॥
यां दिशं विद्यया यान्ति यां च गच्छन्ति कर्मणा
शृणुष्वैकमनाः पुत्र गह्वरं ह्येतदन्तरम्॥
कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः॥

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥
इह चाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते[1] ॥
प्रवृत्तं कर्म संसेव्य देवानामेति सात्मताम्[2] ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥
सर्वभूतेषु चाऽऽत्मानं सर्वभूतानि चाऽऽत्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥
[3]एतद्धि जन्मसामर्थ्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नाऽन्यथा ॥

'सुखाभ्युदयिकं' इत्यत्र सुखस्याऽभ्युदय उत्पत्तिः फलमस्यास्तीति मत्वर्थीयष्ठन्। 'नैःश्रेयसिकं' निःश्रेयसं मोक्षः प्रयोजनं यस्य कर्मणस्तत्तथा। 'प्रवृत्तनिवृत्ते कर्मणी' यथाक्रमं संसारप्रवृत्तिनिवृत्तिहेतुभूते उच्येते। सात्मतां समानशक्तित्वम्। 'स्वाराज्यं' इति स्वयमेव राजते प्रकाशत इति स्वराट् ब्रह्म तस्य भावः स्वाराज्यं ब्रह्मभावं प्राप्नोतीत्यर्थः ।

महाभारते

[4]लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

1 उपदिश्यत इति मु पु, १२ ४ १
2 साम्यतामिति मु पु १२ ४ १
3 एतद्धि जन्मसाफल्यं इति मु मनौ (१२ ४ ४)
4 भगवद्गीता ३ ३ ९

योगियाज्ञवल्क्यः

परिज्ञानाद्भवेन्मुक्तिरेतदालस्यलक्षणम् ।
कायक्लेशभयाच्चैव कर्म नेच्छन्त्यपण्डिताः ॥
ज्ञानकर्मसमायोगात् परमाप्नोति पूरुषम् ।
पृथग्भावे न सिध्येत उभे तस्मात् समाश्रयेत् ॥
ज्ञानं प्रधानं न तु कर्महीनं
कर्म प्रधानं न तु बुद्धिहीनम् ।
तस्मात् द्वयोरेव भवेत्तु सिद्धिः
न ह्येकपक्षो विहगः प्रयाति ॥

'न सिध्येत' न मुच्येत । 'उभे' ज्ञानकर्मणी ।

बृहस्पतिः[1]

सत्यं यज्ञस्तपो दानमेतद्धर्मस्य लक्षणम् ।
धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते ॥

मार्कण्डेयपुराणे

[2]उपभोगेन पुण्यानामपुण्यानां च पार्थिव ।
कर्तव्यमिति नित्यानामकामकरणात्तथा[3] ॥
असञ्चयादपूर्वस्य क्षयात्पूर्वार्जितस्य च ।
कर्मणो न प्रमाप्नोति शरीरं च पुनःपुनः ॥

'अकामकरणात्' काम्यकर्माकरणादित्यर्थः ।

[4]मनुः

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ।

1 शैलाकराब्ध ।
2 १५, ६-
3 नकामकरणात्तथा—ध
4 १२, ८—

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥
इह चाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते[1] ॥
प्रवृत्तं कर्म संसेव्य देवानामेति सात्मताम्[2] ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥
सर्वभूतेषु चाऽऽत्मानं सर्वभूतानि चाऽऽत्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥
[3]एतद्विजन्मसामर्थ्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नान्यथा ॥

'सुखाभ्युदयिकं' इत्यत्र सुखस्याऽभ्युदयस्य उत्पत्ति फलमस्यास्तीति मत्वर्थीयष्ठन्। 'नैःश्रेयसिकं' निःश्रेयसं मोक्षः प्रयोजनं यस्य कर्मणस्तत्तथा। 'प्रवृत्तनिवृत्त कर्मणी' यथाक्रमं संसारप्रवृत्तिनिवृत्तिहेतुभूते उच्येते। सात्मतां समानशक्तित्वम्। 'स्वाराज्यं' इति स्वयमेव राजते प्रकाशते इति स्वराट् ब्रह्म तस्य भावः स्वाराज्यं ब्रह्मभावं प्राप्नोतीत्यर्थः ।

महाभारते

[4]लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

1 सर्वेषाम् इति ह पु. [illegible]
2 सम्मतामिति ह पु. [illegible]
3 एतद्धि जन्मसाफल्यम् इति ह मनौ (१२.९३)
4 भगवद्गीता ३.३

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥
न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥
यस्त्विन्द्रियाणि मनसा नियम्याऽऽरभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥
यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥

'लोकेऽस्मिन्' अपवर्गमार्गाधिकृते । 'निष्ठा' स्थितिः । 'ज्ञानयोगेन सांख्यानां' सम्यक् ख्यातवन्तः साक्षात्कृतात्मतत्त्वाः सांख्याः, तेषां प्राधान्येनस्थितिरुक्ता । कर्मापि यथाप्राप्तमाश्रमविहितं ज्ञानपरिपाकार्थं प्रत्यवायपरिहारार्थं चाऽस्त्येव । 'कर्मयोगेन योगिनां'मिति सत्त्वयोग्यतालीश्वराराधनार्थं कर्म कुर्वतां कर्मप्राधान्येन स्थितिः । आत्मसाक्षात्कारविज्ञानोपायत्वात् । तथा चोक्तम्—

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
यथाऽऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥

'आत्मनि' बुद्धावित्यर्थः । पापक्षयश्च यज्ञात् 'यज्ञेन पापमपनुदति । तपसा ब्रह्म विजिज्ञासस्व' इति श्रुतेः । ज्ञानमपि सामान्यरूपमस्तीति कश्चित् किंचित् प्रजानातीति विशेषो न लक्ष्यते ।

> ज्ञानकर्मसमायोगात् परमाप्नोति पूरुषम् ।
> पृथग्भावेन सिध्येत उभे तस्मात् समाश्रये

दिति योगियाज्ञवल्क्यवचनात् । ज्ञानादेव केवलान्मुक्तिरिति सर्वं श्रौतं स्मार्तं कर्म न कर्तव्यं बन्धहेतुत्वादिति निराकृतम् । "न कर्मणामनारम्भान्नैष्कर्म्यं" इत्यादिना, नैष्कर्म्यं, पुण्यापुण्यरहितत्वं, मोक्षमित्यर्थ [1] । 'सन्यसनात्' उक्ताश्रमग्रहणात् । 'असक्तः' फलसङ्गरहितः । "यज्ञार्थात् कर्मणोऽन्यत्रे"ति 'यज्ञ' शब्देन यज्ञपुरुष उच्यते । 'यज्ञो वै विष्णुरि'ति श्रुतेः । [2]तेनेश्वराराधनार्थं कर्म वर्जयित्वाऽन्यत् स्वर्गादिफलार्थं कर्म बन्धाय भवतीत्यर्थः ।

तथा च

> [3]यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
> यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥
> शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
> संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥

'यत्करोषि' स्नानादि । 'यदश्नासी'त्यत्राऽशन भाणाहुतिरूपम् ।

1 श्री मि मोक्षप्रकाश पृ १९९ — "कर्मणामनारम्भात् नैष्कर्म्यम्" इत्यादिना नैष्कर्म्यं पुण्यरहितत्वं मोक्षम् इति व्याख्याती । [illegible] उपेक्ष्यम् " [illegible] [illegible] [illegible] [illegible] युक्तमिति प्रतिभाव्यम् । परन्तु [illegible] नैष्कर्म्यशब्दस्य मोक्षार्थकत्वं [illegible] युक्तम्

2 [illegible] कर्मानुष्ठानं [illegible] [illegible] परमपुरुषाराधनपरस्य [illegible] [illegible] [illegible] पाठः

3 भगवद्गीता ९ २७–२८

तथा

[1]कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥
दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥

‘कर्मण्येवेति’ कर्मण्येव आश्रमोचिते तवाऽधिकारोऽवश्यकर्तव्यत्वात्, न तु कर्मफलेषु। मा ते फलेष्वधिकार इत्येतस्यार्थं स्फुटयति—‘मा कर्मफलहेतुर्भूरिति’। फलं कामयमानः ‘कर्महेतुः’ कर्मणोऽनुष्ठाता। ‘मा भूस्त्वमिति’ फलेच्छा त्वया मा कर्तव्येत्युक्तं भवति। ‘मा ते सङ्गोऽस्त्वकर्मणीति’ न चैवं सति कर्मकरणं आलस्यात्त्वया च कर्तव्या, किं तु कर्तव्यान्येव कर्माणीत्यर्थः। कथं तर्हि कर्माणि कर्तव्यानि? इत्याकाङ्क्षायामाह—‘योगस्थ’ इत्यादि। यानि नित्यानि कर्माणि सन्ध्यावन्दनादीनि ‘योगस्थः’ फलसङ्गं त्यक्त्वा कर्मफलसिद्ध्यसिद्ध्योः हर्षविषादरहितत्वेन समो भूत्वा कुरु। ईश्वराराधनार्थे च क्रियमाणे कर्मणि नाऽस्ति वैषम्यम्। स एव कर्ता तदात्मकं च कर्मेति

1 भगवद्गीता २ ४७–५१

क्रियमाण तत्प्राप्तिहेतुस्त्वं भजस इत्यर्थः। तदिदं समत्व योग उच्यते'।

समत्वबुद्धियुक्तावस्मात् कर्मणो दूरेण ज्ञानरहितं कर्म अधन्यम्। 'बुद्धौ शरणमन्विच्छ' बुद्धिमाश्रयेत्यर्थः। 'फलहेतवः'। फलं प्रवृत्तिहेतुर्येषां ते तथा। 'बुद्धियुक्त' इति ईश्वराराधनार्थं कर्मेत्यनया बुद्ध्या युक्तः कर्म कुर्वन्'। नाऽऽरब्धे शुभाशुभे कर्मणी जहातीत्यर्थः। 'योगाय युज्यस्व' समत्वयोगाय यतस्व। 'कर्मसु कौशल'मिति। इदं यद् ब्रह्मणि समर्पणं कर्मणः फलसङ्कल्परहितता च। 'कर्मजमि'ति शुभाशुभकर्मज[1] 'फलं त्यक्त्वा' जन्मलक्षण रहिताः सर्वोपद्रवशून्यं विष्णोः स्थानं गच्छन्ति इत्यर्थः।

तथा

> [2]न मां कर्माणि लिंपन्ति न मे कर्मफले स्पृहा।
> इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥
> एवं ज्ञात्वा कृत कर्म पूर्वैरपि मुमुक्षुभिः।
> कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्॥

'न मां कर्माणीति', न मां कर्माणि लिंपन्ति यतो मम कर्मफले स्पृहा नाऽस्ति। एवमन्योऽपि यः स्वव्यापारे

1 श्री मि मोक्षप्रकाश पृ ३११ – सर्वोपद्रवशून्यं विष्णोस्स्थानं गच्छन्तीत्यर्थ इति स्मरणात्।"

मितमित्र श्रीगीतानुसारिस्स्मार्त उपन्यास्य बालगीताख्य मिताभिप्रायं दर्शयन्नत्र 'कर्मजं बुद्धियुक्ता' इति श्लोकस्याप्यस्यार्थमाह जन्मबन्धविनिर्मुक्ता "जीवन्त एव जन्मबन्धादिविनिर्मुक्ता सन्त पदं परमम् विष्णो मोक्षाख्यं गच्छन्ति। अनामयं सर्वोपद्रवरहितमित्यर्थ इति.

2 भगवद्गीता ४ १४–१५

[illegible] 'परमेश्वरायैव' मिति कर्माणि प्रयच्छति कर्मभिर्न बध्यत इत्यर्थः[1] ।

[2]<u>तथा</u>

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥

श्रीभगवानुवाच ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥
ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥
सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यक् उभयोर्विन्दते फलम् ॥
यत्सांख्ये[3] प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥
संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥
नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित् ।

1 [illegible]

2 [illegible] ५, १-१२

3 [illegible] इति [illegible]

पश्यन् शृण्वन् स्पृशन् जिघ्रन्
अश्नन् गच्छन् स्वपन् श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥
कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥
युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥

कर्मसन्न्यासात् कर्मयोगो विशिष्यत इति । कृतानां कर्मणामीश्वरे सन्न्यासो य उक्तस्तस्मादकर्मैव कर्तृ कार कान्तर च कर्म चेति यः कर्मयोगः स विशिष्यते । कथम्? द्वैतविषयो हि संन्यासः, कर्मयोगः पुनरद्वैतविषय , साक्षात् सम्यग्दर्शनाश्रय इत्यर्थः। 'निर्द्वन्द्वो' रागद्वेषादिद्वन्द्व रहितः। 'सन्न्यासस्थितिः' सन्न्यासयोगव्यतिरेकेणाऽनुष्ठी यमानो दुःखं प्राप्तुं भवति न तु ब्रह्मसाक्षात्कारायेत्यर्थ । ब्रह्म नचिरेणाऽधिगच्छति ब्रह्माऽचिरेण साक्षात् करोति । '[1]योगयुक्तः' अद्वैतदर्शने स्थित । 'विशुद्धात्मा' निर्मली कृतबुद्धिः । 'विजितात्मा' जितमनोवृत्तिः । इन्द्रियाणीन्द्रि यार्थेष्विति । 'एतेष्विन्द्रियार्थेषु इन्द्रियाणि वर्तन्ते' मम

* Passage between asterisks cited by Mitramiśra, मोक्षप्रकाश p. १९५.

1 योगेन युक्त योगयुक्त इति । वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फल-निरपेक्षेण युक्त इति च श्रीधरभाष्ये । योगयुक्त कर्मयोगयुक्त इति श्रीरामानुजभाष्ये

मात्र कर्तृत्वमिति चित्तं धारयेत्। 'योगयुक्तो' 'शान्ति माप्नोति नैष्ठिकीं' सुखमात्यन्तिकं प्राप्नोति।

[1]तथा

अर्जुन उवाच।

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश पृथक् केशिनिषूदन॥

श्रीभगवानुवाच।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥
त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः॥
यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥
नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥

1 भगवद्गीता १८ १-१२.

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्यासिनां क्वचित् ॥

'सङ्गं त्यक्त्वा हि काङ्क्ष्यन्ते' पूजादि फलं त्यक्त्वा फलानि चाऽदृष्टार्थानि । 'नियतस्य' नित्यनैमित्तिकस्य । 'नद्वेष्ट्यकुशलं' इति दुःखसाधनमवमानाक्रोशताडनादि । 'न द्वेष्टि' पूर्वकर्मफलं मया भुज्यत इति मत्वा शाम्यति । 'कुशले' सत्कारपूजादिसुखसाधने ।

[1]तथा

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाऽक्रियः ॥
यं संन्यासमिति प्राहु र्योगं तं विद्धि पाण्डव ।
न ह्यसन्यस्तसङ्कल्पो योगी भवति कश्चन ॥
आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।

[2]तथा

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चाऽस्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥

1 भगवद्गीता ६ १-३
2 भगवद्गीता ३, १७-१८

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवाऽपि संपश्यन् कर्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥
न मे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नाऽनवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्माऽनुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥
सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥

आत्मन्येव रतिर्यस्य न विषयेषु स 'आत्मरतिः'। आत्मन्येव तृप्तो नाऽन्नरसादिना स आत्मतृप्तः। आत्मन्येव सन्तुष्टः 'आत्मसन्तुष्टः', नाऽर्थलाभेन तस्य कार्यं विद्यते। परं ज्योतिरुपसंपन्नस्य लोकव्यवहाराभावात् तस्य कर्तव्यं नाऽस्ति। अधिकारहेत्वभावात् अनुष्ठेय विधिनिषेधलक्षणकर्मनिमित्तप्रत्यवायानुत्पत्तिलक्षणोऽर्थो नास्ति। 'सर्वभूतेषु व्यपाश्रयः' प्रयोजनापेक्षा। यतो लोकव्यवहारानुसारेण कर्मत्यागानुत्पत्तिः तस्मात्कर्मप्रवृत्तेर्लोकहितोऽसक्तं कर्तव्यं ।

कर्म कुर्वित्याह-तस्मादसक्त इत्यादिना। 'कर्मणैव' न कर्म त्यागेन लोकसंग्रह लोकपरिपालनं। जोषयेत् सेवयेत्।

[1]तथा

मयि सर्वाणि कर्माणि संन्यस्याऽध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वर ॥

'अध्यात्मचेतसा', ब्रह्मैवेद सर्व कार्यकरणजातमित्य मेवदृष्ट्या।

[2]तथा

त्यक्त्वा कर्मफलासङ्ग नित्यतृप्तो निराश्रय ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीर केवल कर्म कुर्वन्नाऽऽप्नोति किल्विषम् ॥
यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सर'।
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाऽऽचरतः कर्म समग्रं प्रविलीयते ॥
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

'निराशी' निर्गतफलासङ्गः। 'यतचित्तात्मा' सय तात्मा। 'कार्यकारणसङ्घात''। शारीरमात्र शरीरनिर्वर्त्यं। शास्त्रोक्तं कर्म केवलं फलरहितम्। 'नाऽऽप्नोति किल्विष' संसार माप्नोतीत्यर्थः। मुक्तस्य रागादिद्वेषैरिति दोषः।

1 भगवद्गीता ३ ३
2 भगवद्गीता ४ २ -२४

'यज्ञाय' परमात्मने । 'ब्रह्मार्पणं'[1]
कर्मेति व्युत्पत्त्या । '
समाधियुक्तेन ।

[1]तथा

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥
नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥

[2]तथा

श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥

1 [illegible] [illegible]

|| १६ ||

अथात्मज्ञानहेतवः

[1]याज्ञवल्क्यः

वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः ।
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ॥

ब्रह्मपुराणे

अधीत्य वेदांश्च तदीयमर्थं
बुद्ध्वा गृहीत्वा च स सम्यगेव[2] ।
श्रुत्वा च मीमांसकधर्मशास्त्र-
मात्मा ज्ञेयो दुर्लभोऽयं त्रिलोके ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥
तपो विद्या च विप्रस्य निःश्रेयसकरं परम् ।
तपसा कल्मषं हन्ति विद्ययामृतमश्नुते ॥

महाभारते

[3]ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥

1 Mitākṣarā and Aparārka read [illegible] and [illegible] —३, १९०
2 [illegible] ख—ग.
3 [illegible]

मत्स्यपुराणे

[1]अयमेव क्रियायोगो ज्ञानयोगस्य साधकः ।
कर्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते ॥

[2]याज्ञवल्क्य'

आचार्योपासनं वेदशास्त्रार्थस्य च विवेचनम् ।
तत्कर्मणामनुष्ठानं सङ्गः सद्भिः गिरः शुभा' ॥
स्त्र्यालोकारम्भविगम सर्वभूतात्मदर्शनम् ।
त्यागः परिग्रहाणां च जीर्णकाषायधारणम् ॥
[3]विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ।
शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ॥
[4]रजस्तमःक्षयः सत्त्वशुद्धिर्निःस्पृहता शमः ।
एतैरुपायैः संसिद्धः स तु योग्यमृतीभवेत् ॥
तत्त्वस्मृतेरुपस्थानात् सत्त्वयोगात् परिक्षयात् ।
कर्मणां सन्निकर्षाच्च सतां योगः प्रवर्तते ॥

'शरीरपरिसंख्यानं' शरीराशुद्धित्वास्थिरत्वादिदोष परत्वेनाऽनुसन्धानम्। 'प्रवृत्तिषु' गमनागमनादिकासु सूक्ष्म प्राणिवधादिदोषदर्शनम्। 'तत्त्वस्मृतेः' आत्मतत्त्वचिन्तनात्। 'उपस्थानात्' अवधारणात्।

[5]महाभारते

श्रीभगवानुवाच ।

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।

1 ५२ ११
2 ३ १५५-१६
3 विषयेन्द्रियसंरोध इति अपरार्क मिताक्षरापाठ
4 नीरजस्तमता इति अपरार्क मिताक्षरापाठ
5 भगवद्गीता—१३ ७—११

आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषार्थदर्शनम्[1] ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ।
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥
विविक्तदेशसेवित्वमरतिर्जनसंसदि ।
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ।

'आत्मविनिग्रहो' मनोवृत्तिनिरोधः । 'असक्ति' वैराग्यम् । 'अभिष्वङ्ग'स्तत्परता । 'तत्त्वज्ञानार्थदर्शनम्' आत्मज्ञानार्थं यच्छास्त्रस्य पर्यालोचनम् । 'एतज्ज्ञानं' इदं ज्ञानसाधनम् ।

तथा

नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च ।
शीलस्थितिर्दण्डनिधानमार्जवं
ततस्ततश्चोपरमः क्रियाभ्यः ॥

मार्कण्डेयपुराणे

[2]सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
सद्भिः सह स कर्तव्यः सतां सङ्गो हि भेषजम् ॥

1 दोषानुदर्शनमिति श्रीभगवद्गीतापाठः
2 १७ ११

[1]महाभारते

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोभित्व[2] मार्दवं ह्रीमचापलम्[3] ॥
तेजः क्षमा धृतिः शौचमद्रोहो नाऽभिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाऽभिजातस्य पार्थ संपदमासुरीम् ॥
दैवी संपद्विमोक्षाय निबन्धायाऽऽसुरी मता ।

'तेजः' प्रभुत्वम् ।

[4]तथा

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥
इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥

1 भगवद्गीता—१६ १-५
2 अलोलुप्त्वं इति म स and शङ्करभाष्यम्
3 ह्रीरचापलम् इति म स and शङ्करभाष्यम्
4 भगवद्गीता—१८ ६१-६४

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

'सर्वधर्मान् परित्यज्ये'ति। सर्वधर्मान् परिहाय ममाऽऽराधनं कुर्विति। भगवदाराधनं कुर्विति[1] भगवदाराधनप्राधान्यप्रतिपादनपरमिदम्।

[2]तथा

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च नमन्ति [3]च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

[4]याज्ञवल्क्यः

स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु।
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ॥

1 कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान् धर्मान् परमनिःश्रेयससाधनभूतान् मदाराधनत्वेन अतिमात्रप्रीत्या यथाधिकारं कुर्वाण एवोक्तरीत्या फलकर्मकर्तृत्वादिपरित्यागेन परित्यज्य मामेकमेव कर्तारं आराध्यं प्राप्यमुपायं चानुसन्धत्स्व। एष एव सर्वधर्माणां शास्त्रीयपरित्याग इति —इति श्रीरामानुजभाष्ये

2 १ -११

3 नमन्ति इति स च रमन्ति च इति मा श्रीशङ्करभाष्यपाठ

4 २ १११

॥ १७ ॥

सपल्लवयोग[1]

अथ योगः । तत्र देवलः

देवमनुष्ययोः द्विविधः पुरुषार्थोऽभ्युदयो निःश्रेयस मिति । तयोरभ्युदयः पूर्वोक्तः द्विविधः । निश्रेयसमिति सांख्ययोगौ । पञ्चविंशतितत्त्वज्ञानं सांख्यम् । विषयेभ्यो निवृत्त्याऽभिप्रेतेऽर्थे मनसोऽवस्थापनं योगः । उभयत्राऽपवर्गः फलम् ।

विष्णुपुराणे

[1]आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥

दक्षः

वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि ।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते ॥

विष्णुपुराणे

तदेतत्कथितं राजन्नविद्याया मया तव ।
क्लेशानां च क्षयकरं योगादन्यन्न विद्यते ॥

1 ६ ७ ३१

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' ॥

'सर्वधर्मान् परित्यज्ये'ति । सर्वधर्मान् परिहाय ममाऽऽराधनं कुर्विति । भगवदाराधनं कुर्विति[1] भगवदाराधनमाधान्यमतिपावनपरमिदम् ।

[2]तथा

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति [3]च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

[4]याज्ञवल्क्यः

स चाश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु ।
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ॥

1 "कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान् धर्मान् परमनिःश्रेयससाधनभूतान् मदाराधनत्वेन अतिमात्रप्रीत्या यथाधिकारं कुर्वाण एवोक्तरीत्या फलकर्मकर्तृत्वादिपरित्यागेन परित्यज्य मामेकमेव कर्तारं आराध्यं प्राप्यमुपायं चानुसन्धत्स्व । एष एव सर्वधर्माणां शास्त्रीयपरित्याग इति —इति श्रीरामानुजभाष्ये

2 १ ८–११

3 रमन्ति इति क ख रमन्ति च इति ग श्रीधरभाष्यपाठः.

4 १, ११२.

॥ १७ ॥

सपल्लवयोग॰

अथ योगः। तत्र देवलः

देवमनुष्ययो॰ द्विविधः पुरुषार्थोऽभ्युदयो निःश्रेयस मिति। तयोरभ्युदयः पूर्वोक्तः द्विविधः। निश्रेयसमिति सांख्ययोगौ। पञ्चविंशतितत्त्वज्ञानं सांख्यम्। विषयेभ्यो निवृत्त्याऽभिप्रेतेऽर्थे मनसोऽवस्थापनं योगः। उभयत्राऽपवर्गः फलम्।

विष्णुपुराणे

[1]आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥

दक्ष

वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते ॥

विष्णुपुराणे

तदेतत्कथितं राजन्नविद्याया मया तव।
क्लेशानां च क्षयकरं योगादन्यन्न विद्यते ॥

१ ६ ७ ३१

योगियाज्ञवल्क्यः

सर्वधर्मान् परित्यज्य योगधर्मं समाश्रयेत् ।
सर्वे धर्मा मयोपास्तु पुनरुत्पत्तिकारकाः ॥
[1]नेहाऽतिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

'अतिक्रमः' अनारम्भ नाशोऽत्र नैष्फल्यम् ।

महाभारते

[2]यथा चाऽनिमिषाः स्थूला जालं भित्त्वा पुनर्जलम् ।
प्राप्नुवन्ति तथा योगात्तत्पदं वीतकल्मषाः ॥

'अनिमिषाः' मत्स्याः ।

तथैव वागुरां भित्त्वा बलवन्तो यथा मृगाः ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥
लोभजानि तथा राजन् बन्धनानि बलान्विताः ।
[3]भित्त्वा योगात् परं मार्गं गच्छन्ति विमलाः शिवम् ॥

यथा च शकुनाः सूक्ष्माः प्राप्य जालमरिन्दम ।
तत्राऽशक्ता[4] निबध्यन्ते विमुच्यन्ते बलान्विताः ।
कर्मजैर्बन्धनैर्बद्धास्तद्वद्योगाः परन्तप ॥
अबलाश्चैव नश्यन्ति मुच्यन्ते च बलान्विताः ।
[5]अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः ॥

1 गीतायामपि दृश्यते—२ ४
2 म—३ ६, ९
3 म—२ ६ ९
4 तत्र भक्ता इति घ and ङ; तत्र सक्ता इति मु महाभारते
5 म—२ ६ ११

युक्तः सम्यक् तथा योगी मोक्षं प्राप्नोत्यसंशयम् ।
[1]यथा कश्चिद्वन घोरं बहुसर्पसरीसृपम् ॥
श्वभ्रवत्तोयहीनं च दुर्गमं बहुकण्टकम् ।
अभक्तमटवीप्रायं दावदग्धमहीरुहम् ॥
पन्थानं तस्कराकीर्णं क्षेमेणाऽतिपतेन्नरः ।
योगमार्गं समाश्रित्य यः कश्चिद्व्रजते द्विज ॥
क्षेमेणोपरमं मार्गं बहुदोषो हि स स्मृतः ।

तथा

अपि वर्णावकृष्टस्तु नारी चाऽधर्मकाङ्क्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥

[2]तथा

नास्ति बुद्धिरयुक्तस्य न चाऽयुक्तस्य भावना ।
न चाऽभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

[3]तथा

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाऽधिको योगी तस्माद्योगी भवाऽर्जुन ॥
योगिनामपि सर्वेषां मद्गतेनाऽन्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥

अथ योगाङ्गानि

तत्र महाभारते

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि योगस्य ।

1 म—१ ६ ५१-५२
2 भगवद्गीता—२, ६६
3 भगवद्गीता—६ ४६-४

<u>मार्कण्डेयपुराणे</u>

[1]भागेनाऽऽत्माऽऽत्मना ज्ञेयो योगिनां स हि दुर्जयः ।
कुर्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनाऽनीश्वरान् गुणान् ॥

'दोषान्' स्वेदश्लेष्मप्रभृतीन् । 'संसर्गान्' विषयसंबन्धान् । 'अनीश्वरान्' प्राकृतान् ।

<u>देवलः</u>

रागद्वेषमोहाः कषाया उच्यन्ते । तेषां यमनियमलक्षणेन तपसा पञ्चविधेन तत्त्वज्ञानेन चाऽपकर्षणम् । कषायपाचनम् ।

<u>विष्णुपुराणे</u>

[2]ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च च कीर्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः ॥
एवं तथाऽऽसनादीनां समास्थाय गुणैः पुनः ।
[3]यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥

1 ३९. १-३
2 ६. ३६
3 यमाख्यै इति ग० पा०

<u>वायुपुराणे</u>

[1]पद्ममूर्द्धासनं चाऽपि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा तत्प्रवणं मनः ॥

<u>मार्कण्डेयपुराणे</u>

[2]प्राणापाननिरोधश्च प्राणायाम उदाहृतः ।

<u>विष्णुपुराणे</u>

[3]प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते हि यः ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ।

'सबीजो' मन्त्राद्यालम्बनः ।

<u>बृहस्पतिः</u>

[4]बद्ध्वाऽऽसनं नियम्याऽसून्स्मृत्वा चर्च्यादिकं तथा ।
सन्निमीलितदृङ्मौनी प्राणायामं समभ्यसेत् ॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
[5]आदानं रोधमुत्सर्गं वायोस्त्रिः समभ्यसेत् ।
ब्रह्माणं केशवं शम्भुं ध्यायन् मुच्येत बन्धनात् ॥
रक्तं[6] पितामहं ध्यायेद्विष्णुं नीलोत्पलप्रभम् ।
श्वेतं त्र्यक्षं हरं चैव संसारार्णवतारणम् ॥

1 ११ १२
2 ३९ ११
3 ३ ७ ४
4 आचारकाण्डम्—३१ ३९
5 संस्कारकाण्डम्—५ ९
6 आचारकाण्डम्—३ प्रजापतिमिति ह पु पाठ

[1]प्राणायामैर्दहेद्दोषं मनोवाग्देहसम्भवम् ।
प्रत्याहारेण संसर्गं ध्यानेनाऽनैश्वरान् गुणान् ॥
धाम्यमानं यथा दह्येद्धातूनां संस्तृतं मलम् ।
तथेन्द्रियगतो दोषः प्राणायामेन दह्यते ॥

देवलः

त्रिविधः प्राणायामः—कुम्भो रेचनं पूरणमिति । निश्वासनिरोधः कुम्भः । अजस्रनिश्वासो रेचनम् । निश्वासाध्मानं पूरणमिति । स पुनरेकद्वित्रिभिरुद्घातैर्मृदुर्मध्यस्तीक्ष्णो वा भवति । प्राणापानव्यानोदानसमानानां सकृदुत्क्रमणं मूर्द्धानमाहत्य निवृत्तिरुद्घातः । तत्र ऊर्ध्वं नाभेर्गतो रेचनोच्छ्वासकरणोद्गारकर्मा प्राणः । अधोनाभेरुत्सर्गानन्दकर्माऽपानः । शाखासन्धिस्थ आविष्टः प्रसारणाक्षेपणाकुञ्चनभ्रमण रेचनधानगमनकर्मा व्यानः । बाहुग्रीवाचक्षुःपार्श्वगतः चेष्टाविक्रमबलाधानकर्मोदानः । श्रोत्रहृदयनाभिगतः सर्वकर्मा स्पन्दनावबोधनानां समापतत इति समानः । ग्लानो विविस्मः सुषुप्सुरुद्विग्नः क्षुधितो व्याधितः शीतोष्णार्दितः संप्राप्तवेगो वा प्रणायामं न कुर्वीत ।

मार्कण्डेयपुराणे

[2]लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधा मतः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥
लघु द्वादशमात्रास्तु द्विगुणा स तु मध्यमः ।

1 संस्कारकाण्डम्—५५०-५ ,४
2 ३९ ११

त्रिगुणाभिस्तु मात्राभिस्तरीय उदाहृत ।
निमेषोन्मेषणा मात्रा तालो लघ्वक्षरं तथा ॥

योगी याज्ञवल्क्यः

अङ्गुलिमोक्षत्रितयं जान्वोपरि मार्जनं चाऽपि ।
तालत्रयमपि तज्ज्ञा मात्रासंज्ञां प्रशंसन्ति ॥

मार्कण्डेयपुराणे

[1]प्रथमेन जयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषमनुक्रमात् ॥
मृदुत्व सेवमानस्य सिंहशार्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं सत्त्व[2] यथेच्छातो नागं नयति हस्तिप ।
तथैव योगी छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानवान् ।
तद्वन्निरुद्धपवनः किल्बिष न नृणां तनुम् ॥
तस्माद्युक्त सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्याऽवस्थाचतुष्टयम् ॥
ध्वनिप्राप्तिस्तथा संवित् प्रसादश्च महीपते ।
स्वरूपं शृणु मे तेषां कथ्यमानमनुक्रमात् ॥
कर्मणामिष्टदुष्टानां जायते फलसंक्षयः ।
चेतसोऽतिकषायस्यावत्र साध्वसितरुच्यते ॥
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकं च यत् ।
निरुध्याऽऽस्ते सदा योगी प्राप्ति सा सर्वकामिकी ॥

1 ३९ ११
2 मत्तं इति न and म

अतीतानागतानर्थान् विप्रकृष्टांस्तिरोहितान् ।
विजानातीन्दुसूर्यर्क्षं ग्रहाणां ज्ञानसंपदम् ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदम् ।
तदा संविदिति ख्याता प्राणायामस्य सा स्थितिः ॥
यान्ति प्रसादं येनाऽस्य मनः पञ्च च धातवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ॥

'पञ्चधातवः' पृथिव्यादि पञ्चभूतानि ।

तथा

[1]प्राणायामा दश द्वौ च धारणा साऽभिधीयते ।
द्वे धारणे स्मृतो योगो योगिभिस्तत्त्वदर्शिभिः ॥
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ।
सर्वदोषाः प्रणश्यन्ति स्वस्थश्चैवोपजायते ॥
वीक्षते च परं ब्रह्म प्राकृतांस्तु गुणान् पृथक् ।
व्योमादिपरमाणुश्च तथाऽऽत्मानमकल्मषम् ॥
इत्थं योगी यताहारः प्राणायामपरायणः ।
जितां जितासमो भूमिमारोहेत यथा गृहम् ॥
दोषान्मोहं तथा व्याधिमाक्रान्ता भूरनिर्जिता ।
विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्जितम्[2] ॥
[3]उपायश्चाऽत्र कथितो योगिभिः परमर्षिभिः ।
येन व्याध्यादयो दोषा न जायन्ते हि योगिनः ॥
यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा योगी पिबेद्वायुं जितश्रमः ॥

1 ११ १५
2 अनिर्जितम्—ख
3 ११ ४१-४९

प्राङ्नाभ्यमुदरे चाऽथ तृतीया च नमोपरि[1] ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥
किञ्चित् परस्यात्तस्मिंस्तु धारणा परमा स्मृता ।
दशैता धारणा प्राप्य प्राप्नोत्यक्षरमाम्यताम् ॥
[2]प्राणानामुपसरोधात् प्राणायाम उदाहृतः ।
धारणेत्युच्यते ज्ञेयं धार्यते च मनोऽनया ॥
शब्दादिभ्योऽनिवृत्तानि यदक्षाणि यतात्मभि ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्तमस्स्मृतः ॥

'अनिवृत्तानि' स्वविषये समस्तानि । 'योगेन चित्त वृत्तिनिरोधेन', 'योगश्चित्तवृत्तिनिरोध' इति पातञ्जलेऽभि धानात् ।

देवल:

अणुस्थानापम्याद्धाघयादन्यस्याद्वा योगभ्रष्टस्य मनस पुनः प्रत्यानीयार्थे योजन प्रत्याहारः ।

अर्थो ' ग्राऽत्मा ।

विष्णुपुराणे

[3]शब्दादिष्वनुरक्तानि निगृह्याक्षाणीति योगवित् ।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायतेऽति च लात्मनाम् ।
इन्द्रियाणामवश्यैस्तै न योगी योगसाधकः ॥

1 न्वोपरि टी म
 १ १
3 (१

देवलः

शरीरेन्द्रियमनोबुद्ध्यात्मनां धरणाद्धारणा।

हारीतः

मनसो धारणं अन्तःशरीरे, हृदि, ललाटे, परब्रह्मात्मज्योतिरादिस्वमहीनमस्तु जलभाजनवन्मनसस्त्वेकधारणाद्धारणा।

'अन्तर्देहे', हृदयादौ, यशिर्वापहतपाप्मादि गुणक परब्रह्मादौ, यन्मनसो धारणं सा धारणा। 'जलभाजनवत्' इति, यद्भाजनगतं जलं तस्य भाजन एव स्थितिः। एव मेतेषु सत्सु, गतिर्मनसोऽवस्थितिरकत्र देशविशेषे धारणा-ख्यायत इति। 'एवं च देशबन्ध चित्तस्य' यः साधारण उक्ता स्यात्। तथा च पातञ्जलसूत्रम्। "देशबन्ध चित्तस्य धारणा" इति।

शङ्खः

मनस्संयमनं तज्ज्ञैः धारणेति निगद्यते॥

विष्णुपुराणे

[1]प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः।
वशीकृतैः ततः कुर्यात् स्थिरं चेतः शुभाश्रय॥

महाभारते

[2]सुस्थर्य क्षुरधारासु निशितासु महामते।
धारणासु सुयोगस्य दुःस्थेयमकृतात्मभिः॥

1 ६ ७ ३५
2 श—१ १ ४

विपक्षा धारणा यस्मान्नयन्ति न शुभां गतिम् ।
नेत्रहीन यथा नार पुरुषाणां सु धै नृप ॥
यस्तु तिष्ठति कौन्तेय धारणासु यथाविधि ।
मरणं जन्मदुःखं च सुखं च परिमुञ्चति ॥
योगकृत्स्नेषु योगाना ध्यानमेव पर बलम् ।
तथाऽपि द्विविधं ध्यानमाहुर्वेदविदो जनाः ॥
एकाग्रभाव मनसः प्राणायामास्तथैव च ।
तद्रूपप्रत्ययायैकसन्ततिश्चान्यनिःस्पृहा ॥
तद्ध्यान प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ।
तस्यैव कल्पनाहीनस्वरूपग्रहणं हि यत् ॥
मनसा ध्याननिरताच्च समाधिः सोऽभिधीयते ।

अथाहारादिनियम

तत्र मार्कण्डेयपुराणे

[1]भैक्षं यवागूं तक्र वा पयो यावकमेव वा ।
फलं मूल विपक्वं वा कणपिण्याकसक्तवः ॥
इत्येते वै शुभाहारा योगिनां सिद्धिकारकाः ।

महाभारते

[2]कणानां भक्षणे युक्तः पिण्याकस्य च भक्षणे ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥
भुञ्जानं यावकं भक्ष्यं दीर्घकालमरिन्दम ।
एकवाऽसौ विशुद्धात्मा योगी बलमवाप्नुयात् ॥

1 ४१ ११
2 शा—३ १ ४१-४५

पक्षान्मासान् ऋतून् स्थित्वा संवत्सरं महांस्तथा ।
अपः पीत्वा पयोभिक्षाः योगी फलमवाप्नुयात् ॥

वायुपुराणे

[1]योगिनां चैव सर्वेषां श्रेष्ठं चान्द्रायणं स्मृतम् ।
एकं द्वे त्रीणि चत्वारि शक्तितो वा समापयेत् ॥

महाभारते

मोक्षधर्मेषु नियतो लघ्वाहारो जितेन्द्रियः ।
प्राप्नोति ब्रह्मणःस्थानं यत्परं प्रकृतेर्ध्रुवम् ॥

तथा

सुदुष्करं ब्रह्मचर्यमुपायं तत्र मे शृणु ।
संप्रवृत्तमुदीर्णं च निगृह्णीयाद्द्विजोत्तमः ।
योषितां न कथा श्राव्या न निरीक्ष्या निरम्बराः ॥
कथञ्चिद्दर्शनादासां दुर्बलानाऽऽविशेद्रजः ।
रागोत्पत्तौ चरेत्कृच्छ्रमह्नस्त्रिः प्रविशेदपः ॥
मग्नः स्वप्ने[2] च मनसा त्रिर्जपेदघमर्षणम् ।
पाप्मानं निर्दहत्येवं अन्तर्भूतरजोमयम् ॥

'दुर्बलाम्' अजितेन्द्रियान् । 'स्वप्ने च' स्त्रीविषयासु रागोत्पत्तौ इत्यर्थः ।

मार्कण्डेयपुराणे

[3]शून्येष्वेवावकाशेषु वनेषु च गुहासु च ।
नित्ययुक्तः सदा योगी ध्यानं सम्यगुपाक्रमेत् ॥

1 १९. ११
2 स्वप्नेन मनसा—ख and ग
3 ४१. ११

सशब्देऽग्निजलाभ्याशे जीर्णे गोष्ठे चतुष्पथे ।[1]
शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे ॥
सभये कूपतीरे वा चैत्यवल्मीकसञ्चये ।
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत् ॥

महाभारते

[2]विमुक्तः सर्वसङ्गेभ्यो लघ्वाहारो जितेन्द्रियः ।
सपूर्वापररात्रिषु धारयेन्मनसाऽऽत्मनि ॥
[3]मूत्रोत्सर्गे पुरीषे च भोजने च नराधिप ।
त्रिकालं नाऽभियुञ्जीत शेषं युञ्जीत तत्परः ॥

मार्कण्डेयपुराणे

[4]नाऽऽध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतन ।
युञ्जीत योगं राजेन्द्र योगी सिद्ध्यर्थमादृतः ॥
नाऽतिशीते न चोष्णे वा द्वन्द्वे नाऽप्यनिलात्मके ।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ॥
[5]सत्त्वस्याऽनुपपत्तौ च देशे काले विवर्जिते ।
नाऽऽसतो वर्षामं योगे तस्मात्तं परिवर्जयेत् ॥
दोषानेताननादृत्य मूढत्वाद्यो युनक्ति वै ।
विघ्नाय तस्य ये दोषा जायन्ते तान्निबोध मे ॥
बाधिर्यं जडता लोपः स्मृतेर्मूकत्वमन्धता ।
ज्वरश्च जायते सद्यः तद्वदज्ञानयोगिनः ॥

1 ३९ ४ ५
2 म—१११ ११
3 शा—१११ ९
4 ३९ ४६-४
5 ३९ ५०—५१

अथ दोषचिकित्सा

तत्र वायुपुराणे

[1]तेषां चिकित्सां वक्ष्यामि दोषाणां च यथाक्रमम्।
यथा शाम्यन्ति ते दोषाः प्राणायामसमुत्थिताः॥
स्निग्धां यवागूमत्युष्णं भुक्त्वा तत्र तु धारयेत्।
अनेन क्रमयोगेन वातगुल्मं प्रणश्यति॥
उदावर्त्तप्रतीकारमिदं कुर्याच्चिकित्सितम्।
सर्वगात्रप्रकम्पेन समारब्धस्य योगिनः॥
इमां चिकित्सां कुर्वीत यथा संपद्यते सुखम्।
मनसा पर्वतं काये विष्टम्भीकृत्य धारयेत्॥
उरोघाते [2]रसस्थाने कण्ठदेशे च धारयेत्।
[3]वाचोघाते तथा वाचि बाधिर्ये श्रोत्रयोस्तथा॥

'समारब्धस्य' श्रान्तस्य। विष्टम्भीकृत्य धारयेत् पर्व धारयेत्।

मार्कण्डेयपुराणे

[4]अमानुषं सत्त्वमन्तर्योगिनं प्रविशेद्यदि।
वाय्वग्निधारणादेनं देहसंस्थं विनिर्दहेत्॥

'अमानुषं सत्त्वं' रक्षःपिशाचादि।

वायुपुराणे

[5]कृष्णसर्पोपघाते तु धारयेत् हृदयोदरे।
महर्जमस्तपारमस्थं हृदि कृत्वा तु धारयेत्॥

1 ११ २५
2 उरस्स्थाने इति मु पाठ
3 वाचोऽपघाते च वाचि बाधिर्ये श्रोत्रयोस्तथा इति मु पाठ।
4 ३९ १
5 ११ ५५

विषस्य तु पलं पीत्वा विशल्यां धारयेत्ततः ।
सर्वतः सनगां पृथ्वीं कृत्वा मनसि धारयेत् ॥
हृदि कृत्वा समुद्रांश्च तथा सर्वाश्च देवताः ।
सहस्रेण घटानां तु युक्तः स्नायीत योगवित् ॥
उदके कण्ठमात्रे तु धारणां मूर्ध्नि धारयेत् ।
प्रतिस्रोतोपविष्टस्तु[1] धारयेत्सर्वगात्रकम् ॥
शीर्णार्कपर्णपुटकैः पिबेत् वल्मीकमृत्तिकाम् ।
चिकित्सितविधिश्चैष [2]क्रमशो योगिनां हित ॥
व्याख्यातस्तु समासेन योगहठेन हेतुना ।

अथ योगविधि

[3]तत्र <u>महाभारते</u>

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्याऽऽसने युञ्ज्याद्योगमात्मविशुद्धये ॥
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चाऽनवलोकयन् ॥
प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्पर ॥

1 विपाविष्टो for प्रविष्टस्तु in printed वायुपुराण.
2 त्रिभुवने योगनिर्मित इति, मु पाठ
3 भगवद्गीता—६, १०–१४

<u>वायुपुराणे</u>

[1]ओंकारं प्रथमं कृत्वा चन्द्रसूर्यौ नमस्य च ।
आसनं स्वस्तिकं कृत्वा पद्ममर्द्धासनं तथा ॥
समजानुरेकजानुर्वा उत्तानस्वस्तिकोऽपि वा ।
समो दृढासनो भूत्वा संहृत्य चरणावुभौ ॥
पार्ष्णिभ्यां वृषणौ च्छाद्य तथा प्रजननं ततः ।
इन्द्रियाणीन्द्रियार्थेभ्यो मनः पञ्च च मारुतान् ॥
निगृह्य समवायेन प्रत्याहारमुपक्रमेत् ।
यस्तु प्रत्याहरेत् कामान् कूर्मोऽङ्गानीव सर्वशः ॥
तथाऽऽत्मरतिरेकस्थः पश्यत्यात्मानमात्मना ।
पूरयित्वा समीर तु सबाह्याभ्यन्तरः शुचिः ॥
आकण्ठनाभियोगेन प्रत्याहारमुपक्रमेत् ।

[2]<u>याज्ञवल्क्यः</u>

ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् ।
उत्तानं किञ्चिदुन्नम्य[3] मुखं विष्टभ्य चोरसा ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशेत्[4] ।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ॥
सन्निरुद्धेन्द्रियग्रामो नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वाऽपि प्राणायाममुपक्रमेत् ॥

'सत्त्वस्थः' कामक्रोधादिरहितः ।

1 ११ ११
2 १ १९८–२
3 उन्नम्य इति विज्ञानेश्वरपाठः उद्धम्य इति अपरार्कपाठः
4 संस्पृशन् इति अपरार्कमिताक्षरापाठः

देवलः

देवतायतनं शून्यागारगिरिकन्दरनदीपुलिनगुहारण्यानामन्यतमे शुचौ निराबाधे विमक्ते समुपस्तीर्णमानस कृत्वा, तस्मिन्लघ्वाहारो निरामयः, शुचिः शिरोग्रीवापाणिपादौ च समास्थाप्य, शरीरमृजु समाधाय, शिश्नवृषणाव पीडयन्, पस्फिग्निदपाभिस्य स्वस्तिकं भद्रकं मण्डलं वाऽधिष्ठाय, उदङ्मुखः, प्राङ्मुखो वा, दन्तैर्दन्तानसंस्पृश्य, अक्षिण्यामव्यक्तमनुन्मील्य च, मुखनासिकाभ्यां ऐक्ययाथसम्प्रस्थितदृष्टिः, सर्वेन्द्रियाणि संहृत्योर्ध्वं प्राणानुदीर्य, मनसा तच्चिन्तनं ध्यानम् ।

[1]महाभारते

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चाऽतिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥
तथाच देवमुपशान्तेन दान्तेनैकान्तशीलिना ।
आत्मारामेण बुद्धेन यो ह्यात्मा स नसंशयः ॥

पद्मः

कषायमोहविक्षेपलज्जाशङ्कादिचेतसः ।
व्यापारास्तु समाख्याताः तैर्हीन वशमानयेत् ॥
कुटुम्बे पञ्चमिर्ग्राममपष्ठं तत्र महात्मनः ।
देवासुरमनुष्यैर्वा संजेतुं नैव शक्यते ॥

1 भगवद्गीता—६, १६, १७.

यत्नेन परराष्ट्राणि गृह्णन् शूरस्तु नोच्यते ।
[1]जितेन्द्रियेन्द्रियग्रामः स शूरः कथ्यते बुधैः ॥

<u>महाभारते</u>

[2]श्रीभगवानुवाच ।

सङ्कल्पप्रभवान् कामान् त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥
शनैःशनैरुपरमेत् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥
युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मनिर्वाणमत्यन्तं[3] सुखमश्नुते ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते[4] ॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

1 जितेन्द्रियेन्द्रियग्रामः स शूरः कथ्यते बुधैः —ग. and घ

2 भगवद्गीता—६, २४–३२। श्रीभगवानुवाच appears only at the beginning of the chapter

3 ब्रह्मसंस्पर्शम् इति च ग and श्री शङ्कराचार्यपाठश्च

4 परमपुरुषमाप्नोति न स भूयोऽपि जायते इति पाठः

अर्जुन उवाच ।

यो यो योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याऽहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ॥
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याऽहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

श्रीभगवानुवाच ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥
असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥

'न प्रणश्यामि' न तिरो भवामि। 'सर्वथा वर्तमानोऽपि' मयि वा बुद्धिविस्तारे वा प्रपञ्चे ब्रह्मबुद्ध्या। 'चेतसा वर्तमानो' मय्येवाऽसौ वर्तत इत्यर्थः।

तथा

पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः।
शब्दं न चिन्तयेच्छ्रोत्रेण स्पर्शं चाऽपि न वेदयेत् ॥
रूपं न चक्षुषा विन्द्याज्जिह्वया च रसांस्तथा ।
श्रेयांस्यपि च सर्वाणि जह्याद्योगेन योगवित् ॥
पञ्चवर्गप्रमाथीनि नेच्छेच्चेतानि वीर्यवान् ।
ततो मनसि संसृज्य पञ्चवर्गविचक्षणः ॥
समादध्यान्मनो भ्रान्तमिन्द्रियार्थैः सपञ्चभिः ।
निःसंसारि निरालम्बं पञ्चद्वारं चलाचलम् ॥
पूर्वध्यानपथे धीरः सदा दध्यान्मनोन्तरम् ।
इन्द्रियाणि मनश्च यदा पिण्डीकरोत्ययम् ॥

बलेन परराष्ट्राणि गृह्णन् शूरस्तु नोच्यते ।
[1]जितेन्द्रियेन्द्रियग्रामः स शूरः कथ्यते बुधैः ॥

महाभारते

[2]श्रीभगवानुवाच ।

सङ्कल्पप्रभवान् कामान् त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥
शनैःशनैरुपरमेत् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥
युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मनिर्वाणमत्यन्तं[3] सुखमश्नुते ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते[4] ॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

1 जितो येनेन्द्रियग्रामः स शूरः कथ्यते बुधैः —मा and ग.

2 भगवद्गीता—६ [illegible] श्रीभगवानुवाच appears only at the beginning of the chapter

3 ब्रह्मसंस्पर्शम् इति मा स. and श्री शङ्करभाष्यपाठश्च

4 [illegible] इति पाठः

अर्जुन उवाच ।

यो यो योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याऽहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ॥
चञ्चलं हि मन कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याऽहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

श्रीभगवानुवाच ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥
असंयतात्मना योगो दुष्प्राप इति मे मति ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥

'न प्रणश्यामि' न तिरो भवामि। 'सर्वथा वर्तमानोऽपि' मपि वा बुद्धिविकारे वा प्रपञ्चे ब्रह्मबुद्ध्या। 'चेतसा वर्त मानो' मय्येवाऽसौ वर्तत इत्यर्थ ।

तथा

पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः ।
शब्दं न विन्दच्छ्रोत्रेण स्पर्शं चाऽपि न वदयेत् ॥
रूपं न चक्षुषा विन्याज्जिह्वया च रसांस्तथा ।
घ्रेयांस्यपि च सर्वाणि ध्यानयोगेन योगवित् ॥
पञ्चवर्गप्रमाथीनि नेच्छेद्धीमानि वीर्यवान् ।
ततो मनसि संसृज्य पञ्चवर्गविचक्षण ॥
समादध्यान्मनो भ्रान्तमिन्द्रियार्थैः सपञ्चभि ।
निःसंचारि निरालम्ब पञ्चद्वार चलाचलम् ॥
पूर्वध्यानपथे धीर' सदा दध्यान्मनोन्तरम् ।
इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्ययम् ॥

एवं ध्यानपथः पूर्णो मया समनुवर्णितः ।
तस्य तत्पूर्वसंरुद्धमात्मषष्ठमनोन्तरम् ।
स्फुरिष्यति समुद्भ्रान्तं विद्युदम्बुधरे यथा ॥
जलबिन्दुर्यथा लोलपर्णस्थः सर्वतश्चलः ।
एवमेवाऽस्य तच्चित्तं भवति ध्यानवर्त्मनि ॥
समाहितं क्षणं किञ्चित् ध्यानवर्त्मनि तिष्ठति ।
पुनर्वायुपथभ्रान्तं मनो भवति वायुवत् ॥
अनिर्वेदो गतक्लेशो गततन्द्री विमत्सरः ।
समादध्यात्पुनश्चेतो ध्यानेन ध्यानयोगवित् ॥
विचारश्च वितर्कश्च विवेकश्चोपजायते ।
मुनेः समादधानस्य प्रथमं ध्यानमात्मनः ॥
मनसा क्लिश्यमानस्तु स समाधानकाम्यया ।
न निर्वेदं मुनिर्गच्छेत्कुर्यादेवाऽऽत्मनो हितम् ॥
स्वयमेव मनश्चैवं पञ्चवर्गश्च भारत ।
पूर्वं ध्यानपथं प्राप्य नित्ययोगेन शाम्यति ॥
न तत्पुरुषकारेण न च दैवेन केनचित् ।
सुखमेष्यसि तत्तस्य यदेवं संयतात्मनः ॥
सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि ।

पिण्डीकृत्य ' प्रत्याहृत्य ।

<u>यथा</u>

लोको वशीकृतो यैस्तु यैरात्मा च वशीकृतः ।
इन्द्रियार्थान् यतस्तेषां योगं वक्ष्याम्यशेषतः ॥
माऽरण्यसेवनाद्योगो नाऽनेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिर्वा न योगः कस्यचिद्भवेत् ॥

न वै पद्मासनाद्योगो न नासाग्रनिरीक्षणात्।
न वै शास्त्रातिरिक्तेन शौचेन भवति कश्चित्॥
न मौनमन्त्रकुहकैरनेकैः कुकृतैस्तथा।
लोकयात्राभियुक्तस्य न योगः कस्यचिद्भवेत्॥
अभियोगात्तथाऽभ्यासात्तस्मिन्नेव विनिश्चयात्।
पुनः पुनरनुद्वेगाद्योगः सिध्यति नाऽन्यथा॥
आत्मचिन्ताविनोदेन शौचक्रीडनकेन च।
सर्वसत्त्वसमत्वेन योगः सिध्यति नाऽन्यथा।
यस्त्वात्ममिथुनो नित्यमात्मक्रीडस्तथैव च॥
आत्मानन्दश्च सततमात्मन्येव समाहितः॥
आत्मन्येव च सन्तुष्टः सन्तुष्टो नाऽन्यमानसः।
आत्मन्येव च तृप्तस्य योगः सिध्यति नाऽन्यथा॥
स्वप्नेऽपि योऽभियुक्तश्च जाग्रदेव विशेषतः।
ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम्॥

[1]याज्ञवल्क्यः

अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः॥
यथाविधानेन पठन् सामगायम्यमच्ययम्[2]।
सावधानस्तथाऽभ्यासात्[3] परमात्माऽधिगच्छति॥
अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा।
औवेणकं सरोबिन्दुमुत्तरं गीतकानि तु॥
ऋग्गाथा पाणिका पक्षविहिता ब्रह्मगीतिका॥

1 ३ १११-११६
2 सामयजममभिष्टुतम् इति विज्ञानेश्वरपाठः
सामयजममविच्युतम् इति अपरार्कपाठः (पृ ९९)
3 तदभ्यासात् परं ब्रह्माधिगच्छति इति मिताक्षरापाठः

गेयमेतत्तदभ्यासकारणान्मोक्षसंज्ञकम् ।
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥
तालज्ञश्चाऽप्रयासेन मोक्षमार्गं नियच्छति ।
गीतज्ञो यदि गीतेन नाऽऽप्नोति परमं पदम् ।
रुद्रस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥

'अपरान्तकमुल्लोप्यम्' अत्र प्रकर्यो रेणकानि स्वर बिन्दुसहितमुत्तरं चेति । एतानि प्रकरणाख्यानि सप्तगीतकानि भरगाथायाः चतस्रो गीतिकाः । एतदपरान्तकादि गीतजातं परमात्मतया चिन्तितं मोक्षसाधनत्वान्मोक्षसंज्ञकं ज्ञातव्यम् । तदभ्यासस्यैकाग्रताप्रतिपादनद्वारेणो त्सुक्यापत्तिहेतुत्वात् । 'भूयत' इति । श्रुतिर्द्वाविंशतिधा । सा तु स्वरेषु । तथाहि षड्जमध्यमपञ्चमाः प्रत्येकं चतुः श्रुतयः । ऋषभधैवतौ प्रत्येकं त्रिश्रुतौ । गान्धारनिषादौ प्रत्येकं द्विश्रुती । जातयस्तु षड्जातयः शुद्धाः । सङ्करजास्त्वेकादश । एवमष्टादशविधाः । 'गीतज्ञो यदि' इति । गीतिज्ञो यदि कथञ्चिद्विभ्रतो योगस्थः सन्मुच्यते तदा रुद्रानुचरत्वं लभत इत्यर्थः ।

॥ १८ ॥

युक्तलक्षणम्

तत्र <u>महाभारते</u>

युक्तस्य तु महाराज लक्षणान्युपधारयेत् ।
निर्वाति तु यथा दीपो ज्वलेत्स्नेहसमन्वितः ॥
निश्चलोर्ध्वशिखस्तद्वद्युक्तमाहुर्मनीषिणः ।
पाषाण इव मेघोत्थैर्यथा बिन्दुभिराहतः ॥
नालं चालयितुं शक्यः तथा युक्तस्य लक्षणम् ।
शङ्खदुन्दुभिनिर्घोषैः विविधैर्गीतवादितैः ॥
क्रियमाणैर्न कम्पेत युक्तस्यैतन्निदर्शनम् ।
तैलपूर्णं यथा पात्रं कराभ्यां धारयन्नधः ॥
सोपानमारुहेद्भीतः तर्ज्यमाणोऽसिपाणिभिः ।
संयतात्मा भयात्तेषां न पात्राद्बिन्दुमुत्सृजेत् ॥
तथैवोत्तरमाणस्य एकाग्रमनसस्तथा ।
स्थिरत्वादिन्द्रियाणां च निश्चलत्वे तथैव च ॥
एवं युक्तस्य तु मुनेर्लक्षणान्युपधारयेत् ।
संयुक्तः पश्यति ब्रह्म यत्तत्परममव्ययम् ॥
महतस्तमसो मध्ये स्थितं ज्वलनसन्निभम् ।
एतेन केवलं याति त्यक्त्वा देहमसाक्षिकम् ॥
कालेन महता राजन् श्रुतिरेषा सनातनी ।

<u>तथा</u>

स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर ।
मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ॥

स्थाणुवच्चाऽप्यकम्पः स्याद्गिरिवच्चाऽपि निश्चलः ।
बुद्ध्वा विधिविधानज्ञास्तदा युक्तं प्रचक्षते ॥
न शृणोति नचाऽऽघ्राति न रस्यति न पश्यति ।
न च स्पर्शं विजानाति न सङ्कल्पयते मनः ॥
न चाऽभिमन्यते किञ्चिन्न बुद्ध्यति च काष्ठवत् ।
तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ॥

तथा

[1]यदा विनियतं चित्तमात्मन्येवाऽवतिष्ठति ।
निस्स्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवाऽऽत्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवाऽयं स्थितश्चलति तत्त्वतः ॥
यं लब्ध्वा चाऽपरं लाभं मन्यते नाऽधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥

तथा

[2]ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥
'कूटस्थो' निर्विकार इत्यर्थः ।

1 गीता—६, १८–२३
2 गीता—६,

॥ १९ ॥

अथ ध्येयस्वरूपम्

[1]विष्णुः

ऊरुस्थोत्तानचरणः सव्ये करे कर इतर न्यस्य तालुस्थाचलजिह्वो दन्तैर्दन्तान् असंस्पृशन्, स्व नासिकाग्र पश्यन्, दिशश्चानवलोकयन्, विगतभीः, प्रसन्नात्मा,[2] चतुर्विंशात्या तत्त्वैर्व्यतीतं चिन्तयेत् ॥ १ ॥ नित्यमतीन्द्रियमगुणम् । शब्दस्पर्शरूपरसगन्धातीतं, सर्वस्यमतिस्थूलम् ॥ २ ॥ सर्वगमतिसूक्ष्मम् ॥ ३ ॥ सर्वतः पाणिपादं, सर्वतोऽक्षिशिरोमुखं, सर्वतः सर्वेन्द्रियशक्तिम् ॥ ४ ॥ एवं ध्यायन् ॥ ५ ॥ ध्याननिरतस्य च संवत्सरेण योगाविर्भावो भवति ॥ ६ ॥ अथ निराकारे लक्षबन्धं कर्तुं न शक्नोति तदा पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यात्माव्यक्तपुरुषाणां पूर्वं पूर्वं ध्यात्वा तत्र लब्धलक्षः तत्तत् परित्यज्याऽपरमपरं ध्यायेत् ॥ ७ ॥ एवं पुरुषध्यानमारभेत ॥ ८ ॥ अत्राऽप्यसमर्थो हृदयपद्मस्याऽधोमुखस्य मध्ये दीपवत्पुरुषं ध्यायेत् ॥ ९ ॥ तत्राऽप्यसमर्थो

1 All three Mss attribute what follows to the *Viṣṇupurāṇa*. The passage is from *Viṣṇusmṛti*, अ. ९७. १— E. on *Vīramitrodaya* Mokṣaprakāśa, p. 359 refers to this passage as from the *Viṣṇupurāṇa*.

2 प्रसन्नात्मा इति मु. पु. (पृ. २)

भगवन्तं वासुदेवं किरीटिनं कुण्डलिनं गदिनम् । श्रीवत्सा
ङ्कं वनमालाविभूषितोरस्कं सौम्यरूपं चतुर्भुजं शङ्खचक्र
गदापद्मधरं ध्यायेत् ॥ १० ॥ यद्यद्ध्यायेत् तत्तदाप्नोति ध्यान
गुणम् ॥ ११ ॥ तस्मात्सर्वमेव क्षरं सपक्ष्याक्षरमेव ध्यायेत्
॥ १२ ॥ न च पुरुषं विना किञ्चिदपि अक्षरं अस्ति ॥ १३ ॥
तं प्राप्य मुक्तो भवति ॥ १४ ॥

पुरमाक्रम्य सकलं शेते यस्मान्महात्मनः ।
तस्मात्पुरुष इत्येवं प्रोच्यते तत्त्वचिन्तकैः ॥ १५ ॥
प्रामाद्यापरराज्येषु योगी नित्यमतन्द्रितः ।
ध्यायेत्तु पुरुषं विष्णुं निर्गुणं पञ्चविंशकम् ॥ १६ ॥
सर्वतस्त्वात्मगम्यं च सर्वतस्त्वविवर्जितम् ।
[[1]सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।]
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १७ ॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चाऽन्तिके च तत् ॥ १८ ॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभव्यभवद्रूपं ग्रसिष्णु प्रभविष्णु च ॥ १९ ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ २० ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते[2] ॥ २१ ॥

1 [ ] Not found in printed विष्णुस्मृति.

2 All three manuscripts are unintelligible in parts. Text restored from printed *Viṣṇusmṛti*.

नरसिंहपुराणे

महेश्वर उवाच ।

[1]ज्ञातामृत परं गुह्यं रहस्यमृषिसत्तम ।
वक्ष्यामि हृदि दुर्ध्याम्रं सर्वबन्धभयापहम् ॥
तृणादि चतुरास्यान्तं भूतग्रामं चतुर्विधम् ।
चराचरं जगत्सर्वं सुप्तं यस्य मायया ॥
तस्य विष्णोः प्रसादेन यदि कश्चित्प्रबुध्यते ।
स निस्तरति संसारं देवानामपि दुस्तरम् ॥
भोगैश्वर्यमदोन्मत्तः तत्त्वज्ञानपराङ्मुखः ।
संसारे सुमहापङ्के जीर्णा गौरिव मज्जति ॥
यस्त्वात्मानं निबध्नाति कर्मभिः कोशकारवत् ।
तस्य मुक्तिं न पश्यामि जन्मकोटिशतैरपि ॥
तस्मान्नारद सर्वेशं देवानां देवमव्ययम् ।
आराधयेत्सदा सम्यग्ध्यायन् विष्णुं समाहितः ॥
यस्तं विश्वमनाद्यन्तमजं आत्मनि संस्थितम् ।
सर्वज्ञमचलं विष्णुं सदा ध्यायन् विमुच्यते ॥
समाप्तमक्षरं नित्यं निर्गुणं तमसःपरम् ।
सर्वगं शाश्वतं विष्णुं सदा ध्यायन् विमुच्यते ॥
निर्विकल्पं निराभासं निष्प्रपञ्चं निरामयम् ।
वासुदेवं सदा विष्णुं सदा ध्यायन् विमुच्यते ॥
निरञ्जनपरं शान्तमच्युतं भूतभावनम् ।
देवगर्भं विभुं विष्णुं सदा ध्यायन् विमुच्यते ॥
सर्वभावविनिर्मुक्तमप्रमेयमलक्षणम् ।
निर्वाणमनघं विष्णुं सदा ध्यायन् विमुच्यते ॥

1 १७ ११-२८

भगवन्तं वासुदेवं किरीटिनं कुण्डलिनं गदिनम्। श्रीवत्सा-
ङ्कं वनमालाविभूषितोरस्कं सौम्यरूपं चतुर्भुजं शङ्खचक्र
गदापद्मधर ध्यायेत् ॥ १० ॥ यद्यद्ध्यायेत् तदाप्नोति ध्यान
गुह्यम् ॥ ११ ॥ तस्मात्सर्वमेव क्षर त्यक्त्वाक्षरमेव ध्यायेत्
॥ १२ ॥ न च पुरुषं विना किञ्चिदपि अक्षरं अस्ति ॥ १३ ॥
तं प्राप्य मुक्तो भवति ॥ १४ ॥

पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः।
तस्मात्पुरुष इत्येवं प्रोच्यते तत्त्वचिन्तकैः ॥ १५ ॥
प्राप्याप्यापरराप्तेषु योगी नित्यमतन्द्रित ।
ध्यायेत्तु पुरुषं विष्णुं निर्गुणं पञ्चविंशकम् ॥ १६ ॥
सर्वतत्त्वात्मगम्यं च सर्वतत्त्वविवर्जितम् ।
[[1]सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।]
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १७ ॥
बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १८ ॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १९ ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥ २० ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते[2] ॥ २१ ॥

1 [ ] Not found in printed विष्णुस्मृति.

2 All three manuscripts are unintelligible in parts. Text restored from printed विष्णुस्मृति

शङ्खः

हृत्स्थस्य ध्यानयोगेन देवदेवस्य दर्शनम् ।
ध्यानं प्रोक्तं प्रवक्ष्यामि ध्यानयोगमतः शुभम् ॥
हृदिस्था देवताः सर्वा हृदि प्राणः प्रतिष्ठितः ।
हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितम् ॥
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मन्थनाभ्यासाद्विष्णुं पश्येद्धृदि स्थितम् ॥
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः ॥
[1]अणोरणीयान्महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः ।
तेजोमयं पश्यति वीतशोको
धातुप्रसादान्महिमानमीशम् ॥
एष देवस्तु मर्त्यानां पटैरिव विधीयते ।
अज्ञानपटसंवीतैरिन्द्रियैर्विषयैः श्रुतिः ॥
एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः ।
एष धाता विधाता च प्रधानं निष्कलः शिवः ।
[2]वेदाहमेतं पुरुषं महान्त
मादित्यवर्णं तमसः परस्तात् ।
तं वै विदित्वा न बिभेति मृत्यो
र्नान्यः पन्था विद्यतेऽयनाय ॥

1 तैत्तिरीयारण्यकम्—१०, ४ १ १ १
महानारायणोपनिषत्—८ १
कठोपनिषत्—२, २ श्वेताश्वतरोपनिषत्, ३ २
2 तैत्तिरीयारण्यकम्—३ १२, ७ ११ १
श्वेताश्वतरोपनिषत्—३, ८ वाजसनेयिसंहिता (वेबर) ३१ १

अमूर्तं परमानन्दं सर्वपापविवर्जितम् ।
ब्रह्म ज्ञेयं शिवं विष्णुं सदा ध्यायन् विमुच्यते ॥
योगेश्वरं पुराणाख्यं स्वशरीरगुहाशयम् ।
अमात्रमव्ययं विष्णुं सदा ध्यायन् विमुच्यते ॥
शुभाशुभविनिर्मुक्तमूर्मिषट्कपरं प्रभुम् ।
तं वेद्यममलं विष्णुं सदा ध्यायन् विमुच्यते ॥
सर्वद्वन्द्वविनिर्मुक्तं सर्वदुःखविवर्जितम् ।
अप्रतर्क्यं सदा विष्णुं सदा ध्यायन् विमुच्यते ॥
अनामगोत्रमद्वैतं चतुर्थं परमं पदम् ।
तं सर्वहृद्गतं विष्णुं सदा ध्यायन् विमुच्यते ॥
अरूपं सत्यसङ्कल्पं शुद्धमाकाशवत् परम् ।
एकाग्रमनसा विष्णुं सदा ध्यायन् विमुच्यते ॥
सर्वात्मकं स्वभावस्थमात्मचैतन्यरूपकम् ।
शुभ्रमेकाक्षरं विष्णुं सदा ध्यायन् विमुच्यते ॥
कालातीतं त्रिकालज्ञं विश्वेशं लोकसाक्षिणम् ।
सर्वस्मादुत्तरं विष्णुं सदा ध्यायन् विमुच्यते ।
[1]विष्णौ प्रतिष्ठितं विश्वं विष्णुर्विश्वे प्रतिष्ठितः ॥
विश्वेश्वरमजं विष्णुं सदा ध्यायन् विमुच्यते ।

तथा

[2]ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

1 १ ३१
2 ३६ १७

गरुडः

देहस्थस्य ध्यानयोगेन देवदेवस्य दर्शनम् ।
ध्यानं मोक्षं प्रवक्ष्यामि ध्यानयोगमतः शुभम् ॥
हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः ।
हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितम् ॥
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मन्थनाभ्यासाद्विष्णुं पश्येद्धृदि स्थितम् ॥
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः ॥
[1]अणोरणीयान्महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुः पश्यति वीतशोको
धातृप्रसादान्महिमानमीशम् ॥
एष देवस्तु मर्त्यानां पङ्करिव विधीयते ।
अज्ञानपरमैर्यैर्मरिन्द्रियैर्विषयैः श्रुतिः ॥
एष हि पुरुषो विष्णुरव्यक्तोऽव्यक्तः सनातनः ।
एष धाता विधाता च प्रधानं निष्कलः शिवः ।
[2]वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तं ह विदित्वा न बिभेति मृत्यो-
र्नान्यः पन्था विद्यतेऽयनाय ॥

1 तैत्तिरीयारण्यकम्—१०, १० १ १ १
महानारायणोपनिषत्—८ १
कठोपनिषत्—२, २ श्वेताश्वतरोपनिषत्, ३ २
2 तैत्तिरीयारण्यकम्—३ १२ ७ ११ १
श्वेताश्वतरोपनिषत्—३, ८ वाजसनेयिसंहिता (वेबर) ३१ १८
25

ब्रह्माण्डपुराणे

[1]यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।
अप्यर्क तत्परोक्षत्वाज्ज्ञानं तु दुरासदम् ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्टे तस्मिन् परावरे ॥

[2]याज्ञवल्क्यः

ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः ।
धारयेत्तत्र चाऽऽत्मानं धारणा धारयन् बुधः ॥

[3]तथा

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ।
हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभम् ॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाऽचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥

नरसिंहपुराणे

[4]योगाभ्यासरतस्येह नश्यन्ते पातकानि च ।
तस्माद्योगपरो भूत्वा ध्यायेन्नित्यक्रियान्तरे ॥
प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् ।
धारणाभिर्वशीकृत्य पूर्वं दुर्धर्षणं मनः ॥
एवं कारणमानन्दं बोधरूपमनामयम् ।
सूक्ष्मात्सूक्ष्मतरं ध्यायेत् जगदाधारमच्युतम् ॥

1 यतो वाचो निवर्तन्त इति तैत्तिरीयोपनिषदि—२ ४ १ ९ १; ४ ४ ११
2 ३, २ १
3 ३, १ ८–१ ९
4 ६१ ३-११

आत्मानमरविन्दस्थं तप्तचामीकरप्रभम् ।
रहस्येकान्त आसीनो [1]ध्यायेदमिरणादणुम् ॥
यः सर्वप्राणचित्तज्ञो यः सर्वेषां हृदि स्थितः ।
यश्च [2]सर्वाचरज्ञेय सोऽहमस्मीति चिन्तयेत् ।
आत्मलाभसुखं यावत् तावद्ध्यानमुदाहृतम् ॥
श्रुतिस्मृत्युदितं कर्म तत्पूर्वं तु समाचरेत् ।
यथाश्वरथहीनस्तु रथश्चाऽश्वैर्विना यथा ॥
एवं तपोऽप्यविद्यस्य विद्या[3] चाऽप्यतपस्विनः ।
[4]यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम् ॥
एवं तपश्च विद्या च संयुक्तं भेषजं महत् ।
उभाभ्यामेव पक्षाभ्यां यथा खे पततां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥
विद्यातपोभ्यां संपन्नो ब्राह्मणो योगतत्पर ।
देहद्वयं[5] विहायाऽऽशु मुक्तो भवति बन्धनात् ।
न देवयानमार्गेण यावत्प्राप्त पर पदम् ॥
न [6]तावल्लिङ्गदेहस्य विनाशो विद्यते क्वचित् ।

'नित्यक्रियान्तर' नित्यानां कर्मणामन्तराले, नित्य कर्मकाल एवेत्यर्थः । '[7]आरणी 'रुपनिषद्भिः ।

1 ध्यायेदात्मानमिति स्थितम्—इति मु पाठ
2 सर्वान्तरात्मेन —ना सर्वाचरज्ञेय —स सर्वान्तर्गतेन —मु पाठ
3 एवं तपश्चविद्या च समायतितपस्विन —इति मुद्रितपाठ
4 यथाऽन्नं मधुसंयुक्तं मधुचाऽन्नेन संयुतम्—ना
5 द्वयं—इति मु पाठः
6 च तावल्लिङ्गस्य इति मु पाठ
7 नेदं पदं ग्रन्थेषु दृश्यते

<u>तथा</u>

[1]उत्पन्नवैराग्यबलेन योगी
ध्यायन् परब्रह्म सदा क्रियावान् ।
सत्यात्मकं चित्सुखरूपमाद्यं
विहाय देहं पदमेति विष्णोः ॥

<u>योगियाज्ञवल्क्यः</u>

[2]ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

तस्य च मात्रास्तिस्रो व्यक्ताऽव्यक्ता तथाऽपरा सूक्ष्मा ।

अध्यात्ममधिभूतमधिदैवी तां विजानीयात् ।

ॐकारप्रणवस्तारः अक्षरः प्रणवः परः ।
उद्गीथश्च तथाऽऽदित्यो हंसो नारायणो विभुः ॥
पर्यायैश्च तथाऽन्यैश्च शास्त्रेभ्यः संप्रतीयते ।
ॐकारसंज्ञं त्रिविधं त्र्यक्षरं च त्रिदैवतम् ॥
त्रिब्रह्म च त्र्यवस्थानं त्रिकालं त्रिप्रतिष्ठितम् ।
सत्त्वं रजस्तमश्चेति गुणास्तैस्त्रिगुणाः स्मृताः ॥
अकारश्चाप्युकारश्च मकारश्चाक्षरं त्रयम् ।
ब्रह्मा विष्णुश्च रुद्रश्च त्रिदैवत्य उदाहृतः ॥
अग्निर्वायुरविश्चैव त्रिमात्र इति संज्ञिताः ।
ऋग्यजुश्च तथा साम त्रिब्रह्म इति कीर्तितः ॥

1 नृसिंहपुराण—६१ ११
2 गीता—१७ २३ २४

मूर्ध्न्यास्यस्यवस्थान हृत्कण्ठतालुकास्तथा ।
तुर्ये प्राणे तथाऽऽदित्ये त्रिषु चैव प्रतिष्ठितः ॥
भूत भव्यं भविष्यच्च त्रिकालस्तेन चोच्यते ।
अन्तःप्रज्ञो बहिःप्रज्ञो घनप्रज्ञ उदाहृतः ॥
गार्हपत्यो दक्षिणाग्निराहवनीय त्रिधात्मकः ।
शान्तो घोरस्तथा मूढस्त्रिरवस्य इति स्मृतः ॥
स्त्रीपुंनपुंसकं चैव सत् त्रिलिङ्गमिति स्मृतम् ।
त्रिप्रकार विदित्वा तु ॐकार मुच्यते द्विजः ॥
एवैकाऽत्र भवेन्मात्रा बहुधा सा[1] तु वै पुनः ।
तासां सर्वं वाङ्मयं तु ओतं प्रोतं व्यवस्थितम् ॥
प्रथमा तस्याऽकारेण वाक् सत्त्व भू हुताशन ।

विष्णुः

स्थूला जाग्रद्वृत्तिर्विज्ञेया योगतत्त्वज्ञै ॥
ब्रह्मान्तरिक्षसञ्ज्ञो मनोरज' सोममर्मज्ञित उकार ।
मात्रा स्वप्नविकल्पा सृष्टिः मता द्वितीया स्यात् ॥
रौद्री मकारसञ्ज्ञा प्राणाख्या तामसी तृतीया स्यात् ।
संहरति जगत् कृत्स्नं सा सौषुप्ताख्या महानिद्रा ।
आद्या परा तु सूक्ष्मार्धा तार्यायवाख्या (?) ।
सौम्या मकारसंज्ञा विज्ञाता काश्च संयन्धा (?) ।
अ उ म इति तिस्रो मात्रा मकारश्चाऽर्द्धमात्रिका ।
तिस्रो मात्रा लयं यान्ति अर्धमात्रे न संशयः ।
अर्द्धमात्रा स्वमात्रे सा लय याति निरामये ।
अकारे पीड्यमाने तु उकार प्रतिपद्यते ।
उकारे पीड्यमाने तु मकार प्रतिपद्यते ।

1 मात्रैव पुन —ख.

मकारे पीड्यमाने तु अर्धमात्रा तदा भवेत् ।
जिह्वाया पीड्यमानायां निरालम्बस्तदा भवेत ।
एकमात्रं द्विमात्रं वा त्रिमात्रं कृत्स्नमेव च ।
ह्रस्वं दीर्घं प्लुतं शान्तं शान्तेन मनसोच्चरेत् ।
समाहितमना भूत्वा तत्त्वध्यानपरायणः ।
ॐकारं यस्त्वभिध्यायेदाध्यात्मिक इति स्मृतः ।
यथा हि शकुना पर्णाः सम्पूर्णा एव सर्वशः ।
एवं सर्वास्तु वै वाचः [1]संतृण्णा प्रणवेन तु ।
क्लेशकर्मविपाकैस्तु वासनाभिस्तथैव च ।
अपरामृष्टमेवाहुः पुरुषं हीश्वरं बुधैः ।
वाच्यस्तस्येश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः ।
वाचकेन तु विज्ञातो वाच्य एव प्रसीदति ।
तदर्थं प्रणवो जप्यो ध्यातव्यः सततं बुधैः ।
ईश्वरः पुरुषस्तेनोपासितः संप्रसीदति ।
यथा हि गावस्सवनं निशाम्य
हुङ्कृत्य वत्साभिमुखी प्रयाति ।
ब्रह्माऽपि तद्वत्प्रणवोपहूतं
चकारमागच्छति चाऽशु वक्त्रे ॥
[2]द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माऽधिगच्छति ।
अन्त्यं शरीरमचसुखानमेरितं च यत् ।
वायुवार्यं सोऽप्रवृत्ति शब्दवृत्तिस्तदुच्यते ।
शब्दब्रह्म परं ब्रह्म तस्मिन् क्षीणे यदक्षरम् ।
तदक्षरं सदा ध्यायेद्यदीच्छेद्योगमात्मनि ॥

1 संपूर्णा —ग.
2 विष्णुपुराणे ६, ५, ६४

अकारश्चाप्युकारश्च मकारो विष्णुरेव च ।
मात्रार्द्धत्रययोगाच्च प्रणवः पञ्चलक्षणः ।
[1]वेदादौ यः स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।
[2]यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ।
[3]प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ।
स्वदेहमधरां[4] कृत्वा प्राणमेवोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ।
कश्चिदाराधनाकामो विष्णोर्भक्तिं करोति वै ।
तदाराधनसिद्ध्यर्थं प्रतिमां व्यक्तिकां तथा ॥
धातुदार्वादिपाषाणैः कृत्वा भावं निवेशयेत् ।
भक्त्या श्रद्धादराभ्यां च तस्य विष्णुः प्रसीदति ॥
ॐकारेण सदा ह्यात्मोपासितः सम्प्रसीदति ।
[5]एतदालेवनं श्रेष्ठमेतदालेवनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मभूयाय कल्पते ॥
अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः ।
तस्योंकारः परं नाम तेनाऽऽहूतः प्रसीदति ॥
तस्मादोमिति पूर्वं तु कृत्वा युञ्जीत तत्परः ।
आद्यस्त्वमनुयुक्तानि पदान्येतानि तस्य तु ॥

1 महानारायणोपनिषद्—१
2 तैत्तिरीयोपनिषद्—२ ४ १
3 मुण्डकोपनिषद्—२ २ ४
4 आत्मानं कृत्वा इति श्वेताश्वतरोपनिषद्—१ १४
5 कठोपनिषदि २, १७ — "एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥"

बहिःप्रज्ञस्तथाऽन्यश्च घनप्रज्ञस्त्रिधा भवेत् ।
दक्षिणाक्षिमुखे विष्णोर्मनस्यन्तस्तु तेजसः ॥
आकाशे तु हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ।
स्थूलं वैश्वानरो नित्यं तेजसोऽन्तःप्रवृत्तिभुक् ॥
आनन्दभुक् तथा प्राज्ञस्त्रिधा भोगं विजानता ।
स्थूलं तु सर्वतो विश्वं प्रविभक्तं तु तैजसम् ॥
आनन्दं च तथा प्राज्ञं त्रिधा तृप्तिं विजानत ।
त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ॥
उभयं विन्दते यस्तु स भुञ्जानो न लिप्यते ।
यस्तु शब्दमयोङ्कार उच्चार्यः स्थूल एव सः ॥
अमात्रश्चाऽप्यनुच्चार्यः पर ओंकार उच्यते ।
तिस्रः सार्धास्तथा मात्राः स गृह्णाति यथाक्रमम् ॥
परब्रह्म तदेवाहुः आत्मानं ब्रह्मचिन्तकाः ।
यत्पूर्वं तु समुद्दिष्टमौकारेऽस्मे व्यवस्थितम् ॥
अक्षरैश्च पदैश्चैतदतीतं परमं पदम् ।
यत्प्राप्य न निवर्तन्ते ओंकारपरमाश्रिताः ॥
अमस्तत्र समाधाय शरीरं लिङ्गमात्रकम् ।
सङ्कल्पाध्यवसायं च अभिमानाख्यमेव च ॥
चेतनाधिष्ठितं सूक्ष्मं तथा सूक्ष्मैः सहैव तत् ।
ओंकार पवनाक्षेन हृद्युद्धृत्य नियोजयेत् ॥
परे व्योम्नि अनन्ताख्ये सर्वसङ्कल्पवर्जिते ।
तस्मिंस्तावत्स्थितो ह्यव्यो मनश्चोंकार एव च ॥
निर्मलस्तां गतो यावदेष योग उदाहृतः ।
मनो युञ्ज्यात्तथोंकारे ओंकारं प्रणवे तथा ॥
प्रणवं ब्रह्मणि स्थाप्य न किञ्चिदपि चिन्तयेत् ।

अप्राणो विमलः शुद्धो निश्शब्दो ब्रह्मसञ्ज्ञित ॥
तस्मादुत्पद्यते प्राणः पुनस्तत्रैव लीयते ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥

[1]मनुः

सर्वमात्मनि संपश्येत्सच्चाऽसच्च समाहित ।
सर्वमात्मनि संपश्यन्नाऽधर्मे कुरुते मन ॥
आत्मैव देवताः सर्वा सर्वमात्मन्यवस्थितम् ।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ॥
खं संनिवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ।
पंक्तिदृष्ट्योः पर तेजः स्नेहे योगं च मूर्तिषु ॥
मनसीन्दुं दिशः श्रोत्रे पादे विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ॥
प्रशासितारमेतेषां अणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्य विद्यात्तं पुरुषोत्तमम्[2] ॥
एतमेके वदन्त्यग्निमग्नुमेके प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्य ससारयति चक्रवत् ॥
एवं य' सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माऽभ्येति सनातनम् ॥

'कर्मफलसम्बन्धः' सर्वमात्मनि संपश्येदिति युक्तम्। तत्र विशेषमाह—'खं सन्निवेशयेत् खेष्विति' बाह्यमाकाशं शरीरगतमवच्छिन्नाकाशेन सहैकत्वेन भावयेत्। एवं चेष्टा

1 १२ ११ –१२५
2 पुरुषं परमिति—मु पु

स्पर्शकारणभूतेन दैहिकेन वायुना सह बाह्यस्य वायोरैक्यम्। अशितपीतान्नपाकहेतुभूतकोष्ठगाग्नुपतेजोभ्यां सह प्रकृष्ट तेजसः आदित्याख्यस्य ऐक्यं शारीराभिरद्भिः सह बाह्याना मपामैक्यम्। शारीरैश्च कठिनैर्भागैः पार्थिवैः सह बाह्यायाः पृथिव्या अप्यैक्यम्। मनसा सह चन्द्रस्य श्रोत्रेण सह दशदिशां पादेन्द्रियेण सह विष्णोः वीर्येण सह तस्यैक्यं भावयेत्। एवमाध्यात्मिकभूम्यादिभिः महाऽधिभौति काधिदैविकानामैक्यं भावयित्वा तेषां प्रशासितार ब्रह्मा दिस्तम्बपर्यन्तानां व्यवस्थाकारिणां तथा च "तस्याक्षरस्य शासने गार्गी"त्यादि श्रावणं परमाणोरपि सकाशात् सूक्ष्मतरममूर्तत्वात् सुवर्णवत् शुद्धरूप उर्मिषट्करहि तत्वात् सुषुप्तावस्थाविज्ञानोपमेयस्वरूपं परमात्मान जानी यात्। यावत् सुषुप्तावस्थायां प्रशमितसुखदुःखविकल्पं क्षेमब्रह्मरूपमेवं सर्वदा परमात्मनः। एवं परमात्मानममि त्थेमोपासते याज्ञिकाः।

अन्ये पुनः 'सर्वत एवाऽऽत्मानो व्युच्चरन्ती'ति श्रुत्य श्रुतेः मन्वाख्यप्रजापतिरूपतयोपासते। अपरे पुनरैश्वर्य योगाग्निन्द्ररूपतयोपासते। केचित् 'प्राणमुद्गीथमुपासीते'ति श्रुतेः प्राणात्मनैनमुपासते। अन्ये पुनः परमात्मतयेति 'एष परमात्मा सर्वान् प्राणिनः' पंचभि पृथिव्यादिभिर्भूतैः शारीरांश्चै' परिगृह्य स्वार्जितकर्मापेक्षयोत्पत्तिस्थितिविनाशी रसधूमियोजयतीश्वरः।

महाभारते

इन्द्रियग्राममखिलं मनस्यभिनिवेश्य च।
मनस्तथैवाऽहंकारे प्रतिष्ठाप्य नराधिप॥

अहङ्कारं तथा बुद्धौ बुद्धिं च प्रकृतावपि ।
एवं च परिसंख्याय ततो ध्यायेत केवलम् ॥
विरजसममलं नित्यमनन्तं शुद्धमव्रणम् ।
तस्थुषं परमं तत्त्वमभेद्यमजरामरम् ॥
शाश्वतं चाऽव्ययं चैव ईशानं ब्रह्म तत्परम् ।

विष्णुपुराणे

[1]आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वरूपतः ।
भूप मूर्तममूर्तं च परं चाऽपरमेव च ॥
[2]अक्षीणेषु समस्तेषु[3] विशेषज्ञानकर्मसु ।
विश्वमेतत्परं चान्यद्भेदभिन्नदृशां नृप[4] ।
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसम्मितम्[5] ।
तच्च विष्णोः परं रूपमरूपस्याऽजमक्षयम् ।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ।
न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः ॥
ततः स्थूलं हरेरूपं चिन्तयेद्विश्वगोचरम् ।
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ॥
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ।
गन्धर्वयक्षदैत्याद्याः सकला देवयोनयः ॥
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ।

1 ६ ४७
2 ६ ५२
3 समस्तेषु—ना and न मु—पाठः
4 मेरुमितदृशां नृप इति मु पाठः
5 संज्ञितम्—ना—न ; मु—पाठः

¹सर्वभूतान्यशेषाणि भूतानां परमेश्वर² ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादं च बहुपादमपादपम्³ ।
मूर्तमेतत्स्वयो रूपं भावनात्रितयात्मकम् ॥
तच्च सर्वमिदं विश्वं जगदेतच्चराचरम् ।
परं ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥
⁴एतान्यशेषरूपाणि कथितान्यस्य पार्थिव ।
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ॥
द्वितीयं विष्णुरूपस्य योगिध्येयं महामते ।
अमूर्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः ॥
समस्तविषयाश्चैते नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्मतम्⁵ ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्याद्यैः चेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याऽप्रमेयस्य ⁶व्यापिन्यविहतात्मिका ॥
तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्वकल्मषनाशनम् ॥
यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुः योगिनां सर्वकिल्बिषम् ॥

1 सर्वभूतानि इति ह. ख
2 चै च हेतवः इति ह. प
3 तथैव च for भावनात्मकम्—ख and ग. अपादकम्—इति ह. प
4 ह. ६४
5 मतम् for मान्यम्—ख. and ग.; ह—पाठः
6 व्याप्तिमन्यानव्याप्तिका इति ह. पाठ.

तस्मात्समस्तशक्तीनामाकारे[1] तत्र चेतसः ।
कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयस्य चित्तस्य सर्वगस्य तथाऽऽत्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः ॥
मूर्तं भगवतो रूपं सर्वापाश्रयनिस्पृहे ।
एषा वै धारणा ज्ञेया यच्चित्तं यत्र धारयेत् ॥
तच्च मूर्तं हरेरूपं तद्विचिन्त्य नराधिप ।
तच्छ्रूयतामनाधारा धारणा नूपपद्यते[2] ॥
प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटं फलकोज्ज्वलम् ॥
समकर्णान्तविन्यस्तचारुकुण्डलभूषणम् ।
कम्बुग्रीवं सुविस्तीर्णं श्रीवत्साङ्कितवक्षसम् ॥
वलीत्रिभङ्गिनाभग्ननाभिना चोदरेण च ।
प्रलम्बाष्टभुजं विष्णुमथवाऽपि चतुर्भुजम् ॥
समस्थितोरुजङ्घं च सुस्थिराङ्घ्रिकराम्बुजम् ।
चिन्तयेद्ब्रह्मरूपं तं पीतनिर्मलवाससम् ॥
किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गशङ्खगदाचक्रखड्गाक्षवलयान्वितम् ॥
चिन्तयेत्तन्मयो योगी समाधायाऽऽत्ममानसम् ।
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ।
व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ॥

1 आधारे—मु पञ्च
2 नोपपद्यते—मा and स. मु. प

नाऽपयाति यदा चित्तात् सिद्धां मन्येत तां तदा ।
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुध ॥
चिन्तयेद्भगवद्रूप प्रशान्तं साक्षसूत्रकम् ।
सा यदा धारणा तद्वदवस्थानवती तदा ॥
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ।
तदेकावयवं देव चेतसो हि पुनर्बुधः ॥
कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ।

तथा

मैत्रेय उवाच ।

[1]भूषणास्त्रस्वरूपस्थं यथैतदखिलं जगत् ।
बिभर्ति भगवान् विष्णुः तन्ममाऽऽख्यातुमर्हसि ॥

पराशर उवाच ।

नमस्कृत्याऽप्रमेयाय विष्णवे प्रभविष्णवे ।
कथयामि यथाख्यातं वसिष्ठेन ममाऽभवत् ॥
आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्ति कौस्तुभमणिस्वरूप भगवान् हरिः ॥
श्रीवत्ससंस्थानधरमनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥
भूतादिमिन्द्रियादिं च द्विधाऽहङ्कारमीश्वर' ।
बिभर्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥
चलस्वरूपमत्यन्तं जवेनाऽन्तरितानिलम् ।
चक्रस्वरूपं च मनो धत्ते विष्णोः करे स्थितम् ॥

1 Omission in Udaipur Ms. supplied by ग and ख.; विष्णुपुराणे १
२२, ६६–७४

पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसङ्घाता भूतमाला च वै द्विज[1] ॥
यानीन्द्रियाण्यनेकानि बुद्धिकर्मात्मिकानि वै ।
[2]शररूपाण्यशेषाणि तानि धत्ते जनार्दनः ॥
बिभर्ति यथाऽसिवरमच्युतोऽत्यन्तनिर्मलम् ।
विद्यामयं तु तज्ज्ञानमविद्याकोशसंस्थितम् ॥
इत्थं पुमान् प्रधानं च बुद्ध्यहङ्कारमेव च ।
भूतादीनि हृषीकेशो मनः सर्वेन्द्रियाणि च ॥
विद्याऽविद्ये च मैत्रेय सर्वमेतत् समाश्रितम् ।
अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितम् ॥
बिभर्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ।
सविकारं प्रधानं च यत्पुमांश्चाऽखिलं जगत् ॥
बिभर्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः ।
[3]या विद्या या यथाऽविद्या यत्सत्यं चाऽसमव्ययम् ॥
तत्सर्वं सर्वभूतेश मैत्रेय मधुसूदने ।

पक्षः

बहिर्मुखानि सर्वाणि कृत्वा चाऽन्तर्मुखानि वै ।
मनसैवेन्द्रियग्रामं स्वात्मना विनियोजयेत् ॥
सर्वभावविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत् ।
एतद्ध्यानं च योगं च शेषोऽन्यो ग्रन्थविस्तरः ॥
चतुर्णां सन्निकर्षेण फलं यत्तदशाश्वतम् ।
द्वयोस्तु सन्निकर्षेण शाश्वतं ध्रुवमव्ययम् ॥

1 भूतमाला वै द्विज—मा and स
2 शेषरूपाणि—मा ; शररूपाणि—मु पाठ
3 या विद्यायत्था विद्या यत्सच्चासत्स्म—मम् इति मु पाठ

यथाऽस्ति सर्वलोकस्य तथास्तीति विकल्प्यते ।
कथ्यमानं तथाऽन्यस्य हृदये नावतिष्ठते ॥
सुसंवेद्यं हि तद्ब्रह्म कुमारी स्त्रीसुखं यथा ।
अयोगी नैव जानाति जात्यन्धो हि यथा घटम् ॥
नित्याभ्यसनशीलस्य सुसंवेद्यं हि तद्भवेत् ।
तत्सूक्ष्मत्वादनिर्देश्यं परं ब्रह्म सनातनम् ॥

'चतुर्णामिति' आत्ममनोविषयेन्द्रियाणामिति । 'द्वयोः' आत्ममनसोः ।

ब्रह्मपुराणे

गुणेन्द्रियशरीरैश्च भूततन्मात्रजातिभिः ।
सुखदुःखैरहं नित्यमपरामृष्ट एव हि ॥
चिद्रूपो विमलो व्यापी द्रष्टा श्रोता च सर्वगः ।
घ्राता स्पर्शयिता देही तथा रसयिताऽस्मि च ॥
नित्यं कर्ता न कर्ता च ग्रहीता देहवर्जितः ।
ऐश्वर्ययोगमेतन्मे स्थितोऽस्म्येकस्त्वनेकधा ॥
आकाशं यदिदं सर्वं व्याप्यमस्याणुमद्भुतम् ।
आत्मैवाऽहं जगत्सर्वं निष्कलं सकलं हि यत् ॥
इति भावनया योगी यदा स्यात्सुदृढीकृतः ।
विमुक्तो देहगहनात्तदा स्यात् परमेश्वरः ॥
शुभेऽशुभे च संक्षीणे दग्ध बीजे च जन्मनाम् ।
प्रयाति परमात्मानं तद्विष्णोः[1] परमं पदम् ॥
मोक्षस्य नैव किञ्चित्स्यादन्यत्र गमनं क्वचित् ।
स्थानं वा धाम परमं यत्र गच्छन्ति योगिनः ॥

1 मोक्षे इति गरुडपुराणेऽपपाठः.

अज्ञानं यन्धमेवस्तु मोक्षो ब्रह्मलयस्त्विति ।
त्यक्त्वा सर्वविकल्पांस्तु आत्मस्थं निश्चलं मनः ॥
कृत्वा शान्तो भवेद्योगी दग्धेन्धन इवानल: ।
अगाधबुद्धिं पृथिवीं विचरेद्गगनाकृतिः ॥
उपगम्य क्षमात्मानं नाशोत्पत्तिविवर्जितम् ।
यस्मिन्काले क्षमात्मानं योगी जानाति केवलम् ॥
तस्मात्कालात्समारभ्य जीवन्मुक्तोऽभिधीयते ।

[1]महाभारते

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥
[2]क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥
ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्परा ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशय: ॥

1 भगवद्गीता—१२ १-१२.

2 These three lines are missing in the Udaipur Ms but are found in the other two Mss.

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाऽऽप्तुं धनञ्जय ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥
श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्[1] ॥

मार्कण्डेयपुराणे

सारभूतमुपासीत ज्ञानं यत्कर्मसाधनम्[2] ।
ज्ञानानां बहुता येयं योगविघ्नकरी हि सा ॥
इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् ।
अपि कल्पसहस्रैस्तु[3] न स ज्ञेयमवाप्नुयात् ॥

महाभारते

यस्मिन्यस्मिंस्तु विषये यो यो याति विनिश्चयम् ।
स तमेवाभिजानाति नान्यं भरतसत्तम ॥

1 [illegible] पाठः [illegible] पुस्तके [illegible]
2 [illegible]—क and ख ४१ १६–१८
3 [illegible]—क and ख

॥ २० ॥

अथ योगप्रवृत्तिचिह्नानि

तत्र मार्कण्डेयपुराणे

[1]अलौल्यमारोग्यमनिष्ठुरत्वम्
गन्धः शुभो मूत्रपुरीषमल्पम् ।
कान्तिः प्रसादः स्वरसौम्यता च
योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥
अनुरागं जनो याति परोक्षे गुणकीर्तनम् ।
न बिभ्यति च सत्त्वानि सिद्धेर्लक्षणमुत्तमम् ॥
शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न जायते ।
न भीतिमेति चाऽन्येभ्यस्तस्य सिद्धिरुपस्थिता ॥
प्रवृत्तिलक्षणाख्याता योगिनो विस्मयात्तथा ।
विज्ञानं विलयं याति तस्माद्गोप्याः प्रवृत्तयः ॥

वायुपुराणे

[2]आत्मानं पृथिवीं चैव ज्वलन्तीं यदि पश्यति ।
भूतान्याविशते चैव विन्द्यात् सिद्धिमुपस्थिताम् ॥

1 ३९ ६३
2 ११ ६४

॥ २१ ॥

अथ योगोपसर्गा

तत्र देवल

[1][नि?]द्यामिमत्तो निद्राबाधाभयानकोत्पत्तिज्ञानपीडा। भोगातिशयः कोपनैपुण्यमैश्वर्यविशेषो धर्ममहत्त्वं विद्यास्थानानि यशोवाप्तिरिति योगिनां यथोपसर्गाः।

'ज्ञानपीडा' स्मृत्यादिभ्रंशः।

मार्कण्डेयपुराणे

[2]उपसर्गाः प्रवर्तन्ते दृष्टेऽप्यात्मनि योगिनः।
ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे ॥
काम्याः क्रियास्तथा कामान्मानुषानभिवाञ्छति।
स्त्रियो दानफलं विद्या मायाः कुप्यं धनं दिनम् ॥
देवत्वममरेशत्वं रसायनचय क्रियाः।
मरुत्प्रपतनं यज्ञो जलाग्न्याविशनं तथा ॥
श्राद्धानामथ दानानां फलानि नियमास्तथा।
तपोपवासपूर्वं च देवनेज्या यमानि च ॥
तेभ्यस्तेभ्यश्च कर्मभ्य उपसृष्टोऽभिवाञ्छति।
चित्तमित्थं प्रवर्तन्ते येन योगी निवर्तयेत् ॥

1 All M s. read like this. निद्राभिभव is suggested
2 ४ ३-१८

ब्रह्मसक्तं मनः कुर्वन्नुपसर्गात्प्रमुच्यते ।
उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः ॥
योगिनः सम्प्रवर्तन्ते सात्त्वराजसतामसाः ।
प्रातिभः श्रावणो दैवो भ्रमावर्तौ तथा परौ ॥
पञ्चैते योगिनो योगविघ्नाय कटुकोदया ।
वेदान्तशास्त्रकाव्यार्थविद्याः शिल्पान्यनेकशः ॥
प्रतिभान्ति यदस्येति प्रातिभः स तु योगिनः ।
शब्दार्थानखिलान्वेत्ति शब्दं गृह्णाति चैव यत् ॥
योजनानां सहस्रेभ्यः श्रावणः सोऽभिधीयते ।
अष्टौ यदा तु दृश्यन्ते समन्ताद्देवयोनयः ॥
उपसर्गं तमप्याहुर्दैवमुन्मत्तवद्बुधाः ।
भ्राम्यते यन्निरालम्बं मनो दोषेण योगिनः ॥
समस्ताचारविभ्रंशाद्भ्रमः स परिकीर्तितः ।
आवर्त इव तोयस्य ज्ञानावर्तो यदाऽऽकुलः ॥
चित्तनाशकृदावर्त उपसर्गः स उच्यते ।
एतैर्नाशितयोगास्तु सकला देवयोनय ॥
उपसर्गैर्महाघोरैरावर्तन्ते पुनः पुनः ।
प्रवृत्यालम्बकं शुक्लं योगी तस्मान्मनोमयम् ॥
चिन्तयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः ।
योगयुक्तः सदा योगी लघ्वाहारो जितेन्द्रियः ॥
सूक्ष्मास्तु धारणाः सप्त भूराद्या मूर्ध्नि धारयेत् ।
धरित्रीं धारयन् योगी तत्सौक्ष्म्यं प्रतिपद्यते ॥
आत्मानं मन्यते चोर्वीं तद्गन्धं च जहाति सः ।
तथैवाऽप्सु रसं सूक्ष्मं तद्रूपं च तेजसि ॥
स्पर्शं वायौ तथा तद्वद्बिभ्रतस्तस्य धारणा ।

व्योम्नस्सूक्ष्मप्रवृत्तस्य शब्दं तत्र जहाति च ॥
मनसा सर्वभूतानां मन आविशते यदा ।
मानसीं धारणां बिभ्रन्मनः सौक्ष्म्यं जहाति च ॥
एतद्बुद्धिमशेषाणां सत्त्वानामेत्य योगवित् ।
परित्यजति सम्प्राप्य बुद्धिसौक्ष्म्यमनुत्तमम् ॥
परित्यजति सूक्ष्माणि सप्त ह्येतानि योगवित् ।
सम्यग्विज्ञाय यो तर्के [तत्त्वं ?] तस्यावृत्तिर्न विद्यते ॥
एतासां धारणानां तु सप्तानां सौक्ष्म्यमात्मवान् ।
दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां भजेत्[1] ॥
यस्मिन् यस्मिंश्च कुरुते भूते रागं महीपते ।
तस्मिंस्तस्मिन् समासक्तिं सम्प्राप्य स विनश्यति ॥
तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परं परम् ।
परित्यजति यो योगी स परं प्राप्नुयात्पदम् ॥
एतान्येव तु सन्धाय सप्त सूक्ष्माणि पार्थिव ।
भूतादीनां विरागोऽत्र सद्भावज्ञस्य मुक्तये ॥
गन्धादिषु समासक्तमित्येतदखिलं जगत् ।
पुनरावृत्तये भूप स ब्रह्म स न मानुषम्[2] ॥
सप्तैव धारणा योगी समतीत्य यदिच्छति ।
तस्मिंस्तस्मिन् लये सूक्ष्मे याति भूते नरेश्वर ॥
देवानामसुराणां च गन्धर्वोरगरक्षसाम् ।
देहेषु लयमायाति सङ्गं नाऽऽप्नोति च क्वचित् ॥

'मानुषाः कामाः' सत्त्वादयः । 'दारफलं' पुत्रादिकं । 'विद्या' आध्यात्मिकातिरिक्ताः । 'माया' इन्द्रजालादि ।

1 त्यजेत् इति—ग
2 स ब्रह्मसमानुषम्—घ and ङ.

'कुप्यं' हेमरूप्यव्यतिरिक्तं कांस्यादि। 'मरुत्प्रपतनं' मरुद्गमनम्।

<u>वायुपुराणे</u>

[1]विदित्वा सप्त सूक्ष्माणि षडङ्गं च महेश्वरम्।
प्रधानं विनियोगज्ञः परं ब्रह्माऽधिगच्छति॥
सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिं च विभुर्विभुज्ञाः
षडाहुरङ्गानि महेश्वरस्य॥
नित्यं ब्रह्मपरो युक्त उपसर्गैः प्रमुच्यते।

॥ २२ ॥

अथ योगविभूतयः

तत्र देवलः

अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्र कामावसायित्वं चाऽष्टावैश्वर्यगुणाः। तेषामणिमामहिमालघिमाख्यः शारीराः। प्राप्त्यादयः पञ्चेन्द्रियाः। तत्र सशरीरत्वमणिमा[1] अणुभावात् सूक्ष्माण्यप्याविशति। शरीरमहत्त्वं महिमा। महत्त्वात् सर्वशरीराण्यावृणोति। शरीरलघुतामित्वं लघिमा। तेनाऽतिदूरस्थानपि क्षणेनाऽऽसादयति। विश्वविषयावाप्तिः प्राप्तिः। प्राप्त्या सर्वप्रत्यक्षदर्शी भवति। यथेष्टचारित्वं प्राकाम्यम्। प्राकाम्येन सर्वभोगवरानाप्नोति। अप्रतिहतैश्वर्यमीशित्वम्। ईशित्वेन दैवतान्यप्यतिशेते। आत्मवश्यता वशित्वम्। वशित्वेनाऽपरिमितायुर्वश्यजन्मा च भवति। यत्र कामावसायित्वं त्रिविधम्—छायावेशः अवध्यानावेशः अङ्गप्रवेश इति। यत् परस्य छायाप्रवेशमात्रेण चित्तं वशीकरोति स छायावेशः। यद् दूरस्थानामपि अनुध्यानेन चित्ताधिष्ठानं, सोऽवध्यानावेशः। यत्सजीवस्योभिस्ते [?] जीवस्य वा शरीरानुप्रवेशनं

1 भी मि मोक्ष पृ. ४४ reads तत्सूक्ष्मशरीरत्वमणिमा

सोऽक्रमवेशः । यत्र कामावसायित्वेन मूर्तग्रव्यं चाधितिष्ठ तीति ऐश्वर्यावस्थानं तत्र प्रकृति-पुरुषोत्तरहेतोर्धर्मतेजोज्ञान विशेषात् । [1]सातिशयेन संभूतं चैश्वर्याद्भवतीति । एवमेता नैश्वर्यगुणानधिगम्योद्धूतकल्मष छिन्नसंशयः प्रत्यक्षदर्शी धर्मपरावरज्ञः कूटस्थः सर्वमिदं असदनित्यमिति ज्ञात्वा स्वय मेव शान्तिमधिगच्छतीत्यैश्वर्याभ्याप्तिः[2] ।

[3]अल्पकश्च यथा राजन् वह्निः शाम्यति दुर्बल ।
आक्रान्त इन्धनैः स्थूलैस्तद्व्योगो हि नु प्रभो[4] ॥
स एव च यथा राजन् वह्निर्जातबलः पुमान्[5] ।
समीरणयुतः कृत्स्नां दहेत् क्षिप्र महीमिमाम् ॥
न त्वजातबलो योगी दीप्ततेजो महाबलः ।
अन्तकाल इवाऽऽदित्य कृत्स्नं सशोषयेज्जगत् ॥
दुर्बलश्च यथा राजन् स्रोतसा [6]ह्रियते नरः ।
बलहीनस्तथा योगी विषयै क्रियतेऽवशः ॥
तदेव च यथा स्रोतो विष्टम्भयति रावणः ।
तद्व्योगबलं लब्ध्वा व्यूहते विषयान् बहून् ।

1 सातिशयं न मूर्त चैश्वर्याभ्भवति —म and ख.
सातिशयं नवमूर्त चैश्वर्यान् भवति—श्री मि मोक्ष पृ ४४९
2 एवा इति—पूर्वपूर्वोक्ताना एश्वर्याण्य शरीरेन्द्रियक्रमेण विभाग उक्त । तत्र अणु शरीरत्वं इत्यारभ्य सोऽक्रमवेश इत्यन्तम अत्राक्रमाणि व्याख्यानमुच्यानि । प्रकृतिपुरुषोत्तर हेत्वेरिति । ईश्वरत्वेन हि प्रकृतिपुरुषनियामकत्वं भवति । तदैव हेतुना धर्मतज्ज्ञानविशेष उपलभ्यते । तेनैव सातिशयो भवतीति समुदायार्थ ॥ —श्री मि मोक्ष पृ ४४९
3 म—१ १ १९
4 श्री मि मोक्ष पृ ४५ reads तद्वोगबल प्रभो ।
ग. and ख. read तद्व्योगो न प्रभो
5 पुन इति श्री मि मो ग and ख पाठ
6 श्री मि मो पृ ४५ ह्रियत ग and म क्रियत

[[1]तथा]

विशन्ति परवशास्पार्थ [2]योगायोगबलान्विताः ।
प्रजापतीनृषीन् देवान् महाभूतानि चेश्वराः ॥
न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः ।
ईशते नृपते सर्वे योगस्यामिततेजसः ॥
आत्मानं तु सहस्राणि बहूनि भरतर्षभ ।
योगं कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्[3] ॥
प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत् ।
संक्षिपेच्च पुनस्तानि सूर्यस्तेजोगणानिव[4] ॥

[5]याज्ञवल्क्यः

अन्तर्धानं स्मृतिः कान्तिः दृष्टिः श्रोत्रज्ञता तथा ।
निजं शरीरमुत्सृज्य परकायप्रवेशनम् ॥
[6]अन्यानां छन्दतो (?) सृष्टिर्योगसिद्धेस्तु लक्षणम् ।
सिद्धे योगे त्यजन् देहममृतत्वाय कल्पते ॥

1 मी मि मोक्ष १ ४०९
2 *Ibid* परमेश्वर्यम्
3 *Ibid* महीमिमे
4 *Ibid* भवति च
5 ३ २ १-२ १
6 अर्थानां छन्दतः सृष्टि इति मिताक्षरापाठः

॥ २३ ॥

अथ स्थितप्रज्ञचरितम्

तत्र महाभारते

[1]अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥

श्रीभगवानुवाच ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवाऽऽत्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥
यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् ।
नाऽभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥
यदा संहरते चाऽयं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥
[2]या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

1 भगवद्गीता—२ ५४—५८
2 भगवद्गीता—२ ६९—७२

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥
विहाय कामान् यः सर्वान् पुमांश्चरति निस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

'या निशे'त्यादि निशेव निशा ब्रह्मतत्त्वं। तत्र हि सर्वभूतानां दर्शनाभावः। तस्यां जागर्ति तद्ब्रह्मस्वरूपमनुभवति। 'संयमी'योगस्थापीत्यर्थः। 'यस्यां जाग्रति' विषयासक्तिलक्षणायां निशायामुन्मीलिताक्षाणि भूतानि च यस्यां तस्यां तद्दर्शनवृत्तेर्निरोधादित्यर्थः। 'अचलप्रतिष्ठमिति'। अचला प्रतिष्ठा स्थितिर्यस्य तं अचलप्रतिष्ठम्। आपो यथा प्रविशन्ति विक्रियामनापादयन्त्यस्तथा योगिनः चित्तविक्रियामकुर्वन्तः कामविषया उपतिष्ठन्ते इत्यर्थः।

[1]तथा

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येवं योऽवतिष्ठति नेङ्गते ॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरः तुल्यनिन्दात्मसंस्तुतिः ॥

1 भगवद्गीता—१४ २२-२६

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥
मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥
ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याऽव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥

प्रकाशस्य धर्मो ज्ञानं। प्रवृत्ती रजसो धर्मः। मोहस्तु तमसो धर्मः। 'संप्रवृत्तानि' सुखनिमित्तानीति शेषः। 'निवृत्तानि' सुखदुःखनिमित्तानीति शेषः। 'नेङ्गते' न चलति।

[1]तथा

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥

[तथा]

[2]विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥
न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥
बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥

1 भगवद्गीता—१३ ३०
2 भगवद्गीता—५ १८-२१

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥
शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥
योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ।

[तथा]

[1]सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥

[तथा[2]]

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

'यदा भूतपृथग्भावमिति भूतानां पृथग्भावमेकस्थं प्रलयावस्थायां परमकारणेऽनुपश्यति तत एव चैकस्मा

1 भगवद्गीता—६ ९
2 भगवद्गीता—६ ३०-३२

त्परमात्मनो विस्तारः। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत[1]" इति सृष्टिप्रलयविधिर्ब्रह्म सम्पद्यते इत्यर्थः। 'पण्डिताः समदर्शिनः' ब्राह्मणादिषु ब्रह्माऽवस्थितं समदर्शिनो भवन्ति। सर्वभूतेष्वाकाशवत् ब्रह्मरूपमनुगतं पश्यन्तीत्यर्थः।

<u>[2]तथा</u>

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥

'सर्व वासुदेवमि'तिपाश्रितेषामित्यर्थः।

<u>[3]तथा</u>

चरन्तं ब्राह्मणं कञ्चित् स्वल्पवित्तमनामयम्।
पप्रच्छ राजा प्रह्लादो बुद्धिमान् बुद्धिमत्तरम्[4]॥

[[5]प्रह्लाद उवाच।]

स्वस्थः प्राज्ञो मृदुर्दान्तो निर्विधित्सोऽनसूयकः।
सुवाक् प्रगल्भो मेधावी [6]प्राज्ञश्चरसि बालवत्॥
नैव प्रार्थयसे लाभमलाभे नाऽनुशोचसि[7]।
नित्यतृप्त इव ब्रह्मन् न किंचिदभिमन्यसे॥
स्रोतसा ह्रियमाणासु प्रजासु विमना इव।
धर्मकामार्थकार्येषु कूटस्थ इव लक्ष्यसे[8]॥

1 तैत्तिरीयोपनिषत् ब्रह्मानन्द—१ १
2 भगवद्गीता— ११
3 महाभारत शान्तिपर्व—१७ ३ १
4 प्रश्नमम —पु भा (पुस्तकों)
5 Om t ed in
6 कुमारः स्वेष —पु म
7 नाऽप्यनुशोचसि— पु भ
8 लक्ष्यसे—ऽन्य पु भ

नाऽनुतिष्ठसि धर्मार्थौ न कामं चाऽनुवर्तसे ।
इन्द्रियार्थाननादृत्य मुक्तश्चरसि साक्षिवत् ॥
का नु प्रज्ञा श्रुतं वाऽपि वृत्तिर्वा का नु ते मुने! ।
क्षिप्रमाचक्ष्व मे ब्रह्मन् श्रेयो यदिह मन्यसे ॥

[[1]भीष्म उवाच ।]

अनुयुक्तः स मेधावी लोकधर्मविधानवित् ।
उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया ॥
पश्यन् प्रह्लाद भूतानामुत्पत्तिमनिमित्ततः ।
ह्रासं [2]वृद्धिं विनाशं च न प्रहृष्ये न च व्यथे ॥

[[3]तथा]

दिवि सञ्चरमाणानि ह्रस्वानि च महान्ति च ।
ज्योतींष्यपि यथाकालं पतमानानि लक्षये ॥
इति भूतानि संपश्यन् अनुषक्तानि मृत्युना ।
सर्वं सामान्यतो विद्वान् कृतकृत्यः सुखं स्वपे ॥
सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया ।
शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥
आशयन्त्यपि मामन्नं पुनर्बहुगुणं बहु ।
पुनरल्पं पुनस्तोकं पुनर्नैवोपपद्यते ॥
कणं कदाचित् खादामि पिण्याकमपि च ग्रसे ।
भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् बहून् ॥
शये कदाचित् पर्यङ्के भूमावपि पुनः शये ।
प्रासादे चाऽपि शय्या मे कदाचिदुपपद्यते ॥

1 Omitted in text
2 वृद्धिविनाशं—ख and ग, घ
3 महाभारत शान्तिपर्व १७७ १०–१५

धारयामि च चीराणि शाणक्षौमाजिनानि च ।
महार्हाण्यथ वासांसि धारयाम्यहमेव च[1] ॥
न संनिपतितं धर्म्यमुपभोगं यदृच्छया ।
प्रत्याचक्षे न चाप्येनमनुरुन्धे सुदुर्लभम् ॥
अचलमनिधनं शिवं विशोकं
शुचिमतुलं विदुषां मते निविष्टम् ।
अनभिमतमसेवितं च मूढै-
र्व्रतमिदमाजगरं शुचिश्चरामि ॥
अचलितमतिरच्युतः स्वधर्मात्
परिमितसंसरणं परावरज्ञः[2] ।
विगतभयकषायलोभमोहो
व्रतमिदमाजगरं शुचिश्चरामि ॥
अनियतफलभोज्यभक्ष्यपेयं
विधिपरिणामविभक्तदेशकालम् ।
हृदयसुखमसेवितं कदर्यै-
र्व्रतमिदमाजगरं शुचिश्चरामि ॥
इदमिदमिति तृष्णयाऽभिभूतं
जनमनवाप्तधनं विषीदमानम् ।
निपुणमनुनिशाम्य तत्त्वबुद्ध्या
व्रतमिदमाजगरं शुचिश्चरामि ॥
बहुविधमनुदृश्य चार्थहेतोः
कृपणमिहाऽऽर्यमनार्यमाश्रयन्तम् ।
उपशमरुचिरात्मवान् प्रशान्तो
व्रतमिदमाजगरं शुचिश्चरामि ॥

1 [illegible] —मु म
2 [illegible] —मु म

सुखमसुखमलाभमर्थलाभं
रतिमरतिं मरणं च जीवितं च ।
विधिनियतमवेक्ष्य तत्त्वतोऽहं
व्रतमिदमाजगरं शुचिश्चरामि ॥
अपगतभयरागमोहदर्पो
धृतिमतिबुद्धिसमन्वितः प्रशान्तः ।
उपगतफलभोगिनो निशाम्य
व्रतमिदमाजगरं शुचिश्चरामि ॥
अनियतशयनासनप्रकृत्या
यमनियमव्रतशौचसत्ययुक्तः ।
अपगतफलसंचयः प्रहृष्टो
व्रतमिदमाजगरं शुचिश्चरामि ॥
अपगतमसुखार्थमीहनार्थैः
उपगतबुद्धिरवेक्ष्य चाऽऽत्मसंस्थः ।
तृषितमनियतं मनो नियन्तुं
व्रतमिदमाजगरं शुचिश्चरामि ॥
न हृदयमनुरुध्यते मनो वा
प्रियसुखदुर्लभतामनित्यतां च ।
तदुभयमपि लक्षयन्निवाऽहं
व्रतमिदमाजगरं शुचिश्चरामि ॥
बहुकथितमिदं हि बुद्धिमद्भिः
कविभिरभिप्रथयद्भिरात्मकीर्तिम् ।
इदमिदमिति तत्र तत्र हन्त
स्वपरमतैर्गहनं प्रतर्कयद्भिः ॥

तदिदमनुनिशम्य विप्रपात
　पृथगभिपन्नमिहाऽबुधैर्मनुष्यैः ।
अनवसितमनन्तदोषपारं
　नृषु विहरामि विनीतदोषतृष्णः ॥

[[1]भीष्म उवाच ।]

अजगरचरितं व्रतं महात्मा
　य इह नरोऽनुचरेद्विनीतरागः ।
अपगतभयमन्युलोभमोहः
　स खलु सुखी विहरेदिमं विहारम् ॥

[2]तथा

युधिष्ठिर उवाच ।

किंशीलः किंसमाचारः किंविद्यः किंपराक्रमः ।
प्राप्नोति ब्रह्मणस्स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥

भीष्म उवाच ।

मोक्षधर्मेषु नियतो लघ्वाहारो जितेन्द्रियः ।
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥
अत्राऽप्युदाहरन्तीममितिहासं पुरातनम् ।
जैगीषव्यस्य संवादमसितस्य च भारत[3] ॥
जैगीषव्यं महाप्राज्ञं धर्माणामागतागमम् ।
अक्रुद्ध्यन्तमहृष्यन्तमसितो देवलोऽब्रवीत् ॥

1 Omitted in the text

2 महाभारत शान्तिपर्व—२२९, १-२९

3 The following śloka occurs immediately after भारत in the Kumbhakonam edition of the Mahābhārat —

　महादेवान्तरे वृत्तं वैष्णवेऽन्तरे तथा ।
　यथान्याय्यं दधीन्द्र कार्यं धर्मसाधनम् ॥

देवल[1] उवाच ।

न प्रीयसे वन्द्यमानो निन्द्यमानो न
का ते प्रज्ञा कुतश्चैषा किं ते तस्याः

भीष्म उवाच ।

इति तेनाऽनुयुक्तस्सनुवाच स महातपाः ।
महद्वाक्यमसन्दिग्धं पुष्कलार्थपदं शुचि ॥

जैगीषव्य उवाच ।

या गतिर्या परा निष्ठा या शान्तिः[2]
तामहं संप्रवक्ष्यामि यन्मां पृच्छसि वै द्विज
निन्दत्सु च समा नित्यं प्रशंसत्सु च देवल
निह्नुवन्ति च ये तेषां समयं सुकृतं च यत्
उक्ताश्च न विवक्षन्ति वक्तारमहिते रतम् ।
प्रतिहन्तु न चेच्छन्ति हन्तारं च मनीषिणः
नाऽप्राप्तमनुशोचन्ति प्राप्तकालानि कुर्वते
न चाऽतीतानि शोचन्ति नैतानि प्रतिजानते
संप्राप्तानां च पूज्यानां कामादर्थेषु देवल ॥
यथोपपत्तिं कुर्वन्ति शक्तिमन्तो कृतव्रताः
पक्वविद्या महाप्रज्ञा जितक्रोधा जितेन्द्रियाः
मनसा कर्मणा वाचा नाऽपराध्यन्ति कर्हिचित्
अनीर्षवो न चाऽन्योन्यं विहिंसन्ति कदाच
न च जातूपतप्यन्ते धीराः परसमृद्धिभिः ।
निन्दाप्रशंसे चात्यर्थं न वदन्ति परस्य च ॥

1 Not found in पु. ला.
2 शान्ति — पु. ला.

न च निन्दाप्रशंसाभ्यां विक्रियन्ते कदाचन ।
सर्वतश्च प्रशान्ता ये सर्वभूतहिते रताः ॥
न क्रुध्यन्ति न हृष्यन्ति नाऽपराध्यन्ति कस्यचित् ।
विमुच्य हृदयग्रन्थिं संक्रमन्ते यथासुखम् ॥
येषां न बान्धवास्सन्ति येऽन्येषां च न बान्धवाः ।
अमित्राश्च न सन्त्येषां ये चाऽमित्रा न कस्यचित् ॥
य एवं कुर्वते मर्त्याः सुखं जीवन्ति सर्वदा ।
धर्ममेवाऽनुरुध्यन्ते धर्मज्ञा द्विजसत्तमाः ॥
ये चातो विच्युता मार्गात्ते हृष्यन्त्युद्विजन्ति च ।
आस्थितस्तमहं मार्गमसूयिष्यामि तत्कथम् ॥
निन्द्यमानः प्रशस्तो वा हृष्येयं केन हेतुना ।
यद्यदिच्छन्ति तत्तस्मादधिगच्छन्ति मानवाः ॥
न मे निन्दा प्रशंसाभ्यां ह्रासवृद्धी भविष्यतः ।
अमृतस्येव संतृप्येदवमानस्य तत्त्ववित् ॥
विषस्येवोद्विजेन्नित्यं सम्मानस्य विचक्षणः ।
अवज्ञातः सुखं शेते इह चामुत्र चोभयोः ॥
विमुक्तः सर्वपापेभ्यो योऽवमन्ता स बुध्यते ।
परां गतिं च ये केचित् प्रार्थयन्ति मनीषिणः ॥
[1]एतद्व्रतं समाश्रित्य सुखमेधन्ति ते जनाः ।
सर्वतश्च समाहृत्य क्रतून् सर्वान् जितेन्द्रियः ॥
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ।
नाऽस्य देवा न गन्धर्वा न पिशाचा न राक्षसाः ।
पदमन्ववरोहन्ति प्राप्तस्य परमां गतिम् ॥

1 एतद्व्रतं समाश्रित्य—इ भारत

¹मार्कण्डेयपुराणे

दत्तात्रेय उवाच।

दुःखापहारमद्यैव करोमि तव
सत्यं ब्रूहि किमर्थं ते दुःखं

[²अलर्क उवाच।]

³कस्य त्वं कस्य वा दुःखं तत्त्वतो...
⁴अजानीमामि देहस्य सर्वाङ्गानि च
इत्युक्तश्चिन्तयामास स राजा तेन
त्रिविधस्यापि दुःखस्य
स विमृश्य चिरं राजा पुनः पुनरुदारधीः॥
आत्मानमात्मना वीरः
⁵नाऽहमुर्वी न सलिलं न ज्योतिरनिलो
नाऽऽकाशं किन्तु शारीरं न मेऽस्य
तथा च ⁶ममनाशात्वे विशेषेष्वोपलब्धौ॥⁷

1 १४ —४
2 Not found in the manuscripts.
3 Not found in printed editions
4 A. S. B Ms. G. 1064 begins here.
5 The following lines, found in the printed are omitted here —

[illegible]
[illegible]
[illegible]

6 A. S. B [illegible] for [illegible]; [illegible]
7 The following lines are omitted here

[illegible]
[illegible]

<u>विष्णुपुराणे</u>[1]

राजोवाच ।

किं ²श्रान्तोऽस्यल्पमध्वानं त्वयोढा
किं मया स सहो नत्वं पीवानसि

ब्राह्मण उवाच ।

नाहं पीवा न चैवोढा शिबिका भवतो
न श्रान्तोऽस्मि न चाऽऽयासः

राजोवाच ।

प्रत्यक्षं दृश्यसे पीवा ऽद्यापि शिबिका
श्रमश्च भारोद्वहने भवत्येव हि देहिनाम् ॥

ब्राह्मण उवाच ।

प्रत्यक्षं भवता भूप यद्दृष्टं मम तद्वद ।
बलवानबलश्चेति वाच्यं पश्चाद्विशेषणम् ।
त्वयोढा शिबिका चेति त्वय्यद्याऽपि च
मिथ्यैतदत्र तु भवान् शृणोतु वचनं मम ।
भूमौ पादयुगस्याऽऽस्ता जङ्घे पादद्वये स्थिते ।
ऊरू जङ्घाद्वयावस्थे तदाधारं तथोदरम् ॥
वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ ।
स्कन्धाश्रितेऽयं शिबिका मम भारोऽत्र किं कृतः ॥

1 Mitramiśra omits entirely the quotation from विष्णुपुराण, evidently as the passage goes against the Advaita doctrine. rejection of Advaita also presumable from his selection. Rāmānuja cites the identical passages in his श्रीभाष्य—१, १२, १३.

2 श्रान्तोऽस्यल्प for [illegible]—A. S B and [illegible].

3 [illegible]—A S B and [illegible].

शिबिकायां स्थितं चेदं वपुस्त्वदुपलक्षितम् ।
तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥
अहं त्वं च तथाऽन्ये च[1] भूतैरुह्यामहे वयम् ।
गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम् ॥
कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते ।
अविद्यासंचितं[2] कर्म तच्चाऽशेषेषु जन्तुषु ॥
आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्यपचयौ नाऽस्य एकस्याऽखिलजन्तुषु ॥
यदा नोपचयस्तस्य न चैवाऽपचयो नृप ।
तदा पीवानसीतीत्थं कया युक्त्या त्वयेरितम् ॥
भूपादजङ्घाकट्यूरुजठरादिषु संस्थिते ।
शिबिकेयं यदा स्कन्धे तदा [3]भारसमस्त्वया ॥
तथाऽन्यजन्तुभिर्भूप शिबिकोत्था न केवलम् ।
शैलद्रुमगृहस्थोऽपि[4] पृथिवीसंभवोऽपि वा ॥
यदा पुंसः पृथग्भावः कारणैः प्राकृतैर्नृप ।
सोढव्यस्तु तदाऽऽयासः कतरो नृपते मया ॥
यद्द्रव्या शिबिका चेयं तद्द्रव्यो भूतसंग्रहः ।
भवतो मेऽखिलस्याऽस्य ममत्वेनोपबृंहितः ॥

पराशर उवाच ।

एवमुक्त्वाऽभवन्मौनी स वहन् शिबिकां द्विजः ।
सोऽपि राजाऽवतीर्योर्व्यां तत्पादौ जगृहे त्वरन् ॥

1 च for तु—A S B
2 संचितं कर्म for संचित कर्म A S B संचित कर्म M
3 भारश्रमस्त्वया for भारसमस्त्वया—M and A S B
4 गृहस्थोऽपि for गृहस्थोऽपि—A S B

30

राजोवाच ।

भो भो विसृज्य शिबिकां प्रसादं कुरु
कथ्यतां को भवानत्र [1]जाल्मरूपधरः
यो भवान् यन्निमित्तं च
तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे

ब्राह्मण उवाच ।

श्रूयतां कोऽहमित्येतद्वक्तुं किंचित
उपभोगनिमित्तं च सर्वत्राऽऽगमनक्रिया ॥
सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ ।
धर्माधर्मोद्भवौ भोक्तुं जन्तुर्देहादिमृच्छति ॥
सर्वस्यैव हि भूपाल जन्तोः सर्वत्र कारणम् ।
धर्माधर्मौ यतस्तस्मात् कारणं पृच्छ्यते

राजोवाच ।

धर्माधर्मौ न सन्देहः सर्वकार्येषु कारणम् ।
उपभोगनिमित्तं च देहाद्देहान्तरागमः ॥
यदेतद्भवता प्रोक्तं कोऽहमित्येतदात्मनः ।
वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्तते ॥
योऽस्ति सोऽहमिति ब्रह्मन् कथं वक्तुं न
आत्मन्येष न दोषाय शब्दोऽहमिति यो

ब्राह्मण उवाच ।

शब्दोऽहमिति दोषाय नाऽऽत्मन्येष तथैव

1 [illegible] for [illegible]—A S B
2 [illegible] for [illegible]—A S B [illegible] and [illegible].

अनात्मन्यात्मविज्ञानं शब्दो[1] वा भ्रान्तिलक्षणः ॥
जिह्वा ब्रवीत्यहमिति दन्तोष्ठौ तालुकं नृप ।
एतेनाऽहं यत सर्वे वाङ्निष्पादनहेतवः ॥
किं हेतुभिर्वदत्येषा वागेवाऽहमिति स्वयम् ।
तथाऽपि वाङ्नाहमेतद्वक्तुमित्थं न युज्यते ॥
पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः ।
ततोऽहमिति कुत्रैतां संज्ञां राजन् करोम्यहम् ॥
यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ।
तदेषोऽहमयं[2] चाऽन्यो वक्तुमेवमपीष्यते ॥
यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान्कोऽहमित्येतद्विफलं वचः ॥
त्वं राजा शिबिका चेयं वयं वाह्याः[3] पुरःसराः ।
अयं च भवतो लोको न सदेतन्नृपोच्यते ॥
वृक्षाद्दारु ततश्चेयं शिबिका त्वदधिष्ठिता ।
क वृक्षसंज्ञा याता स्याद्दारुसंज्ञाऽथवा[4] नृप ॥
वृक्षारूढो महाराजो नाय वदति ते जनः ।
न च दारुणि तिष्ठन्तं[5] ब्रवीति शिबिकागतम् ॥
शिबिका दारुसङ्घातो रचनास्थितिसंस्थितः ।
[6]अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥
एवं छत्रशलाकानां पृथग्भावो विमृश्यताम् ।
क यातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥

1 [illegible] — \ S B
2 [illegible] \ S B
3 [illegible] for [illegible] — \ S B
4 [illegible] — [illegible]
5 [illegible] — \ S B
6 [illegible] — \ S B

[1]पुमान्स्त्री गौरजो वाजी कुञ्जरो विहगस्तरुः ।
देहेषु लोके संज्ञेयं विज्ञेया कर्महेतुषु ॥
पुमान्न देवो न नरो न पशुर्न च पादपः ।
शरीराकृतिभेदास्तु भूपैते कर्मयोनयः ॥
वस्तु राजेति यल्लोके यच्च राजभटात्मकम् ।
तथाऽन्यच्च नृपेत्थं तन्न सत्संकल्पनात्मकम् ॥
यत्तु कालान्तरेणाऽपि नाऽन्यसंज्ञामुपैति वै ।
परिणामादिसंभूतं तद्वस्तु नृप तच्च किम् ॥
त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपोरिपुः ।
पत्न्याः पतिः पिता सूनोः क त्वां भूप वदाम्यहम् ॥
त्वं किमेतच्छिर किन्तु शिरस्तव तथोदरम् ।
किमु पादादिकं त्वं वै तवैतत् किं महीपते ॥
समस्तावयवेभ्यस्त्वं पृथग्भूतो व्यवस्थितः ।
कोऽहं त्वं चेति निपुणो भूत्वा चिन्तय पार्थिव ॥
एवं व्यवस्थितेऽतत्त्वे मयाऽहमिति भाषितम् ।
पृथक्करणनिष्पाद्य शक्यते नृप ते कथम् ॥

'तदुपलक्षितस्त्वयात्मनाऽहं त्वया गृहीत' । तत्र त्व मिति' । तत्र त्वमहमभेदस्त्वन्यपोच्यते । यतो भावयोर्बाध्यबाधकभावोऽस्तीति भावः । 'गुणप्रवाहः' गुणपरिणाम स्रोतः । 'शुद्धः' केवलो वस्त्वन्तरसंसर्गशून्योऽसङ्गीत्यर्थः । 'अक्षरो'ऽविनाशी । 'शान्तो' रागद्वेषरहितः । 'निर्गुणो' गुणातीतः । 'प्रकृतेः पर' अचेतनावस्थान्तविलक्षणः । 'भूपा लेत्यादि' । यद्यन्येन भ्रियमाणे भावे परस्याऽपि भारो भवेत्,

1 Fol. 39 of the Nagpur Ms. which should begin here is lost.

तदा मधुपलक्षितस्कन्धाश्रिते मर्त्त्ये तदाऽपि भारः[1] स्यादिति भावः। तथाऽन्यजन्तुभिर्भारः सम इत्यन्वयः। न केवलं शिबिकोत्थ भारः समः। किन्तु शीलभारोऽपि समः। 'आत्मः' असमीक्ष्यकारी[2] यन्निमित्तमित्यागमनहेतुविषयः। 'किमागमनकारणमिति' उद्देश्यप्रश्नः। 'शब्दोऽहमि'ति दोषायेत्यादि। 'अहमि'ति शब्दोऽयमात्मनि सम्प्रयोक्तरि वर्त्तमानो न दोषाय भवति। किन्तु अनात्मन्यात्मविज्ञान भ्रमः। तथाऽऽत्मशब्दस्याऽप्यनात्मनि प्रयोगो भ्रान्तिलक्षण इत्यर्थः। 'एते जिह्वादयः' शब्दाभिव्यक्तिहेतवो नाऽह कर्तृकत्वादशरीरत्वात् (?) अशरीरत्वाद्याऽहमिति शब्द विज्ञानयोरन्यथानयनमित्यर्थः।

तथा

[3]परमार्थस्तु भूपाल संक्षेपात् श्रूयतां मम।
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः॥
जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः।
परज्ञानमयोऽसद्भिः नामजात्यादिभिर्विभुः॥
न योगवान् युक्तोऽभूत्रैव पार्थिव योक्ष्यते।
तस्याऽऽत्मपरदेहेषु सतोऽप्येकतमं हि तत्॥
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतत्त्वदर्शिनः।
वेणुरन्ध्रविभेदेन यथा षड्जादिसंज्ञितः॥
अभेदव्यापिनो[4] वायोस्तथा तस्य महात्मन।

1 भाव इति उदयपुरमातृकायाम्
2 असमीक्ष्यकारी
3 २ १४ २८
4 अभेदव्यापिनो—A S. B

तथा

[1]श्रूयतां नृपशार्दूल यद्गीतमृभुणा पुरा ।
प्रतिबोधं जनयता निदाघस्य महात्मनः ॥
ऋभुर्नामाभवत्पुत्रो ब्रह्मणः परमेष्ठिनः ।
विज्ञाततत्त्वसद्भावो निसर्गादेव भूपते ॥
तस्य शिष्यो निदाघोऽभूत्पुलस्त्यतनयः पुरा ।
प्रादादशेषविज्ञानं स तस्मै परया मुदा ॥
अवाप्तज्ञानतन्त्रस्य न तस्याद्वैतवासना ।
स ऋभुस्तर्कयामास निदाघस्य नरेश्वरः ॥
देविकायास्तटे वीर नगरं नाम वै पुरम् ।
समृद्धमतिरम्यं च पुलस्त्येन निवेशितम् ॥
रम्योपवनपर्यन्ते स तस्मिन् पार्थिवोत्तम ।
निदाघनामा योगज्ञ ऋभुशिष्योऽवसत्पुरा ॥
दिव्यवर्षसहस्रे तु समतीतेऽस्य तत्पुरम् ।
जगाम स ऋभुः शिष्यं निदाघमवलोककः ॥
स तस्य वैश्वदेवान्ते द्वारालोकनगोचरः ।
स्थितस्तेन गृहीतार्घ्यो निजवेश्म प्रवेशितः ॥
प्रक्षालिताङ्घ्रिपाणिं च कृतासनपरिग्रहम् ।
उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरम् ॥

ऋभुरुवाच ।

भो विप्रवर्य भोक्तव्यं यदन्नं भवतो गृहे ।
तत्कथ्यतां कदन्नेषु न प्रीतिः सततं मम ॥

1 २ १ १

मित्राय उवाच ।

सक्तु[1]यावकपाक्यानामपूपानां च मे गृहे ।
यत्रोचितं द्विजश्रेष्ठ तद्भक्षय यथेच्छया ॥

भासुरुवाच ।

कवलानि द्विर्जितानि मित्रमत्र प्रयच्छ मे ।
संयावपायसादीनि द्राक्षाफाणितवन्ति च ॥

मित्राय उवाच ।

हे हे शालिनि मद्गेहे यत्किंचिदतिशोभनम् ।
भक्ष्योपसाधनं मिष्टं तेनास्याऽन्न प्रसाधय[2] ॥
इत्युक्ता तेन सा पत्नी मिष्टमन्न द्विजस्य तत्[3] ।
प्रसाधितवती तस्य भर्तुर्वचनगौरवात् ॥
स भुक्तवन्तमिच्छातो मिष्टमन्न महामुनिम् ।
